स्वहस्तेनाङ्गारास्तदलमधुनारण्यरुदितैः ॥, Amaru. 76.

निवृत्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः,
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने,
अहो दुष्टः कायस्तदपि मरणोपायचकितः ॥, Vai. 10.

(3) हरिणी.

339. If every foot consists of all-light, last-heavy, all-heavy, middle-light, last-heavy, light and heavy, *i·e.* **111 112 222 212 11212,** it is called हरिणी. Pause at every 6th, 10th and 17th syllable. This is the metre of the 19th canto of N.

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलैः,
दशनमुकुलैर्मुग्धालोकं शिशुर्दधती मुखम् ।
ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमैः,
अकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः ॥, U. I. 20.

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः,
कथय सुकृती कोऽयं मुग्धे त्वयाद्य विलोक्यते ॥, Amaru. 4.

इति बहुविधं बालक्रीडाविचित्रविचेष्टितं
ललितललितं सान्द्रानन्दं मनोहरमाचरन् ।
अलभत परां वृद्धिं षष्ठे दिने नवयौवनं
स किल सकलं शास्त्रं शस्त्रं विवेद विभोरपि ॥, Ku. 11. 49.

(4) पृथ्वी.

340. If every foot consists of middle-heavy, last-heavy, middle-heavy, last-heavy, first-light, light and heavy, *i. e.* **121 112 121 112 12212**, it is called पृथ्वी. Pause at every 8th and 17th syllable.

लभेत सिकतासु तैलमपि यत्नतः पीडयन्,
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन् शशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥, Nit. 2.

परिभ्रमसि किं वृथा क्वचन चित्त विश्राम्यताम्,
स्वयं भवति यद् यथा भवति नान्यथा तत् तथा ।
अतीतमपि न स्मरन्नपि च भाव्यं सङ्कल्पयन्,
अतर्कितगमागमाननुभवस्व भोगानिह ॥, Vai. 60.

प्रचण्डपरिपिण्डितः स्तिमितवृत्तिरन्तर्मुखः,
पिबन्निव मुहुर्मुहुर्झटिति मन्युरत्नैर्ज्वलन् ।
शिखाभिरिव निःसरन्ननुपलब्धदाहान्तरः
पयोधिमिव वाडवो दहति मामतन्त्रायताम् ॥, Vi. v. 26.

(5) अवितथ (नर्दटक, C. m. ; नर्कुटक, V. r.) ; कोकिलक.

341. If every foot consists of all-light, middle-heavy, first-heavy, two middle-heavies, light and heavy, *i. e.* **111 121 211 121 12112**, it is called अवितथ. According to V. r., pause at every 7th and 17th syllable: according to Hal*a*yudha and C. m. at every foot. If the pause is at every 8th, 13th and 17th syllable or according to V. r. and C. m. at every 7th, 13th and 17th, it is called कोकिलक. As a matter of fact, this metre admits different pauses according to the formation of the foot.

गरुडशिलारुचिः शरविपाण्डुरगण्डतलः,
पृथुभुजदण्डमण्डलकरालकृपाणलतः ।
नयनविलोभनोऽपि च बिभर्त्ति भयङ्करताम्
विटपनिषण्णमेचकफणीव पटीरतरुः ॥, Mar. v. 4.

अयमयमोहृशः प्रशमविश्वसनीयतनुः,
भुवनभयङ्करीः कथमधत्त रुषोऽपि मुनिः ।
स्थितमिदमेव वा स्वदुमनोज्ञतुषारतमाः,
तमसि सति ज्वलन्ति सहसैव महौषधयः ॥, An. 1. 49.

अमलकपालकाण्डकमनीयकपोलरुचेः, तरलसलीलनीलनलिनप्रतिफुल्लदृशः ।
विकसदशोकशोणकरकान्तिभृतः सुतनोः,
मदलुलितानि हन्त ललितानि हरन्ति मनः ॥, Pra. II. 19.

(6) वंशपत्रपतित or पतिता.

342. If every foot consists of first-heavy, middle-light, all-light, first-heavy, all-light, light and heavy,

i. e. **211 212 111 211 11112**, it is called **वंशपत्रपतित**. Pause at every 10th and 17th syllable.

दर्पणनिर्मलासु पतिते घनतिमिरमुषि,
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः ।
व्रीडमसम्मुखोऽपि रमणैरपहृतवसनाः,
काञ्चनकन्दरासु तरुणीरिह नयति रविः ॥ Si. iv. 67.

सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि,
क्षीणपयस्युपेयुषि भिदां जलधरपटले ।
खण्डितविग्रहं बलभिदो धनुरिह विविधाः,
पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥, Ki. v. 43.

(7) **अतिशायिनी**, P. h.

343. If every foot consists of two last-heavies, middle-heavy, first-heavy, middle-heavy and two heavies, *i. e.* **112 112 121 211 12122**, it is called **अतिशायिनी**. Pause at every 11th and 17 syllable.

इति धौतपुरन्ध्रिमत्सरान् सरसि मज्जनेन,
श्रियमाप्तवतोऽतिशायिनीमपमलाङ्गभासः ।
अवलोक्य तदैव यादवानपरवारिराशेः,
शिशिरेतररोचिषाप्यपां ततिषु मङ्क्तुमीषे ॥ Si. viii. 71.

(8) **हारिणी**, C. m.

344. If every foot consists of all-heavy, first-heavy, all-light, all-heavy, first-light, light and heavy, *i. e.* **222 211 111 222 122 12**, it is called **हारिणी**. Pause at every fourth, 10th and 17th syllable.

यस्या नित्यं श्रुतिकुवलये श्रोणालिनी लोचने,
रागः स्त्रीयोऽधरकिसलये लाक्षारसारञ्जनम् ।

गौरी कान्तिः प्रकृतिरुचिरा रम्याङ्गरागच्छटा,
सा कंसारेरजनि न कथं राधा मनोहारिणी ॥, C. m.

* (9) भाराक्रान्ता, C. m; कान्ता, V. r. n.

345. If every foot consists of all-heavy, first-heavy, all-light, middle-light, last-heavy, light and heavy, *i. e.* **222 211 111 212 112 12**, it is called भाराक्रान्ता. If the first syllable is light, it is called कान्ता. Pause at every 4th, 10th and 17th syllable.

भाराक्रान्ता मम तनुरियं गिरीन्द्रविधारणात्,
कम्पं धत्ते श्रमजलकणं तथा परिमुञ्चति ।
इत्यारम्भन् जयति जलदस्वनाकुलवल्लवी,—
संश्लेषोत्थं स्मरविलसितं विलोक्य गुरुं हरिः ॥ C. m.

*(10) हरि, V. r. n.

346. If every foot consists of two all-lights, all-heavy, middle-light, last-heavy, light and heavy *i. e.* **111 111 222 212 112 12**, it is called हरि.

*(11) चित्रलेखा no 2, V. r. n.

347. If every foot consists of two last-heavies, middle-heavy, first-heavy, middle-heavy, and two heavies, *i. e.* **112 112 121 211** 121 **22**, it is called चित्रलेखा.

* (12) पञ्चचामर, V. r. n.

348. If every foot consists of middle-heavy, middle-light, middle-heavy, middle-light, middle-heavy, heavy, and light, *i. e.* 121 212 121 212 12121, it is called पञ्चचामर.

Sec. XIV. Of 18 syllables (धृति).

349. If every foot consist of 18 syllables, it is called धृति.

(1) मन्दारमालिनी, M. n.; मन्दारमालिका, V. r. n.; सारका, V. r. c.; नाराच, C. m.; नाराचक, P. h.; लता, V. r. c.

350. If every foot consists of two all-lights and four middle-lights, *i. e.* 111 111 212 212 212 212, it is called नाराचक. Pause at every 10th and 18th syllable or at every foot.

कृतसकलजगद्विबोधोऽवधूतान्धकारोदयः,
क्षयितकुमुदतारकश्रीर्वियोगं नयन् कामिनः ।
बहुतरगुणदर्शनादभ्युपेताल्पदोषः कृती,
तव वरद करोतु सुप्रातमह्नामयं नायकः ॥, Si. xi. 67.

रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियाम्
प्रियसुहृदि विभीषणे संगमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥ R. 12. 104.

(2) सुधा, V. r. n.

351. If every foot consists of first-light, all-heavy, all-light, last-heavy, last-light, last-heavy, *i. e.* 122 222 111 112 221 112, it is called सुधा. Pause at every 6th, 12th and 18th syllable.

विसृष्टे विण्मूत्रे विशदकरणे देहे च सुलघौ,
विशुद्धे चोद्गारे हृदि सुविमले वाते च सरति ।
तथान्नश्रद्धायां क्षुदुपगमने कुक्षौ च शिथिले,
प्रदेयस्त्वाहारो भवति भिषजा कालः स तु मतः ॥ S*r*. vi. 64 ch. (l)

(3) कुसुमितलतावेल्लिता.

352. If every foot consists of all-heavy, last-light, all-light and three first-lights, *i. e.* **222 221 111 122 122 122**, it is called कुसुमितलतावेल्लिता. Pause at every 6th, 11th and 18th syllable.

क्रीडत्कालिन्दीललितलहरीवारिभि र्दीर्घिकाणां:,
वातैः खेलद्भिः कुसुमितलतावेल्लिता मन्दमन्दम् ।
भृङ्गालीगीतैः किसलयकरोल्लासितै र्लास्यलक्ष्मीं
तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार ॥ C. m.

(4) नन्दन, C. m.

353. If every foot consists of all-light, middle-heavy, first-heavy, middle-heavy and two middle-lights, *i. e.* 111 121 211 121 212 212, it is called नन्दन. Pause at every 11th and 18th syllable.

अजूत धनेश्वरस्य युधि यः समेतमायो धनं,
तमवङ्गमितो विलोकय विबुधैः कृतोत्तमायोधनम् ।
त्रिभवमदेव निष्कृतक्रियाऽतिमात्रसम्पन्नकं,
व्यथयति सत्पथादधिगताथ वेह सम्पन् न कम् ॥, B. x. 36.

Here in the third foot त before ष्क्रि is not regarded heavy under § 13.

(5) चित्रलेखा No3, C. m., V. r. n; चन्द्रलेखा, V. r. c.

354. If every foot consists of all-heavy, first-heavy, all-light and three first-lights, *i. e.* **222 211 111 122 122 122**, it is called चित्रलेखा. Pause at every 4th, 11th and 18th syllable. If the fourth syllable is light, it is

called so by V. r. c. It differs from the मन्दाक्रान्ता only in the additional light syllable after the 8th.

यच्छ्रेऽस्मिन् जगति जगद्दृशां सारदूपं यदासीत्,

आदाय्येदं व्रजयुवतिसमा वेधसा सा व्यधायि।

नैतादृक् चेत् कथमुदधिसुतामन्तरेणाच्युतस्य,

प्रीतं तस्यां नयनयुगमभूच्चित्रलेखाद्रुतायाम् ॥, C. m.

(6) शार्दूललित, C. m.

355. If every foot consists of all-heavy, last-heavy, middle-heavy, last-heavy, last-light and last-heavy, *i.e.* **222 112 121 122 221 112**, it is called शार्दूललित. Pause at every 12th and 18th syllable.

ज्ञात्वा कंसखगे पराक्रमविधं शार्दूललितं,

यच्चक्रे चितिभारकारिषु दूरं चैद्यप्रभृतिषु ।

सन्तोषं परमन्तु देहनिवहे त्रैलोक्यशरणं

श्रेयो नः स तनोत्वपारमहिमा लक्ष्मीप्रियतमः ॥, C. m.

* (7) शार्दूल, V. r. n.

356. If every foot consists of all-heavy, last-heavy, middle-heavy, last-heavy, middle-light and all-heavy, *i. e.* **222 112 121 112 212 222**, it is called शार्दूल.

* (8) हरिणप्लुत, V. r. n.

357. If every foot consists of all-heavy, last-heavy, two middle-heavies, first-heavy and middle-light, *i. e.* **222** 112 121 121 211 **212**, it is called हरिणप्लुत. Pause at every 4th, 9th and 18th syllable.

*(9) अश्वगति, V. r. n.

358. If every foot consists of five first-heavies and

last-heavy, *i. e.* **211 211 211 211 211 112**, it is called अश्वगति.

*(10) भ्रमरपदक, V. r. n.

359. If every foot consists of first-heavy, middle-light, three all-lights and last-heavy *i. e.* **211 212 111 111 111 112**, it is called भ्रमरपदक.

*(11) केसर, V. r. n.

360. If every foot consists of all-heavy, first-heavy, all-light, first-light and two middle-lights, *i. e.* **222 211 111 122 212 212**, it is called केसर. Pause at every 4th, 11th and 18th syllable.

* (12) चल, V. r. n.

361. If every foot consists of all-heavy, first-heavy, all-light, middle-heavy, first-heavy and middle-light, *i. e.* **222 211 111 121 211 212**, it is called चल. Pause at every 4th, 11th and 18th syllable.

* (13) लालसा, V. r. c.

362. If every foot consists of last-light, all-light and four middle-lights *i. e.* 221 **111** 212 212 212 **212**, it is called लालसा. Pause at every 9th and 18th syllable.

* (14) लता, V. r. c.

363. If every foot consists of two all-lights, middle-light, first-heavy and two middle-lights, *i. e.* **111 111 212 211 212 212**, it is called लता. Pause at every 10th and 18th syllable.

* (15) सिंहविस्फूर्जित, V. r. c.

364. If every foot consists of middle-light, all-heavy, first-heavy, all-heavy and two middle-lights, *i. e.* **212 222 211 222 212 212**, it is called सिंहविस्फूर्जित. Pause at every 5th, 11th and 18th syllable.

* (16) हरनर्त्तन, V. r. c.; विबुधप्रिया, V. r. c.

365. If every foot consists of middle-light, last-heavy, two middle-heavies, first-heavy and middle-light, *i. e.* **212 112 121 121 211 212**, it is called हरनर्त्तन. Pause at every 8th, 13th 18th syllable.

*(17) दीर्घक्रीड़चक, V. r. c.

366. If every foot consists of six first-lights, *i. e.* **122 122 122 122 122 122**, it is called दीर्घक्रीड़चक.

* (18) चीरक, V. r. c.

367. If every foot consists of first-heavy, last-heavy, all-light, middle-heavy, all-light and middle-light *i. e.* **211 112 111 121 111 212**, it is called चीरक.

Sec. xv. Of 19 syllables (अतिधृति).

368. If every foot consists of 19 syllables, it is called अतिधृति.

(1) शार्दूलविक्रीडित.

369. If every foot consists of all-heavy, last-heavy middle-heavy, last-heavy, two last lights and heavy successively, *i. e.* 222 112 **121 112** 221 **221** 2, it is called शार्दूलविक्रीडित. Pause at every 12th and 19th syllable. This is one of the most important metres in the language and best fitted for grand description.

चञ्चत्पञ्चशिखण्डमण्डलमसौ मुग्धप्रगल्भः शिशुः,
गम्भीरश्च मनोहरश्च सहजश्रीलक्ष्म रूपं दधत् ।
द्रागदृष्टोऽपि हरत्ययं मम मनः सौन्दर्यसारश्रिया,
हन्तव्यस्तु तथापि नाम धिगहो वीरव्रतक्रूरताम् ॥, Vi. II. 31.

कर्णाभ्यर्णविदीर्णवक्त्रविकटव्यादानदीप्ताग्निभिः,
दंष्ट्राकोटिविसङ्कटैरित इतो धावद्भिराकीर्यते ।
विद्युत्पुञ्जनिकाशकेशनयनभ्रूश्मश्रुजालैर्नभः,
लघ्वालग्नविमुक्तदीर्घवपुषामुल्कामुखानां मुखैः ॥, Ma. 5. 13.

उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः,
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिताः ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथो यथायं तथा,
प्रायः प्रेङ्खदसङ्ख्यशङ्खधवला वेलेयमागच्छति ॥, Na. 4. 52.

(2) विस्मिता, P. h ; मेघविस्फूर्जिता, C. m.

370. If every foot consists of first-light, all-heavy, all-light, last-heavy, two middle-lights and heavy, *i. e.* 122 222 111 112 212 212 2, it is called मेघविस्फूर्जिता. Pause at every 6th, 12th and 19th syllable.

(*a.*) श्रिया जुष्टं दिव्यैः सपटहरवैरन्वितं पुष्पवर्षैः,
वपुष्टश्चैद्यस्य च्युतमृषिगणैः स्तूयमानं निरीय ।
प्रकाशेनाकाशे दिनकरकरान् विक्षिपद् विस्मिताक्षैः,
नरेन्द्रैरौपेन्द्रं वपुरथ विशद् धाम वीक्षाम्बभूवे ॥, Si. xx. 79.

(*b.*) उदञ्चत्कावेरीलहरिषु परिष्वङ्गरङ्गे लुठन्तः,
कुहूकण्ठीकण्ठीरवरवलवत्रासितप्रोषितेभाः ।
अमी चैत्रे मैत्रावरुणितरुणीकेलिकङ्केलिमीत्र,-
चलद्वल्लीहल्लीसकसुरभयश्चण्ड चञ्चन्ति वाताः ॥, C. m.

(3)

371. In the following metre every foot consists of six last-heavies and heavy, *i. e.* 112 112 112 112 112 1122.

कमलावलिहारिविकासविशेषवहं जनकाङ्क,
न न गामिकरं द्विविसारमनारमणं जरितानाम् ।
तमसां वलहानिविलासवरोऽनवरं जनकान्त,
न नमामि चिरं सवितारमनादिमहं जगतां न ॥, sar. p. 123. l. 14.

(4) सुमधुरा, M*r*. c.

372. If every foot consists of all-heavy, middle-light, first-heavy, all-light, all-heavy, all-light and heavy, *i. e.* 222 212 211 111 222 1112, it is called सुमधुरा. Pause at every 7th, 13th and 19th syllable. It differs from सुरसा only in the 13th syllable.

वेदार्थान् प्राकृतस्त्वं वदसि नच ते जिह्वा निपतिता,
मध्याह्ने वीक्षसेऽर्कं न तव सहसा दृष्टि र्विचलिता ।
दीप्ताग्नौ पाणिमन्तः क्षिपसि स च ते दग्धो भवति नो,
चारित्र्याच्चारुदत्तं चलयसि न ते देहं हरति भूः ॥, M*r*. ix. 21.

* (5) सुरसा, C. m.

373. If every foot consists of all-heavy, middle-light, first-heavy, all-light, first-light, all-light and heavy, *i. e.* 222 212 211 111 122 1112, it is called सुरसा. Pause at every 7th, 13th and 19th syllable.

कामक्रीड़ासतृष्णो मधुसमयसमारम्भरभसात्,
कालिन्दीकूलकुञ्जे विहरणकुतुकाकृष्टहृदयः ।
गोविन्दो बल्लवीनामधररससुधां प्राप्य सुरसां
भङ्क्ते पीयूषपानैः प्रचयकृतसुखं व्यस्मरदसौ ॥, C. m.

* (6) फुल्लदाम, C. m. ; पुष्पदाम, V. r. n.

374. If every foot consists of all-heavy, last-light, all-light, last-heavy, two middle-lights and heavy, *i. e.* 222 221 111 112 212 2122, it is called पुष्पदाम. Pause at every 5th, 12th and 19th syllable.

प्रध्वस्तश्लोकानां प्रकटितकदनं ध्वस्तमालोक्य कंसं
फुल्यन्त्वेतोभिश्चिद्दिववसतिभि र्व्योमसंस्थै र्विमुक्तम् ।
मुग्धामोदेन स्थगितदशदिगाभोगमाहूतभृङ्गं,
मौलौ दैत्यारे र्न्यपतदनुपमं स्वस्तरोः फुल्लदाम ॥, C. m.

* (7) छाया, C. m, V. r. n.

375. If every foot consists of first-light, all-heavy, all-light, last-heavy, two last-lights and heavy, *i. e.* 122 222 111 112 221 2212, it is called छाया. Pause at every 6th, 12th and 19th syllable.

अभीष्टं जुष्टो यो वितरति लसद्दोश्चारुशाखोज्ज्वलः,
स्फुरन्नानारत्नस्तबकिततनुश्चित्रांशुकालम्बितः ।
न यस्याङ्घ्रेश्छायामुपगतवतां संसारतीव्रातपः,
तनोति प्रोत्तापं जयति जगतां कंसारिकल्पद्रुमः ॥, C. m.

*(8) मकरन्दिका V. r. n.

376. If every foot consists of first-light, all-heavy, all-light, last-heavy, two middle-heavies and heavy *i. e.* 122 222 111 112 121 1212, it is called मकरन्दिका.

*(9) मणिमञ्जरी, V. r. n.

377. If every foot consists of first-light, first-heavy, all-light, first-light, two middle-heavies and heavy, *i. e.* 122 211 111 122 121 1212, it is called मणिमञ्जरी.

*(10) समुद्गतता, V. r. n.

378. If every foot consists of middle-heavy, last-heavy, middle-heavy, last-heavy, last-light, first-heavy and heavy, *i. e.* **121** 112 121 112 221 2112, it is called समुद्गतता.

*(11) पञ्चचामर, V. r. n.

379. If every foot consists of 7 lights and alternate light and heavy, *i.e.* 111 111 112 121 212 **1212**, it is called पञ्चचामर.

*(12) विम्ब, V. r. n.

380. If every foot consists of all-heavy, last-light, all-light, last-heavy, two last-lights and heavy *i. e.* 222 221 111 112 221 2212, it is called विम्ब. Pause at every 5th, 12th, and 19th syllable.

Sec. xvi. Of 20 syllables (कृति).

381. If every foot consists of 20 syllables, it is called कृति.

(1) सुवदना.

382. If every foot consists of of all-heavy, middle-light, first-heavy, all-light, first-light, first-heavy, light and heavy, *i. e.* 222 212 211 111 122 211 12, it is called सुवदना. Pause at every 7th, 18th and 20th syllable.

उत्तुङ्गात्तुङ्गकूलं स्रुतमदसलिलाः प्रस्यन्दिसलिलं,
श्यामाः श्यामोपकण्ठद्रुममलिमुखराः कल्लोलमुखरम् ।
स्रोतःखातावसीदत्तटमुरुदशनैरुत्सादिततटाः,
शोणं सिन्दूरशोणा मम गजपतयः पास्यन्ति शतशः ॥, Mu. iv. 16.

(2) वृत्त.

383. If every foot consists of alternate heavy and light syllables, it is called वृत्त. Pause at every foot.

ताव बुद्धि ताव सुद्धि ताव दाण ताव माण ताव गव्व,
जाव जाव हत्थ सव्व पञ्च विज्ज,रेह रङ्ग एक्क दव्व ।
एत्थ अन्त अप्प दोस देउ दोस होइ पट्ठ सट्ठ दव्व,
कोइ बुद्धि कोइ सुद्धि कोइ दाण कोइ माण कोइ गव्व ॥, Pra. II. 200.

(3) गीतिका, C. m.

384. If every foot consists of last-heavy, two middle-heavies, first-heavy, middle-light, last-heavy, light and heavy, *i. e.* 112 121 121 211 212 112 12, it is called गीतिका. Pause at every foot.

करतालचञ्चलकङ्कणस्वनमिश्रणेन मनोरमा,
रमणीयवेणुनिनादरङ्गिमसङ्गमेन सुखावहा ।
बहुलानुरागनिवासरासससमुद्भवा तव रागिणं,
विदधौ हरिं खलु बल्लवीजनचारुचामरगीतिका ॥, C. m.

(4) शोभा, C. m; V. r. n.

385. If every foot consists of first-light, all-heavy, two all-lights, two last-lights and two heavies, *i. e.* 122 222 111 111 221 221 22, it is called शोभा. Pause at every 6th, 13th and 20th syllable.

सदा पूष्णुन्मीलत्सरसिजयुगला मध्यनम्रा फलाभ्यां,
तयोरूर्ध्वं राजत्तरलकिसलयाश्लिष्टसुस्निग्धशाखा ।
लसन्मुक्तारक्तोत्पलकुवलयवच्चन्द्रबिम्बाञ्चिताग्रा,
महाशोभा मौलौ मिलदलिपटलैः कृष्णा सा कापि वल्ली ॥, C. m..

*(5) सुवंशा, V. r. n.

386. If every foot consists of all-heavy, middle-light, first-heavy, all-light, two last-heavies, and two-heavies, *i. e.* 222 212 211 111 112 112 22, it is called सुवंशा.

(6) मत्तेभविक्रीडित, V. r. c.

387. If every foot consits of last-heavy, first-heavy, middle-light, all-light, all-heavy, first-light, light and heavy, *i. e.* 112 211 212 111 222 122 12, it is called मत्तेभविक्रीडित. Pause at every 13th and 20th syllable.

Sec. xvii. Of 21 syllables (प्रकृति).

388. If every foot consists of 21 syllables, it is called प्रकृति.

(1) स्रग्धरा.

389. If every foot consists of all-heavy, middle-light, first-heavy, all-light, and three first-lights, *i. e.* 222 212 211 111 122 122 122, it is called स्रग्धरा. Pause at every 7th syllable. This is one of the best metres in the language and fitted for grand and terrific descriptions. This is the metre of the S*u*rya Shataka.

(*a*) उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसन्तानरोषात्,
उद्दामस्यैकविंशत्यवधि विशसतः सर्वतो राजवंश्यान्।
पित्र्यं तद्रक्तपूर्णह्रदसवनमहानन्दमन्दायमान-
क्रोधाग्निं कुर्वतो मे न खलु न विदितः सर्वभूतैः स्वभावः॥, Vi. 2. 48.

(*b*) दीप्तवृद्धेगयोगाद्वदनलकुहरश्लिष्टजिह्वाग्रलीढ,—
प्रह्यग्रग्रासखण्डविन्दुः प्रबलतरभवज्जाठराग्निस्फुलिङ्गाम्।

कालीं कङ्कालशेषामतुलगलवलन्मुण्डमालाकरालां

गुञ्जासंवादिनेत्रामजिननिवसनां नौमि पाशासिहस्ताम् ॥ Shar.

(*c*) प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ,

दष्टो नष्टो विवेकः सुतधनयुवतीस्वादुसौख्ये निषण्णः ।

शैवे चिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं,

क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥, Apar. 5.

(2) धृतश्री, V. r. n. ; शशिवदना, P. h. ; पञ्चकावली, M. n. सरसी, C. m; सलिलनिधि, V. r. c; सिद्धक (some in V. r. n.)

390. If every foot consists of all-light, middle-heavy, first-heavy, three middle-heavies and first-light *i. e.* 111 121 211 212 212 212 122, it is called धृतश्री. Pause varies, either at every foot or at every 11th or 12th and 21st syllable.

तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः,

प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता ।

परिचलतो बलानुजबलस्य पुरः सततं धृतश्रियः,

चिरविगतश्रियः सलिलनिधेश्च तदाभवदन्तरं महत् ॥, Si. III. 82.

In the last foot, the third measure is 2111, instead of 211. Hence some read जल for सलिल, P. h.

Sec. xviii. Of 22 syllables, (आकृति)

391. If every foot consists of 22 syllables, it is called आकृति.

(1) मद्रक ; भद्रक, V. r.

392. If every foot consists of first-heavy, middle-light, all-light, middle-light, two last-heavies all-light, and heavy *i. e.* 211 212 111 212 112 112 1112,

it is called मद्रक. Pause at every 11th and 22nd syllable.

मद्रकगीतिभिः सकृदपि स्तुवन्ति भवाय भवन्तमभवं,
भक्तिभरावनम्रशिरसः प्रणम्य तव पादयोः सुकृतिनः ।
ते परमेश्वरस्य पदवीमवाप्य सुखमाप्नुवन्ति विपुलं,
मर्त्यसुखं स्पृशन्ति न पुनर्मनोहरसुराङ्गनापरिवृताः ॥, P. h.

(2) मदिरा, C. m.; V. r. n.

393. If every foot consists of seven first-heavies and heavy, *i. e.* 211 211 211 211 211 211 2112, it is called मदिरा. Pause at every foot.

माधवमासि विकस्वरकेसरपुष्पलसन्मदिरामुदितैः,
भृङ्गकुलैरुपगीतवने वनमालिनमालि कलानिलयम् ।
कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसं,
तं भज माधविकाम्बुदनर्तनयामुनवाततलोपगमा ॥, C. m.

(3) हंसी, C. m.

394. If every foot consists of two all-heavies, last-light, three all-lights, last-heavy and heavy, *i. e.* 222 222 221 111 111 111 1122, it is called हंसी. Pause at every 8th and 22nd syllable.

सार्धं कान्तेनैकान्तेऽसौ विकचकमलमधु सुरभि पिबन्ती,
कामक्रीडाकूतस्फीतप्रमदसरसतरमलघु रसन्ती ।
कालिन्दीये पद्माकरे पवनपतनपरितरलपरागे,
कंसाराते पश्य स्वैरं सरभसगतिरिह विलसति हंसी ॥, C. m.

* (4) महास्रग्धरा, V. r. c.

395. If every foot consists of last-heavy, middle-heavy, last-light, all-light, last-heavy, two middle-lights

and heavy, *i. e.* **112 121 221 111 112 212** 2122, it is called महास्रग्धरा. Pause at every 8th, **15th** and **22nd** syllable.

*(5) लालित्य, V. r. c.

396. If every foot consists of all-heavy, last-heavy, middle-light, last-heavy, last-light, middle-heavy, all-light and heavy, *i. e.* 222 112 **212 112 221 121 1112,** it is called लालित्य.

Sec. xix. Of 23syllables (विकृति)

397. If every foot consists of 23 syllables, it is called विकृति.

(1) अश्वललित; अद्रितनया, C. m.

398. If every foot consists of all-light, middle-heavy, first-heavy and middle-heavy repeated, first-heavy, light and heavy, *i. e.* **111 121 211 121 211 121 211 12**, it is called अश्वललित. Pause at every **23rd** syllable.

विधुलितपुष्परेणुकपिशं प्रशान्तकलिकापलाशकुसुमं
कुसुमनिपातविचित्रवसुधं सशब्दनिपतद्द्रुमोत्कशकुनम् ।
शकुननिनादनादितककुब्विलोलविपलायमानहरिणं,
हरिणविलोचनाधिवसतिं बभञ्ज पवनात्मजो रिपुवनम् ॥ B. 8. 131.

In the second foot, the third measure is **1211** insted of **211.** Hence some read चित्र for विचित्र.

(2)

399. Every foot may consist of **21** light and **2** heavy syllables (or heavy and light) as in the following verse

of my own. Pause at 6th, 12th, 18th and 23rd syllable.

त्रिपुरमथन मदनदहन गरलगिलन भुजगभूष,
पवनभवन शमनसदन वरणभरण नरगराज।
अमितविजय निहितविजय विजयविजय विजयमूल,
प्रणतविनत सदयहृदय सफलय मम यतनमीश॥

(3) मत्ताक्रीडा (वाजिवाहन, some in V. r. n.).

400. If every foot consists of two all-heavies, last-light, four all lights, light and heavy *i. e.* **222 222 211 111 111 111 111 12**, it is called मत्ताक्रीडा. Pause at every 8th, 13th and 23rd syllable.

छन्दं मद्यं पीत्वा नारी स्खलितगतिरतिशयरसिकहृदया,
मत्ता क्रीडालोलैरङ्गैर्मुदमखिलविटजनमनसि कुरुते।
वीतव्रीडास्त्रीलालापैः श्रवणसुखसुभगसुललितवचना
दत्तैत्र गीतैर्भ्रूविक्षेपैः कलमणितविविधविहगकुलरुतैः॥, P. h.

*(4) सुन्दरिका, V. r. c.

401. If every foot consists of two last-heavies, first-heavy, last-heavy, last-light, two middle-heavies, light and heavy, *i. e.* **112 112 211 112 221 121 121 12**, it is called सुन्दरिका.

Sec. xx. Of 24 syllables (संकृति)

402. If every foot consists of 24 syllables, it is called संकृति.

(1) तन्वी.

403. If every foot consists of first-heavy, last-light, all-light, last-heavy, two first-heavies, all-light and first-light *i. e.* **211 221 111 112 211 211 111 122**,

it is called तन्वी. Pause at every 5th, 12th and 24th syllable.

चन्द्रमुखी सुन्दरघनजघना कुन्दसमानशिखरदशना या,
निष्कलवीणाश्रुतिसुखवचना करकुरङ्गतरलनयनान्ता ।
निर्मुखपीनोन्नतकुचकलसा मत्तगजेन्द्रललितगतिभावा,
निर्भरलीला त्रिभुवनविषये मुञ्जनरेन्द्र भवतु तव तन्वी ॥, P. h.

*(2) किरीट, V. r. c.

404. If every foot consists of eight first-heavies, *i. e.* 211 211 211 211 211 211 211 211, it is called किरीट.

*(3) दुर्मिल, V. r. c.

405. If every foot consists of eight last-heavies, *i. e.* 112 112 112 122 112 112 112 112, it is called दुर्मिल.

Sec. xxi. Of 25 syllables (अभिकृति).

406. If every foot consists of 25 syllables, it is called अभिकृति.

(1) क्रौञ्चपदा.

407. If every foot consists of first-heavy, all-heavy, last-heavy, first-heavy, four-all-lights and heavy *i. e.* 211 222 112 211 111 111 111 1112, it is called क्रौञ्चपदा. Pause at every 5th, 10th, 18th and 25th syllable.

या कपिलाक्षी पिङ्गलकेशी कलिरुचिरनुदिनमनुनयकठिना,
दीर्घतराभिः स्थूलशिराभिः परिवृतवपुरतिशयकुटिलगतिः ।
आयतजङ्घा निम्नकपोला लघुतरकुचयुगपरिचितहृदया,
सा परिहार्या क्रौञ्चपदा स्त्री ध्रुवमिह निरवधि सुखमभिलषता ॥, P. h.

Sec. xxii. Of 26 sylables (उत्कृति).

408. If every foot consists of 26 syllables, it is called उत्कृति.

(1) भुजङ्गविजृम्भित.

409. If every foot consists of two all-heavies, last-light, three all-lights, middle-light, last-heavy, light and heavy, *i. e.* **222 222 221 111** 111 **111 212 112 12**, it is called भुजङ्गविजृम्भित. Pause at every 8th, 19th and 26th syllable.

स्थूलं दत्से सूक्ष्मं धत्से
भुवि भवसि नभसि रमसे रमे दिवि मोदसे,
छिन्त्से वाढं भिन्त्से गाढं
रुषि मिषसि धनुषि मनुषे जये पुरि जृम्भसे।
स्वल्पं प्रेषे कल्पं प्रेषे
चिति चरसि यशसि यतसे चले युधि गल्भसे,
ब्रूषे वामं स्तूषे कामं
हृदि विशसि वचसि सचसे रुचे दृशि दीप्यसे ॥, sar. p. 128. l. 11.

ध्यानैकाग्रा लब्धा दृष्टिः कमलमुखि लुलितमलकं करे स्थितमाननं,
चिन्तासक्ता शून्या बुद्धिर्हिरदगति पतितरसना तनुस्तनुतां गता।
पाण्डुच्छायं क्षामं वक्त्रं मदजननि रहसि सरसां करोषि न सङ्कथां,
को नामायं रम्यो व्याधि-
स्तव कथय सुतनु किमिदं न खल्वसि नातुरा ॥, P. h.

(2) अपवाहक.

410. If every foot consists of all-heavy, six all-lights, last-heavy and two heavies, *i. e.* **222 111 111 111**

111 111 111 112 22, it is called अपवाहक. Pause at every 9th, 15th, 21st and 26th syllable.

श्रीकण्ठं त्रिपुरदहनममृतकिरणसकलकलितशिरसं रुद्रं,
भूतेशं हतमुनिमखमखिलभुवननमितचरणयुगमीशानम् ।
सर्वज्ञं वृषभगमनमहिपतिकृतवलयरुचिरकरमाराध्यं,
तं वन्दे भवभयभिदमभिमतफलवितरणगुरुमुमया युक्तम् ॥, P. h.

(3)

411. In the following metre, every foot consists of all-light, middle-heavy, first-heavy, three middle-heavies, first-heavy, middle-heavy, light and heavy, *i. e.* 111 121 211 121 121 121 211 121 12.

नखमुखपाणिकण्ठचिकुरै र्गतिभिः सहसा स्मितेन ललितेषुदृशा,
मणिमणिपद्मकम्बु,चमराः करिणः सुतनोः सुधावहसिता हरिणः ।
फणिगणसिद्धसाध्यदयिता न समाः सकलाश्चया च सभुवश्छलिताः,
तव बलरूपदर्पविजिता
नितरां विबुधाश्चिराय चरितैश्चतुरैः ॥, sar. p. 117. l. 11.

Sec. xxiii. Of 29 syllables.

412. In the following metre, every foot consists of all-heavy, last-light first-light, last-light, three all-lights, middle-light, last-heavy, light and heavy, i. e. 222 221 122 221 111 111 111 212 112 12.

वन्द्या देवी पर्वतपुत्री नित्यं मधुमधुरकमलवदना पुरन्ध्र्यधिदेवता,
देवैः स्तुत्या किन्नरगेया भक्त्या वरचरितमहिषमथनी जगत्त्रयनायिका ।
सिद्धैर्ध्येया केशरियाना काम्या रणचतुररसिकहृदया त्रिलोचनवल्लभा,
शौरैः पूज्या दर्पणपाणि-
र्नूत्रमं गुणनिलयलटःललिता सतीषु धुरन्धरा ॥ sar. p. 127. l. 4.

Sec. xxiv. Proper दण्डक.

(1) चण्डवृष्टिप्रपात.

413. If every foot consists of two all-lights and seven middle-lights, *i. e.* 111 111 212 212 212 212 212 212 212, it is called चण्डवृष्टिप्रपात.

प्रलयघनघटामहारम्भमेघावलीचण्डवृष्टिप्रपाताकुलं गोकुलं,
सपदि समवलोक्य सव्येन हस्तेन गोवर्द्धनं नाम शैलं दधल्लीलया।
कमलनयन रक्ष रक्षेति गर्जत्सुमुग्धगोपाङ्गनालिङ्गनानन्दित:,
गलदभिनवधातुधाराविचित्राङ्गरागो मुरारातिरस्तु प्रमोदाय न:॥ C. m.

(2) अर्ण.

414. If it consists of two all-lights and eight middle-lights, *i. e.* 111 111 212 212 212 212 212 212 212 212, it is called अर्ण. Pause at every foot.

प्रथमकथितदण्डकश्चण्डवृष्टिप्रपाताभिधानो मुने: पिङ्गलाचार्यनाम्नो मत:,
प्रचित इति तत: परं दण्डकानामियं जातिरेकैकरेफाभिवृद्ध्या यथेष्टं भवेत्।
स्वरुचिरचितसंज्ञया तद्विशेषैरशेषै: पुन: काव्यमन्येऽपि कुर्वन्तु वागीश्वरा:,
भवति यदि समानसङ्ख्याक्षरै
र्यत्र पादव्यवस्था ततो दण्डक: पूज्यतेऽसौ जनै:॥ P. h.

* (3) अर्णव.

415. If every foot consists of two all-lights and nine middle-lights, it is called अर्णव.

* (4) व्याल.

416. If every foot consists of two all-lights and ten middle-lights, it is called व्याल.

* (5) जीमूत.

417. If every foot consists of two all-lights and

eleven middle-lights, it is called जीमूत.

* (6) लीलाकर.

418. If every foot consists of two all-lights and twelve middle-lights, it is called लीलाकर.

* (7) उद्दाम.

419. If every foot consists of two all-lights and thirteen middle-lights, it is called उद्दाम.

* (8) शङ्ख.

420. If every foot consists of two all-lights and fourteen middle-lights, it is called शङ्ख.

* (9) आराम, V. r. n.

421. If every foot consists of two all-lights and fifteen middle-lights, it is called आराम.

* 10 संग्राम, V. r. n.

422. If every foot consists of two all-lights and sixteen middle-lights, it is called संग्राम.

प्रचलितकरिकृत्तिपर्यन्तचञ्चन्नखाघातभिन्नेन्दुनिष्यन्दमानामृत,—
श्चोतजीवत्कपालावलीमुक्तचण्डाट्टहासत्रसद्भूरिभूतप्रवृत्तस्तुति,
श्वसदसितभुजङ्गभोगाङ्गदग्रन्थिनिष्पीडनस्फारफुल्लत्फणापीठनिर्यद्विषज्योति—
रुज्जृम्भणोड्डामरव्यस्तविस्तारिदोःखण्डपर्यासितक्ष्माधरम् ।
ज्वलदनलपिशङ्गनेत्रच्छटाच्छन्नभीमोत्तमाङ्गभ्रमिप्रस्रुतालातचक्रक्रिया—
कृतदिग्भागतुङ्गखट्वाङ्गकोटिध्वजोद्धूतिविक्षिप्ततारागणं,
प्रमुदितकटपूतनोत्तालवेतालतालस्फुटत्कर्णसम्भ्रान्तगौरीघनाश्लेष—
हृष्यन्मनस्त्र्यम्बकानन्दि वस्ताण्डवं देवि भूयादभीष्ट्यै च हृष्ट्यै च नः ॥,

Ma. 5. 23.

* (11) सुराम, V. r. n.

422. If every foot consists of two all-lights and seventeen middle-lights, it is called सुराम.

* (12) वैकुण्ठ, V. r. n.

423. If every foot consists of two all-lights and eighteen middle-lights, it is called वैकुण्ठ.

* (13) सोत्कण्ठ, V. r. n.

424. If every foot consists of two all-lights and nineteen middle-lights, it is called सोत्कण्ठः

*(14) सार, V. r. n.

425. If every foot consists of two all-lights and twenty middle-lights, it is called सार.

*(15) कासार, V. r. n.

426. If every foot consists of two all-lights and twenty-one middle-lights, it is called कासार.

* (16) विस्तार, V. r. n.

427. If every foot consists of two all-lights and twenty-two middle-lights, it is called विस्तार.

* (17) संहार, V. r. n.

428. If every foot consists of two all-lights, and twenty-three middle-lights, it is called संहार.

*(18) नीहार, V. r. n.

429. If every foot consists of two all-lights and twenty-four middle-lights, it is called नीहार.

*(19) मन्दार, V. r. n.

430. If every foot consists of two all-lights and

twenty-five middle-lights, it is called मन्द्दार.

*(20) केद्दार, V. r. n.

431. If every foot consists of two all-lights and twenty-six middle-lights, it is called केद्दार.

*(21) साधार

432. If every foot consists of two all-lights, and twenty-seven middle-lights, it is called साधार.

*(22) सत्कार

333. If every foot consists of two all-lights, and twenty-eight middle-lights, it is called सत्कार.

*(23) संस्कार, V. r. n.

434. If every foot consists of two all-light and twenty-nine middle-lights, it is called संस्कार.

*(24) माकन्द

435. If every foot consists of two all-lights and thirty middle-lights,, it is called माकन्द.

*(25) गोविन्द

436. If every foot consists of two all-lights and thirty-one middle-lights, it is called गोविन्द.

* (26) सानन्द, V. r. n.

437. If every foot consists of two all-lights and thirty-two middle-lights, it is called सानन्द.

* (27) सन्दोह, V. r. n.

438. If every foot consists of two all-lights and 33 middle-lights, it is called सन्दोह.

(28) नन्दा, V. r. n.

439. If every foot consists of two all-lights and 34 middle-lights, it is called नन्दा.

Sec. xxv. Other दण्डक's.

(1) प्रचितक, V. r., C. m.; सिंहविक्रान्त.

440. If every foot consists of two all-lights and seven first-lights, it is called प्रचितक.

मुरहर यदुकुलाम्भोधिचन्द्र प्रभो देवकीगर्भरत्न त्रिलोकैकनाथ,
प्रचितकपटसुरारिव्रजोद्दामदन्तावलस्तोमविद्रावणे केशरीन्द्र।
चरणनखरसुधांशुच्छटोन्मेषनिःशेषितध्यायिचेतोनिविष्टान्धकार,
प्रणतजनपरितापोग्रदावानलच्छेदमेघ प्रसीद प्रसीद प्रसीद॥, C. m.

441. If it consists of eight or more first-lights, it is called सिंहविक्रान्त.

(2) कुसुमस्तवक, c. m.

442. If every foot consists of nine or more last-heavies, it is called कुसुमस्तवक.

विरराज यदीयकरः कनकद्युतिबन्धुरवामहस्तः कुचकुड्मलगः,
भ्रमरप्रकरेण यथावृतमूर्त्तिरशोकलताविलसत्कुसुमस्तवकः।
स नवीनतमालदलप्रतिमच्छवि बिभ्रदतीव विलोचनहारि वपुः
चपलारुचिरांशुकवल्लिधरो हरिरस्तु मदीयहृदम्बुजमध्यगतः॥ C. m.

(3) मत्तमातङ्गलीलाकर, C. m.

443. If every foot consists of nine or more middle lights, it is called मत्तमातङ्गलीलाकर.

हेमगौरे वसानोंऽशुके शक्रनीलासिते वर्ष्मणि स्पष्टदिव्यानुलेपाङ्कितः,
तारहारांशुवच्चानभश्चित्रमालाञ्चितो भव्यभूषोज्ज्वलाङ्गः समं सीरिणा।
अञ्जनाभाम्बरेणेन्दुकुन्दाभदेहेन लीलापरीहासहासोर्मिकौतूहलैः,

कंसरङ्गाङ्गिगः पातु नश्चक्रपाणि र्गतिक्रीडया मत्तमातङ्गलीलाकरः ॥ C. m.

(4) अनङ्गशेखर, C. m.

444. If every foot consists of alternate light and heavy syllables to the number 27 or more, it is called अनङ्गशेखर.

उदेत्यसौ सुधाकरः पुरो विलोकयाद्य राधिके विजृम्भमाणगौरदीधितिः,
रतिस्वहस्तनिर्मितः कलाकुतूहलेन चारुचम्पकैरनङ्गशेखरः किमु ।
इति प्रमोदकारिणीं प्रियाप्रसादलक्षणां गिरं समुद्गिरन् मुरारिरङ्गतां,
प्रदोषकालसङ्गमोल्लसन्मना मनोज्ञकेलिकौतुकी करोतु नः कृतार्थतां ॥, C. m.

(5) अशोकमञ्जरी.

445. If every foot consists of alternate heavy and light syllables to the number 27 or more. , it is called अशोकमञ्जरी.

मूर्द्धि चारुचम्पकस्रजा सलीलवेष्टनं लसल्लवङ्गचारुचन्द्रिका कचेषु,
कर्णयोरशोकपुष्पमञ्जरीवतंसको गले च कान्तकेशरोपकॢप्तदाम ।
फुल्लनागकेशरादिपुष्परेणुकञ्चपं तनौ विचित्रमित्थ्रुपात्तवेश एषः,
केशवः पुनातु नः सुपुष्पभूषितः स मूर्तिमानिवागतो मधु र्विहर्तुमत्र ॥, C. m.

(6) सिंहविक्रीड़, V. r. c. ; सिंहविक्रान्त, V. r. n.

446. If every foot consists of nine or more first-lights, it is called सिंहविक्रीड़.

यकारैः कवीच्छानुरोधान् निबद्धैः,
प्रसिद्धो विशुद्धोऽपरो दण्डकः सिंहविक्रीड़नामा । V. r. c.

CHAP. II. Semi-even and uneven metres.

447. There is no end of semi-even and uneven metres. The classical writers use only a few varieties, but many more are found in the older writers.

Sec. I. Ordinary अनुष्टुप् (श्लोक, Sru.).

448. The most important uneven metre is the ordinary अनुष्टुप्. In this metre, the last four syllables should be 1212 in the even feet and 1222 in the odd feet and no foot can begin in all-light. Pause at every foot.

(*a*) वज्रादपि कठोराणि, मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि, को हि विज्ञातुमर्हति ॥ U. 2. 7.

(*b*) यस्तु सर्वाणि भूतानि, आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं, ततो न विजुगुप्सते ॥, i. u. 6.

(*c*) इन्द्रियेभ्यः परा ह्यर्थाः, अर्थेभ्यश्च परं मनः ।
मनसश्च परा बुद्धिः, बुद्धेरात्मा महान् परः ॥ k. u. 3. 10.

449. Our best writers, however, occasionally transgress this rule, as in (a). Some of the prosodists set down these irregularities as distinct varieties (V. r. n. p. 54-5)

Sec. II. वियोगिनी, M. n.; सुन्दरी, C. m. (10, 11).

450. When the odd feet consist of ten syllables = 112 112 121 2 and the even feet eleven syllables each = 112 211 212 12, it is called वियोगिनी. This metre is best fitted for pathetic description. It is used in the 4th canto of Ku, 8th canto of R, 16th of Si and 2nd of Ki and N.

शशिना सह याति कौमुदी, सह मेघेन तडित् प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति, प्रतिपन्नं हि विचेतनैरपि ॥, Ku. iv. 33.

समदुःखसुखः सखीजनः, प्रतिपच्चन्द्रनिभोऽयमात्मजः ।
अहमेकरसस्तथापि ते, व्यवसायः प्रतिपत्तिनिष्ठुरः ॥, R. 8. 65.

सहसा विदधीत न क्रियाम्, अविवेकः परमापदाम्पदम्।
वृणते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव सम्पदः ॥, Ki. II. 30.

Sec. iii. पुष्पिताग्रा. (12, 13).

451. If the odd feet consist of twelve syllables =111 111 212 122 and the even feet consist of 13 syllables=111 121 121 212 2, it is called पुष्पिताग्रा. Pause at every foot. This metre is fitted for gay description. It is the metre of the 7th canto of Si and 10th canto of Ki. (For प्रि, see § 13.)

धवक ककुभकदम्बनारिकेलैः,
कुरवककेतकजम्बुपाटलाभिः।
वटवरणकवत्सनाभबिल्वैः,
सरलकपित्थप्रियालशालतालैः ॥, m. xiii. 14. 46.

द्रुतविगमितविप्रयोगचिह्नाम्, अपि तनयां नृपतिः पदप्रपन्नाम्।
अकलयदसमाशुगाधिमग्नां,
झटिति पराशयवेदिनो हि विज्ञाः ॥ N. 4. 118.

कमलनयन वासुदेव विष्णो, धरणिधराच्युत शङ्खचक्रपाणे।
भव शरणमितीरयन्ति ये वै,
त्यज भट दूरतरेण तानपापान् ॥, G. p. II. 8. 18.

Sec. iv. अपरवक्त्र (11, 12).

452. If the odd feet consist of eleven syllables =111 111 212 12 and the even feet of twelve syllables =111 121 121 212, it is called अपरवक्त्र.

न भवति विदुषां महद् भयं, यदविदुषां सुमहद् भयं भवेत्।
न हि गतिरधिकास्ति कस्यचित्,
सकृदुपदर्शयतीह तुल्यताम् ॥, m. xii. 285. 45.

सुनिपुणमुपवेश्य सद्गुरं, शुचिरनुरक्तिपरो विभूतये ।
भवति हि विनयोपबृंहितः, नृपतिपदाय प्रमाय च क्षमः ॥, Ka. I. 67.
अथ हिमशुचिभस्मभूषितं, शिरसि विराजितमिन्दुलेखया ।
स्ववपुरतिमनोहरं हरं, दधतमुदीक्ष्य ननाम पाण्डवः ॥, Ki. 18. 15.

Sec. v. उद्गता ; सौरभ or -क ; ललित ; मञ्जरी.

453. If the first foot consists of ten syllables = 112 121 1121, the second foot consists of ten syllables = 111 112 121 2, the third foot consists of 11 syllables = 211 111 121 12, and the fourth foot of 13 syllables = 112 121 112 1212, it is called उद्गता. This is the metre of the 15th canto of Si. and of the 12th canto of Ki.

इति शुक्रधे अशमनेन, मनु मद्दवाप्य विप्रियम् ।
याति विकृतिमपि संहतिमत्, किमु यन्निसर्गनिरवग्रहं मनः ॥, Si. xv. 11.
न विसिसिये न विषसाद, मुहुरलसतां न चाददे ।
सत्त्वमुरधति रजस्तमसी, न हतः स्म तस्य हतशक्तिपेलवे ॥ Ki. 12. 5.

454. According to C. m., the third foot of उद्गता may also consist of ten syllables = 211 111 211 2.

455. According to V. r. n, if the first foot consists of 211 111 121 12 and the third foot of 112 121 112 1, it is called मञ्जरी.

456. If the third foot consists of ten syllables with the 1st, 3rd, 7th and 10th syllables heavy *i. e.* 212 111 211 2, it is called सौरभक.

विनिवारितोऽपि नयनेन, तदपि किमिहागतो भवान् ।
एतदेव तव सौरभकं, यदुदीरितार्थमपि नावबुध्यते ॥, P. h.

457. If the third foot consists of twelve syllables with the 9th and 12th syllables heavy *i. e.* **111 111 112 112**, it is called ललित.

व्रजसुन्दरीसमुदयेन, मुदितमनसा स्म पीयते ।
हिमकरगलितमिवामृतकं, ललितं मुरारिमुखचन्द्रविद्रुतम् ॥, C. m.

Sec. vi. औपच्छन्दसक proper (11, 12).

458. If the odd feet are = **112 112 121 22** and the even feet are = **112 211 212 122**, it is called औपच्छन्दसक. This metre is best fitted for martial description. This is the metre of the 20th canto of Si and of the first part of the 13th canto of Ki.

व्यवहार इवानृताभियोगं, तिमिरं निर्जितवत्यथ प्रकाशे ।
रिपुरुल्बणभीमभोगभाजां, भुजगानां जननीं जजाप विद्याम् ॥, Si. xx. 41.

स गतः क्षितिमुष्णशोणितार्द्रः, खुरदंष्ट्राग्रनिपातदारिताश्मा ।
असुभिः क्षणमीक्षितेन्द्रसूनुः, विहितामर्षगुरुध्वनि र्निरासे ॥, Ki. xiii 31.

चमरान् परितः प्रवर्तिताश्वः, क्वचिदाकर्णविकृष्टभल्लवर्षी ।
नृपतीनिव तान् वियोज्य सद्यः
सितबालव्यजनै र्जगाम शान्तिम् ॥, R. ix. 66.

Sec. vii. Undescribed metres.

459. The following sub-sections will illustrate the unlimited extent to which uneven metres may be used. The illustrations come under the ambiguous name गाथा. Some of them may be transferred to the head of irregular verses. Their form will be clear from the numbers over the syllables.

(1) of Eleven syllables.

1 2 2 2 1 1 2 2 1 2 2
(*a*) अमी वेदिं परितः क्लृप्तधिष्ण्याः,

1 2 2 2 2 1 2 2 1 2 2
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।

1 2 2 2 1 1 2 2 1 2 2
अपघ्नन्तो दुरितं हव्यगन्धैः,

2 2 2 2 2 1 2 2 1 2 2
वैतानास्त्वां वह्नयः पावयन्तु ॥, Sa. iv. 10.

1 2 2 2 2 1 2 2 1 2 2
ततो रामो जानकीस्पृष्टपाणिः,

2 2 2 2 2 1 2 2 1 2 2
सूतैर्भक्त्या मागधैः स्तूयमानः ।

2 2 2 2 2 1 2 2 1 2 2
पुष्पासारैरास्तृतो देवसंघैः,

1 2 1 2 2 1 2 2 1 2 2
स उत्तरान् कोशलानाजगाम ॥, Ad. 9. 33.

2 2 1 2 2 1 2 2 1 2 2
(*b*) संस्वेदजा ह्यण्डजा ह्युद्भिदश्च,

1 2 1 2 1 1 2 2 1 2 2
सरीसृपाः कृमयोऽप्यप्सु मत्स्याः ।

1 2 2 2 1 1 2 2 1 2 2
तथाश्मानस्तृणकाष्ठञ्च सर्वं,

2 2 1 2 2 1 1 2 1 2 2
दिष्टक्षये स्वां प्रकृतिं भजन्ते ॥, Mat. 38. 9.

1 1 2 1 1 2 1 2 1 2 2
(*c*) अगमिष्यदहो कथं स तापः,

1 1 2 2 1 1 2 1 2 1 2
ननु दृष्टाङ्गजया य एधितः ।

11 2 211 2 1 21 2
मम जीवातुलता झटित्यलं,

1 122 1121 2 12
व्यभविष्यन् न हिमाद्रिजा यदि ॥, kasi. 44. 15.

22 22 2122 122
(*d*) धर्म्यं मार्गं चिन्तयानो यशस्यं

22 12 2112122 2
कुर्य्यात्तपो धर्म्ममवेक्षमाणः ।

1 212 2122 1 22
न मद्विधो धर्म्मबुद्धिर्हि राजा

2 2 2 2 1122 122
ह्येवं कुर्य्यात् शपथं मां यथात्थ ॥, Mat. 41. 17.

121 2 2 11 2122
(*e*) अरक्ष्यमाणाः स्त्रिय ऊर्व्विं बालान्,

2 21 2 112 2122
मोचस्वथो पुरुषादैरिवार्तान् ।

2 2 22 2112 122
वाचं देवीं ब्रह्मकुले कुकर्म्म-

2222 211212 2
ण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥, b. 16. 21.

2 2 22 212 2122
(*f.*) स्वाहा वौषट् ब्राह्मणाः सौरभेयी,

22 22 2122 12 2
धर्म्मं चाग्र्यं कालचक्रं बलं च ।

12 12 2112 1 22
यशो दमो बुद्धिमतां स्थितिश्च,

12 1 22 1121 22
शुभाशुभं ये मुनयश्च सप्त ॥, m. xiii. 18. 73.

1 2 2 2 2 1 2 2 1 2 2

(*g*) सदा देवाः साधुभिः संवदन्ते,

1 2 1 2 1 1 2 2 2 2 2

न मानुषं विषयं यान्ति द्रष्टुम् ।

2 2 1 2 2 1 1 2 1 2 2

नेन्द्रः समः स्यादसमो हि वायुः,

2 2 1 2 1 1 2 2 1 2 2

उच्चावचं विषयं यः स वेद ॥, m. xii. 299. 34.

1 2 2 1 1 1 2 2 1 2 2

(*h*) इदं कार्यममृताशाः शृणोमि,

1 2 1 2 2 1 2 2 1 2 2

तपो दमः सत्यमात्माभिगुप्तिः ।

2 2 1 2 1 1 1 2 1 2 2

ग्रन्थीन् विमुच्य हृदयस्य सर्वान्,

1 2 1 2 2 1 1 2 1 2 2

प्रियाप्रिये स्वं वशमानयीत ॥, m. xii. 299. 7.

2 2 1 2 2 1 1 2 1 2 2

(*i*) वैदेहकं शूद्रमुदाहरन्ति,

1 2 1 2 2 2 1 2 1 2 2

द्विजा महाराज श्रुतोपपन्नाः ।

1 2 1 2 2 1 1 2 1 2 2

अहं हि पश्यामि नरेन्द्र देवं,

2 2 1 2 2 1 1 2 1 2 2

विश्वस्य विष्णुं जगतः प्रधानम् ॥, m. xii. 296. 28.

2 2 1 2 2 1 1 2 1 2 2

(*l*) प्रादेशमात्रे हृदि निःसृतं यत्,

2 2 2 2 2 1 2 2 1 2 2

तस्मिन् प्राणानात्मयाजी जुहोति ।

22 1 22 112 122
तस्याग्निहोत्रं हुतमात्मसंस्थं,

221 22112122
सर्वेषु लोकेषु सदेवकेषु ॥, m. xii. 246. 28.

22 1 22 1 12 122
(*k*) सर्वाणि भूतानि सुखे रमन्ते,

22 1 221 12 122
सर्वाणि दुःखस्य भृशं त्रसन्ते ।

22 122 112 122
तेषां भयोत्पादनजातखेदः

22 1 221 2 2122
कुर्यान्न कर्माणि हि श्रद्दधानः ॥ m. xii. 246. 25.

1212 11221 22
(*l*) पयस्विनीं घृतिनीमत्युदारां,

1212 212 2122
समृद्धिनीं वेगिनीं दुर्विगाह्याम् ।

2222 2 122122
गङ्गां गत्वा यैः शरीरं विसृष्टं

12 222 112 122
गता धीरास्ते विबुधैः समत्वम् ॥, m. xiii. 26. 82.

2212 2 112 122
(*m.*) शिश्नोदरे ये निरताः सदैव,

22 122 1121 22
स्तेना नरा वाक्परुषाश्च नित्यम् ।

1212 2112 122
अपेतदोषानपि तान् विदित्वा,

22 22 2112122
दूराद् देवाः संपरिवर्जयन्ति ॥, m. xii. 299. 36.

1 2 1 2 1 1 2 2 1 2 2
(*n.*) न बान्धवा नच वित्तं न कौल्यं,

1 2 1 2 1 1 2 2 1 2 2
न च श्रुतं न च मन्त्रा न वीर्यम् ।

2 2 2 2 2 1 2 2 1 2 2
दुःखात् त्रातुं सर्वे एवोत्सहन्ते,

1 2 1 2 2 1 1 2 1 2 2
परत्र शीलेन तु यान्ति शान्तिम् ॥, m. xii. 286. 15.

1 2 1 2 2 1 1 2 1 2 2
(*o.*) अराजपुत्रस्त्वमनार्यवृत्तः,

2 2 1 2 2 1 1 2 1 2 2
लुब्धः सदा बन्धुषु पापबुद्धिः ।

1 2 1 2 2 1 1 2 1 2 2
क्रमागतं राज्यमिदं परेषां,

2 2 1 2 2 1 1 2 1 2 2
हर्तुं कथं शक्ष्यसि दुर्विनीत ॥, m. 5. 149. 35.

1 2 1 2 2 2 1 2 1 2 2
(*p.*) किमग्निहोत्रस्य व्रतं पुराणम्,

2 2 1 2 2 1 2 2 1 2 2
आचक्ष्व मे पृच्छतस्त्वानुरूपम् ।

1 2 1 2 2 1 1 2 1 2 2
त्वयानुशिष्टोऽहमिहाद्य विद्यां,

1 2 1 2 2 2 1 2 1 2 2
यदग्निहोत्रस्य व्रतं पुराणम् ॥, m. III. 186. 17.

1 1 1 2 1 1 2 1 1 2 1
(*q.*) निजपदाब्जदले ध्वजवज्र-

2 1 2 1 1 1 2 1 1 2 2
नीरजाङ्कुशविचित्रललामे ।

1112 112 1122
व्रजभुवः शमयन् खुरतोदं,

21 21 1 12 1122
वर्ष्मधुर्यगतिरीडितवेणुः ॥, b. 10. 35. 16.

22 122 11212 2
(r.) धारानिनादैर्विहंगप्रणादैः,

1212 2 12 2122
शुभैस्तथा बृंहितैः कुञ्जराणाम् ।

2212 2122 122
गीतैस्तथा किन्नराणामुदारैः

12 12 2122 122
शुभैः स्वनैः सामगानां च वीर ॥, m. xiii. 14. 53.

(2) Of twelve syllables.

1 2122 1121 212
(a.) न धर्मकालः पुरुषस्य निश्चितः,

12 1 22 112 1 212
न चापि मृत्युः पुरुषं प्रतीक्षते ।

12 1 222 121 212
सदा हि धर्मस्य क्रियैव शोभना,

12 12 21 12 1212
यदा नरो मृत्युमुखेऽभिवर्तते ॥, m. xii. 298. 17.

12 12 1112 1212
(b.) अजं पुराणमजरं सनातनं,

12 1211121 212
यदिन्द्रियैरुपलभेत निश्चलैः ।

1 21 22 11 2 1212
अणोरणीयो महतो महत्तरं,

1 21 2 2 1 1 21212
तदात्मना पश्यति मुक्तमात्मवान् ॥, m. xii. 241. 35.

(3) Of 13 syllables.

1 1 2 1 1 2 1 1 1 1 1 1 2
(*a.*) ततसर्वहृदम्बर वरद नते,
1 1 1 1 1 1 2 1 1 2 1 1 2
मतहजिनमहावनदाहहते ।
1 1 1 1 1 1 2 1 1 2 1 1 2
हतविविधचरित्रतमो सुतमो,
1 1 1 1 1 1 2 1 1 2 1 1 2
तनुविभिन्नविशोषण धैर्यनिधे ॥, kasi. 17. 35.

(4) Of ten and 11 syllables.

2 1 2 1 1 1 2 1 1 2 2
(*a.*) मन्दवायुरनुवात्यनुकूलं,
2 1 2 1 1 1 2 1 2 2
मानयन् मलयजस्पर्शेन ।
2 1 2 1 1 1 2 1 1 2 2
वन्दिनस्तमुपदेवगणा ये,
2 1 2 1 1 1 2 1 1 2 2
वाद्यगीतबलिभिः परिवव्रुः ॥, b. x. 35. 21.

(5) Of 11 and 12 syllables.

2 2 1 2 2 1 1 2 1 2 2
(*a.*) सांख्यं विशालं परमं पुराणं,
1 2 1 2 1 1 1 1 2 1 2 2
महार्णवं विमलमुदारकान्तम् ।
2 2 1 2 2 1 1 2 1 2 2
कृत्स्नं च सांख्यं नृपते महात्मा,
2 2 1 2 2 1 1 2 1 2 2
नारायणो धारयतेऽप्रमेयम् ॥, m. xii. 301. 114.

2 2 22 2 1 1 2 1 2 2

(*b*) पादैर्न्यूनं प्रोचसि नैकपादम्,

2 22 2 1 1 2 2 1 2 2

आत्मानं वा वृषलैर्भोक्ष्यमाणम् ।

1 2 1 2 2 1 1 2 1 2 2

अथो सुरादीन् हृतयज्ञभागान्,

1 2 1 2 2 1 1 2 1 2 1 2

प्रजा उत स्विन्मघवत्यवर्षति ॥, b. 16. 20.

1 1 2 1 1 2 1 1 2 1 1 2

(*c*) त्रिगुणो विगुणश्चतुरात्मधरः,

2 2 1 2 1 1 1 2 1 1 2

पूर्त्तेष्टयोश्च फलभागहरः ।

1 1 2 1 2 1 1 1 2 1 1 2

विदधातु नित्यमजितोऽतिबलः,

1 1 2 1 2 1 1 1 2 1 2 2

गतिमात्मगां सुकृतिनामृषीणाम् ॥, m. xii. 346. 20.

2 2 1 2 2 1 2 2 1 2 1 2

(*d*) तथंत्र शुभञ्चैतदुक्तं त्वया विभो,

2 2 2 2 2 1 2 2 1 2 2

सम्यक् चेस्यं दैवताद्यं यथावत् ।

2 2 1 2 1 1 2 2 1 2 2

स्वस्त्ययनं भवतश्चास्तु नित्यम्,

2 2 1 2 2 1 2 2 1 2 2

शुद्ध्या सदा बुद्धियुक्तं मनस्ते ॥, m. xii. 318. 83.

2 2 1 2 2 2 1 1 2 1 2 2

(*e.*) तत्र स्थितं मां देवसुखेषु सक्तं,

2 2 2 2 1 1 1 1 2 1 2 2

कालेऽतीते महति ततोऽतिमात्रम् ।

2 2 22 2 2 1 2 2 1 2 2

दूतो देवानामब्रवीदुग्ररूपः,

2 22 2 2 1 22 1 22

ध्वं सेतुरश्वैर्विभिः सुतेन स्वरेण ॥, Mat. 38. 18.

1 1 2 12 11121 12

(*f.*) स हि लोकयोनिरमृतस्य पदं,

2 2 12 11112 112

सूक्ष्मं परायणमचलं हि पदम् ।

1 2 12 1 112 112

तत् सांख्ययोगिभिरुदारवृतं,

22 12 1 1 12 1 2 1 2

बुद्ध्या यतात्मभिरिदं सनातनम् ॥, m. xii. 346. 22.

22 1 22 1 12 1 22

(*g.*) तेषां न तिर्यग्गमनं हि दृष्टं,

2 2 1 2 2 112 1 2 2

नार्वाग्गतिः पापकृताधिवासः ।

1 2 12 2 1 1 2 12 12

न वा प्रधाना अपि ते द्विजातयः,

2 2 1 22 112 1 2 2

ये ज्ञानमेतन् नृपतेऽनुरक्ताः ॥, m. xii. 301. 113.

2 2 1 2 11 1 2 2 1 2 2

(*h.*) क्षेपायमाणमभिषङ्गव्यलीकं,

1 2 2 2 112 21 2 2

निगृह्णाति ज्वलितं यश्च मन्युम् ।

12122 1 12 1 22

अदुष्टचेता मुदितोऽनसूयुः,

1 2 2 2 112 2 122

स आदत्ते सुकृतं वै परेषाम् ॥, m. xii. 299. 11.

2 2 222 2 1 2 2 1 2 2

(*i*) राज्ञा चेतव्याः प्रव्रज्योन्नताश्च,

2 2 2 2 2 2 1 2 2 1 2 2

सम्यक् कर्तव्यं पालनं च प्रजानाम् ।

2 2 2 2 1 1 2 2 1 2 2

अग्निश्चेयो बहुभिश्चापि यज्ञैः,

2 2 2 2 2 1 1 2 2 2 2 2

अन्त्येत्र मध्येत्र वा वनमाश्रितत्र स्थेयम् ॥, m. xii. 291. 22.

2 2 1 2 1 1 1 2 1 2 1 2

(j) आवर्तमानमजरं विवर्तनं,

2 2 1 2 2 1 2 2 1 2 2

षण्णाभिकं द्वादशारं सुपर्व ।

2 2 1 2 2 1 1 2 1 2 2

यस्येदमास्योपरि याति विश्वं,

2 2 1 2 2 1 1 2 1 2 2

तत् कालचक्रं निहितं गुहायाम् ॥, m. xii. 246. 32.

2 2 1 2 1 1 1 1 2 1 2 2

(*k*) दृष्ट्वैव मामभिमुखमापतन्तं,

2 2 1 2 2 1 1 2 1 2 2

देहीति स ह्यासनमादिदेश ।

2 2 1 2 2 1 1 2 1 2 2

वैवस्वतोऽर्घ्यादिभिरर्हणैश्च,

1 2 1 2 2 1 2 2 1 2 2

भवत्कृते पूजयामास मां सः ॥, m. xiii. 71. 16.

2 2 2 2 2 1 2 2 1 2 1 2

(*l*) चातुर्मास्यैर्ये यजन्ते जनाः सदा

1 2 2 2 1 1 1 2 2 1 2 2

तथेष्टीनां दशशतं प्राप्नुवन्ति ।

2 2 1 2 2 2 1 2 2 1 2 2
ये चाग्निहोत्रं जुह्वति श्रद्दधानाः,

1 2 2 2 2 1 22 1 22
यथाम्नायं त्रीणि वर्षाणि विप्राः ॥, m. xiii. 102. 36.

22 12 2 1 1 2 1 2 2
(*m*) तेजोमयो नित्यमयः पुराणः

2 2 1 2 2 1 1 2 1 2 2
लोकाननन्तानभयानुपैति ।

2 2 1 2 2 2 1 2 2 1 2 2
भूतानि यस्मान्न त्रसन्ते कदाचित्

1 2 2 2 2 1 1 2 1 2 2
स भूतानां न त्रसते कदाचित् ॥, m. xii. 246. 34.

1 2 1 2 2 1 2 2 1 2 1 2
(*n*) ततोऽपरे भान्ति लोकाः सनातनाः

1 1 1 2 1 1 2 2 1 2 2
विरजसो वितमस्का विशोकाः ।

2 2 1 2 2 1 1 2 1 2 1 2
आदित्यदेवस्य पदं महात्मनः

2 1 2 2 2 1 2 2 1 2 2
तत्र त्वाहं हस्तिनं यातयिष्ये ॥, m. xiii. 102. 32.

1 2 1 2 2 1 1 2 1 2 2
(*o*) अगर्हणीयो न च गर्हतेऽन्यान्,

1 2 22 1 1 2 2 1 2 2
स वै विप्रः परमात्मानमीक्षेत् ।

12 1 2 2 1 1 2 1 2 1 2
विनीतमोहो व्यपनीतकल्मषः,

1 21 2 21 1 2 1 2 1 2
न चेह नामुत्र च सोऽन्नमर्च्छति ॥, m. xii. 246. 35.

2 2 2 2 1 1 2 2 1 2 2

(p) दिव्यां मालामुरसाऽनेकवर्णां

1 2 1 2 2 2 1 2 2 1 2 2

समुद्वहन्तं गुल्फदेशावलम्बाम् ।

2 2 1 2 1 1 2 2 1 2 2

चन्द्रं यथा परिविष्टं समन्तत्

2 2 1 2 2 1 1 2 1 2 2

वर्षात्यये तद्वदपश्यमेनम् ॥, m. xiii. 14. 388.

(q) विद्याप्रबोधोदयजन्मभूमिः,

वाराणसी ब्रह्मपुरी दुरत्यया ।

अतः कुलोच्छेदविधिं विधित्सुः

निवस्तुमत्रेच्छति नित्यमेव सः ॥, Pr. II. 12.

Here the 1st foot is इन्द्रवज्रा, the 2nd इन्द्रवंशा, the 3rd उपेन्द्रवज्रा, the 4th वंशस्थ.

(5) Of twelve and 13 syllables.

1 1 2 1 1 2 1 1 1 1 1 1 2

(a) निधनादिविवर्जितशान्ततनितिशात्

1 1 1 1 1 1 2 1 1 2 1 1 2

क्षतिविच्छितमनोरथपन्नगभृत् ।

1 1 2 1 1 2 1 1 2 1 1 2

नगभर्तृसुतार्पितवामवपु,

1 1 2 1 1 2 1 1 2 1 1 2

स्ववपुः परिपूरितसर्वजगत् ॥, kasi. 17. 36.

1 1 1 1 1 1 1 2 1 2 1 2 2

(b) यदुपनिषदमुपाकरोत् तथाऽसौ

1 1 1 1 2 1 1 2 1 2 1 2 2

जनकनृपस्य पुरा हि याज्ञवल्क्यः ।

1 1 1 1 1 1 2 1 2 1 2 2

यदुपगणितमशाश्वताव्ययं तत्

1 1 1 1 2 1 1 2 1 2 1 2

शुभमच्युतत्वमशोकमृच्छति ॥, m. xii. 318. 112.

This is पुष्पिताग्रा with the last syllable wanting in the fourth foot and यद् in excess in the first foot.

1 2 1 2 1 1 1 1 2 1 2 1 2

(*c*) अतः परं परमुदारमाश्रमं

1 2 1 2 2 1 1 2 1 2 1 2

तृतीयमाहुस्त्यजतां कलेवरम् ।

1 2 1 2 1 1 1 1 2 1 2 1 2

वनौकसां गृहपतिनामनुत्तमं

1 2 1 2 2 1 1 2 1 2 1 2

स्पृष्य संश्लिष्टशरीरकारिणाम् ॥, m. xii. 244. 29.

(7.) Of eleven and thirteen syllables.

1 1 1 1 1 1 2 1 2 1 2

(*a*) स च किल कृतनिश्चयो द्विजः,

1 1 1 1'2 1 1 2 1 2 1 2 2

भुजगपतिप्रतिदेशितात्मकृत्यः ।

1 1 1 1 1 1 2 1 2 1 2

यमनियमसहो वनान्तरं,

1 1 1 1 2 1 1 2 1 2 1 2 2

परिगणितोञ्छशिलाशनः प्रविष्टः ॥, m. xii. 365. 9.

1 2 1 2 2 2 2 1 2 2 2 2 2

(*b*) स एव पार्थाय श्वेतमश्वं प्रायच्छत्,

1 2 2 2 1 1 2 2 1 2 2

स एवाश्वानथ सर्वांश्चकार ।

121 22 1 12 122
सबन्धुरस्तस्य रथस्त्रिचक्रः,

12 1 2 1 1 2 2 1 2 2
त्रिवृच्छिराश्चतुरश्वस्त्रिनाभिः ॥, m. xiii. 159. 26.

(8.) Of ten and twelve syllables.

11 22 1 1 2 1 2 1 2 2
(*a*) किमु निर्वाणपदस्य भद्रपीठं,

1 1 2 2 1 1 2 1 2 1 2 2
मृदुलं तल्पमथो नु मोक्षलक्ष्म्याः ।

112 1 12 1 2 1 2
अथवा मणिकर्णिकास्थली,

1 1 2 2 1 1 2 1 2 1 2 2
परमानन्दसुकन्दजन्मभूमिः ॥, kasi. 44. 46.

(9) Of nine, ten and eleven syllables.

2 2 22 2 112 2
(*a*) आहुः षष्टिं बुद्धिगुणान् वै

2 1 1 2 2 2 1 122
भूतविशिष्टा नित्यविषक्ताः ।

2 1 1 2 2 2 11 22
भूतविभूतीश्चाक्षरसृष्टाः,

2 1 1 22 1 1 1 1 2 2
पुत्र न नित्यं तदिह वदन्ति ॥, m. xii. 255. 12.

(10) Of 8, 9, 10, and 11 syllables.

2 2 1 1 2 1 12 122
(*a*) वायुर्भुजोऽपि सतो नरस्य,

2 2 1 2 1 2 2 2
दुःखक्षयः कुतस्तस्य ।

111 1 1 21112
भवति हि सुरासुरगुरौ
21 1 2212 22
यस्य न विश्वेश्वरे भक्तिः ॥ m. xiii. 14. 182.

(11) Of eleven, twelve and 13 syllables.

112 122 ° 12 2122
(*a*) ऋषयः समेताः पश्चिमे वै प्रभासे,
1212 21 12122
समागता मन्त्रममन्त्रयन्त ।
121 22 112 21 22
चराम सर्वां पृथिवीं पुण्यतीर्थां,
2 2 22 21 221 22
परयुक्तेनोपचित्रा, पादाकुलकमितयतः।

(६४) गीतार्यया लो, गश्चेत् सौम्या, लः पूर्वो ज्योतिरीरिता ॥ १७ ॥

(६५) स्याच्छिखा विपर्ययस्तार्धा, चूलिका समुदाहृता।

(६६) एकोनत्रिंशदन्ते गः, स्युर्येन न समा गताः।

(६७) गुरोरितेयव सङ्ख्या सा वर्णाज्ञेया विपर्ययात् ॥ १८ ॥

इत्याग्नेयमहापुराणे त्रिंशदधिकशततमोऽध्यायः॥

आग्नेये छन्दःसारे चतुर्थोऽध्यायः ॥ ४ ॥

अग्निरुवाच,—

वृत्तं समं चार्धसमं विषमञ्च त्रिधा वदे।

---

(५८) पञ्चमेनपूर्वसाकंतृतीयेनचद्दयुक्।

(५९) उदीच्यवृत्तिर्वाच्या स्यातयुगपञ्चप्रवर्त्तकम्।

(६०) अयुक्चारुहासिनीस्यादुयुगवान्तिकाभवेत्।

(६१) सप्ताचिर्वसवश्चै वमात्रासमकमीरितम्।

(६२) भवेल्लनवमोयत्रद्वादशोवानवासिका।

(६३) विश्लोकःपञ्चमाष्टौनौचित्रानवमकश्चलः।

(६४ गीतार्य्यालोपचेत्सौम्यालःपूर्वोज्योतिरीरिता।

(६५) स्याच्छिखाविपर्य्यस्तार्धाचूलिकासमुदाहृता।

(६६) एकोनत्रिंशन्तेगःस्युर्येनसमागताः।

(६७) गुरितोकपरंसङ्ख्यावर्णातविपर्य्ययात्।

(४७) स्वरा अर्धं चार्यार्धं स्यादार्यायां विषमे न जः ॥ ६ ॥
(४८) षष्ठो जो नलघू वा स्याद् द्वितीयादि पदं नले।
सप्तमेऽन्ते प्रथमादि, द्वितीये पञ्चमे नले ॥ ७ ॥
(४९) अर्द्धे पदं प्रथमादि षष्ठ एको लघु भवेत्।
(५०) त्रिषु गणेषु पादः स्यादार्या पथ्यार्धके स्मृता ॥ ८ ॥
विपुलान्याथ चपला गुरुमध्यगतौ च जौ।
द्वितीयचतुर्थौ, पूर्वे च चपला मुखपूर्विका ॥ ९ ॥
(५१) द्वितीये जघनपूर्वा चपलार्यत्रा प्रकीर्त्तिता।
(५२) उभयोर्महाचपला, गीतिराद्यार्धतुल्यका ॥ १० ॥
अन्त्येनार्धेनोपगीतिरुद्गीतिश्चोत्क्रमात् स्मृता।
(५३) अर्धे वसुगणा आर्यागीति, श्छन्दोऽथ मात्रया ॥ ११ ॥
(५४) वैतालीयं द्विस्वरा स्यादयुक्पादे समे युजः।
(५५) वस्वोऽन्ते रलगाश्च, गौपच्छन्दसकं भवेत् ॥ १२ ॥
(५६) भगगान्तापातलिका, शेषे परेण पूर्ववत्।
(५७) न साकं षट् चामिश्रा युक्, प्राच्यवृत्तिः प्रदर्श्यते ॥ १३ ॥

---

(४७) स्वरार्द्धं चार्यार्द्धं स्यादार्यायां विषमे नजः।
(४८) षष्ठोजोनलपूर्वा स्याद्द्वितीयादिपदं नले।
(४९) अर्द्धे पदं प्रथमादिषष्ठएकोलघुर्भवेत्।
(५०) त्रिषु गुरुषु पादः स्यादार्यापथ्यार्धके स्मृता।
(५१) द्वितीयजघनपूर्वाचपलार्याप्रकीर्त्तिता।
(५२) उभयोर्महाचपलागीतिराद्यार्धतुल्यका।
(५३) अर्द्धे रसगणाआर्यागीतिश्छन्दोऽथमात्रया।
(५४) वैतालीयंद्विस्वरास्यादयुक्पादे समेनलः।
(५५) वसवोन्ते नमाश्चगोपुच्छंदसकं भवेत्।
(५६) भगणान्तापाटलिकाशेषे परे च पूर्ववत्।
(५७) साकं षट्चामिश्रायुक्प्राच्यवृत्तिःप्रदर्श्यते।

(५८) पञ्चमेन पूर्वः साकं तृतीयेन सह चासुक् ।
(५९) उदीच्यवृत्तिः, प्राच्यां स्याद् युगपच्च प्रवृत्तकम् ॥ १४ ॥
(६०) अयुक् चारुहासिनी स्याद्, युगपरान्तिका भवेत् ।
(६१) गन्ता द्विर्वसवश्चैव मात्रासमकमीरितम् ॥ १५ ॥
(६२) भवेल् लो नवमो, यत्र द्वादशो वानवासिका ।
(६३) विश्लोकः पञ्चमाष्टमौ, चित्रा नवमकश्च लः ॥ १६ ॥
परयुक्तेनोपचित्रा, पादाकुलकमितरतः ।
(६४) गीतार्यत्रा लो, गश्चेत् सौम्या, लः पूर्वौ ज्योतिरीरिता ॥ १७ ॥
(६५) स्याच्छिखा विपर्ययस्तार्धा, चूलिका समुदाहृता ।
(६६) एकोनत्रिंशदन्ते गः, सा येन न समा गलाः ।
(६७) गुरोरितेयत्र सङ्ख्या सा वर्णाज्ज्ञेया विपर्ययात् ॥ १८ ॥

इत्यग्निप्रोक्ते महापुराणे त्रिंशदधिकशततमोऽध्यायः ॥

आग्नेये छन्दःसारे चतुर्थोऽध्यायः ॥ ४ ॥

अग्निरुवाच,—

वृत्तं समं चार्धसमं विषमञ्च त्रिधा वदे ।

---

(५८) पञ्चमेनपूर्वसाकंतृतीयेनसहचासुक् ।
(५९) उदीच्यवृत्तिर्वाच्या स्यातयुगपच्चप्रवर्त्तकम् ।
(६०) अयुक् चारुहासिनीस्याद्युगपदान्तिकाभवेत् ।
(६१) सप्तार्चिर्वसवश्चै मात्रासमकमीरितम् ।
(६२) भवेल्लनवमोयत्रद्वादशोवानवासिका ।
(६३) विश्लोकपञ्चाष्टमौचित्रानवमकश्च ।
(६४ गीतार्य्यालोपश्चेत्सौम्यालः पूर्वोज्योतिरीरिता ।
(६५) स्याच्छिखाविपर्ययस्तार्धाचूलिकासमुदाहृता ।
(६६) एकोनत्रिंशन्तेगःसाजन्नेजनसमागला ।
(६७) गुरितोकपरंसङ्ख्यावर्णातविपर्ययात् ।

(६८) समं तावत्तत्वः कृतमर्द्धसमञ्चाकारयेत्॥ १॥
(६९) विषमञ्च राष्ट्रयनं, गलद्दत्तं समान्यपि।
(७०) ग्लौ चतुः प्रमाणी स्यात्, आभ्यामन्यद् वितानकम्॥ २॥
(७१) पादस्याद्यनुष्टुब् वक्त्रं स्यात् सनौ न प्रथमात् स्मृतौ।
(७२) वान्यद् यच्चतुर्थाद् वर्णात्, पथ्या ज्ञेया युजो जतः॥ ३॥
(७३) विपरीता अथान्येषां, चपला अयुजस्तु नः।
(७४) विपुला युग्लः सप्तमः सर्वं तत् सैतवस्य च॥ ४॥
(७५) भौ न्तौ वा विपुलानेका वक्त्रजातिः समीरिता।
भवेत् पदचतुरर्धं चतुर्वृद्ध्या पदेषु च॥ ५॥
(७६) गुरुद्वयान्त आपीड़ः, प्रत्यापीड़ो गगादिकः।
(७७) प्रथमस्य विपर्य्यासे मञ्जरी लवली क्रमात्॥ ६॥
(७८) भवेदमृतधाराख्या उद्गताद्यत्र तेऽधुना।
(७९) एकतः सजसलाः स्युर्नसौ जो गोऽथ भो नजौ॥ ७॥
(८०) लो गोऽथ सजसा जो ग स्तृतीयचरणस्य तु।

---

(६८) समंतावत्तत्वकृतमर्द्धं समञ्चाकारयेत्।
(६९) विषमञ्चवास्तुयनमलिद्दत्तं समान्यपि।
(७०) ग्लौचतुःप्रमाणीस्यादाभ्यामन्यद्वितानकम्।
(७१) पादस्याद्यन्तवक्त्रं स्यायनौनप्रथमात्स्मृतौ।
(७२) वायन्मुचतुर्थाद्वर्णात्पथ्यावर्णा युग्योवतः।
(७३) विपरीतपथ्यान्यासाचपलावायुजस्तनः।
(७४) विपुलायुग्लसप्तमःसर्वंतत्सैवतस्यच।
(७५) तौन्तौवाविपुलानेकावक्त्रयातिःसमीरिता।
(७६) गुरुद्वयान्तआपीड़प्रत्यापीड़ोगणादिकः।
(७७) प्रथमस्यविपर्यासेमञ्जरीलवलीक्रमात्।
(७८) भवेदमृतधाराख्याउद्गताद्यत्रतेऽधुना।
(७९) एकतःसमसजसानःस्युर्नसौजोगोऽथभौनजौ।
(८०) गोगोऽथसमजागोगस्तृतीयचरणस्य।

(८१) सौरभकं रनभगा, ललितञ्च ननौ ससौ ॥ ८ ॥
(८२) उपस्थितप्रचुपितं प्रथमाद्यं मसौ जभौ।
(८३) गो गोऽथ सनजा रो गः, नौ सोऽथ ननना जयौ ॥ ९ ॥
(८४) वर्धमानं नौ स्नौ नसौ अथो तो जो र ईरिता।
शुद्धविराडार्षभाख्यं वच्चे चार्धसमं ततः ॥ १० ॥
इत्याग्निप्रोक्ते महापुराण्ये विषमकथनं नाम एकत्रिंशदधिक-
त्रिशततमोऽध्यायः ॥
आग्नेये छन्दःसारे पञ्चमोऽध्यायः ॥ ५ ॥

अग्निरुवाच,—

(८५) उपचित्रकं ससला गोऽथ भो भभगा गथ।
(८६) द्रुतमध्या भभभगा गयो नजजयाः स्मृता ॥ १ ॥
(८७) वेगवती सससगा भभभगा गयो स्मृता।
(८८) भद्रविराट् तजरगा मसजा गो गथ स्मृता ॥ २ ॥
(८९) सजसा गोऽथ भो रो नो गो गो वै केतुमत्यपि।
(९०) आख्यानिकी ततजगा गयो जतजगा गथ॥ ३ ॥
(९१) सौ सलौ गथ नौ भो भौ भवेद्धरिणवल्लभा।
(९२) नौ रलौ गथ नजजा रः स्यादपरवक्त्रकम् ॥ ४ ॥
(९३) पुष्पिताग्रा ननरया नजजा रो गयो, रजौ।
(९४) रो जयो जरजा रो गो युजि यवमती, शिखा ॥ ५ ॥
(९५) अष्टाविंशतिला गान्ता त्रिंशल्लान्तगतो युजि।
(९६) खञ्जा तद्विपरीता स्यात् समवृत्तं प्रदर्श्यते ॥ ६ ॥
इत्याग्निप्रोक्ते महापुराणे अर्धसमवर्णनं नाम
द्वात्रिंशदधिकत्रिशततमोऽध्यायः ॥
आग्नेये छन्दसारे षष्ठोऽध्यायः ॥ ६ ॥

अग्निरुवाच,—

(९८) यति विच्छेद इत्युक्ता तनुमध्या तयौ गणौ ।

(९८) जसौ गः कुमारललिता, भौ गौ चित्रपदा स्मृता ॥ १ ॥

(९९) विद्युन्माला ममगगा, गर्वे भतलगैर्भवेत् ।

(१००) माणवकाक्रीड़ितकं, र्नौ सो हलमुखी स्मृता ॥ २ ॥

(१) नौम् भुजङ्गशिशुभृता, म्नौ गौ हंसरुतं तथा ।

(२) भवेच्छुद्धविराड् वृत्तं प्रतिपादं मसौ जगौ ॥ ३ ॥

(३) पणवो मनया गः स्यात्, र्जौ र्गौ मयूरसारिणी ।

(४) मत्ता मभसगा वृत्तं, तजजा ग उपस्थिता ॥ ४ ॥

(५) रुक्मवती भमसगा, इन्द्रवज्रा ततौ जगौ ग् ।

(६) जतौ जगौ गूपपूर्वा, आद्यन्तावुपजातयः ॥ ५ ॥

(७) दोधकं भभभा गौ स्यात्, शालिनी मतता गगौ ।

(८) चतुःस्वरा स्याद्, भ्रमरविलसिता मभौ नलौ ग् ॥ ६ ॥

(९) समुद्रा अथ ऋषयो, र्नौ रलौ गो रथोद्धता ।

(१०) स्वागता रनभा गो गो, वृत्ता ननसगाश्च गः ॥ ७ ॥

(११) श्येनी रजरला गो वातोर्मी मभतगा गच ।

(१२) जगती, वंशस्था वृत्तं जतौ ज्रौ, अथ तौ जरौ ॥ ८ ॥

इन्द्रवंशा, तोटकं सै चतुर्भिः प्रतिपादतः ॥

(१३) भवेद् द्रुतविलम्बिता नभौ भरौ, अथो ननौ ॥ ९ ॥

(१४) म्यौ श्रीपुटो वसुवेदा, जलोद्धतगति र्जसौ ।

(१५) जसौ रसर्तवश्चाथ, ततं ननमराः स्मृतम् ॥ १० ॥

(१६) कुसुमविचित्रा न्यौ नो यो, मौ रौ स्याच्चलाक्षिका ।

(१७) भुजङ्गप्रयातं यैः स्याच्चतुर्भिः, स्रग्विणी च रैः ॥ ११ ॥

(१८) प्रमिताक्षरा सजौ सौ, कान्तोत्पीड़ा भमौ समौ ।

(१९) वैश्वदेवी ममयया: पञ्चाश्वा, नवमालिनी ॥ १२ ॥

(२०) नजौ भयौ प्रतिपादं गणा, अतिजगत्यपि ।

(२१) प्रहर्षिणी मनजरा गो यति र्वह्निदिशु च ॥ १३ ॥

(२२) रुचिरा जभसजगा च्छिन्ना वेदैर्ग्रहैः स्मृता ।

मत्तमयूरं मतयाः सगौ वेदग्रहे यतिः ॥ १४ ॥

(२३) गौरी ननमसा गः स्याद्, असम्बाधा मतौ नसौ ।

(२४) गो ग इन्द्रियनवकौ, ननौ रसलगाः स्वराः ॥ १५ ॥

(२५) स्वराच्चापराजिता स्यान्, ननभा नलगाः स्वराः ।

(२६) द्विः प्रहरणकलिता, वसन्ततिलका तभौ ॥ १६ ॥

जौ गौ, सिंहोन्नता सा स्यान् मुनेरुद्धर्षिणी च सा ।

(२७) चन्द्रवर्त्मा नननाः सो, मालर्तुनवकः स्मृतः ॥ १७ ॥

(२८) मणिगुणनिकरासौ, मालिनी ननौ मयौ यः ।

(२९) यति र्वसुस्वरा, भो रो नननगाः स्वरग्रहाः ॥ १८ ॥

(३०) ऋषभगजविलसितं, ज्ञेया शिखरिणी यमौ ।

(नृसौ भ्लौ ग ऋतुभी रुद्रैः; ह्यौ जसौ जसौ यलौ ।)

गो वसुग्रहविच्छिन्ना पिङ्गलेनेरिता पुरा ॥ १९ ॥

(३१) वंशपत्रपतितं स्याद् भरना भ्नौ लगौ सदिक् ।

(३२) हरिणी नसमा रः सो लगौ रसचतुःस्वराः ॥ २० ॥

(३३) मन्दाक्रान्ता मभनता स्गौ गब्धिरसस्वराः ।

(३४) कुसुमितलतावेल्लिता मतनाः ययौ स्वराः ॥ २१ ॥

(३५) रसाः स्वराः प्रतिपादं, मसजाः सततास्च गः ।

शार्दूलविक्रीड़ितं स्यादादित्यमुनयो यतिः ॥ २२ ॥

(३६) ख्यातिः, सुवदना मो रो भनया भलगाः स्वराः ।

(३७) यतिर्मुनिरसा चाथ, म्विति छन्दं क्रमात् स्मृतम् ॥ २३ ॥

(३८) स्रग्धरा मरभा नो यो यौ त्रिःसप्तका यतिः ।

(३९) मद्रकं भरना रो नो रनगा दृग्भास्कराः ॥ २४ ॥

(४०) अश्वललितं नजभा जभजा भलगौ यतः ।

(४१) मत्ताक्रीड़ा ममतना नौ नलौ गोऽष्टमतिथिः ॥ २५ ॥

(४२) तन्वी भतनसा भो भो नयौ वाणस्वरार्कतः।
(४३) क्रौञ्चपदा भमसभा नौ नौ ग् वाणशराष्टतः॥ २६॥
(४४) भुजङ्गविजृम्भितं ममतना ननरा सलौ।
(४५) गष्टवसुमुनिभिश्छेदो,ऽपवाहाख्यमीदृशम्॥ २७॥
(४६) मनना ननना नः सो गगौ ग्रहच्छतुरस्रात्।
(४७) नौ सप्त रो दण्डकः स्याच्चण्डवृष्टिप्रपातकम्॥ २८॥
(४८) रेफवृद्ध्यार्णार्णवौ स्यु र्व्यालजीमूतमुख्यकाः।
शेषे वै प्रचिता ज्ञेया गाथाप्रस्तार उच्यते॥ २९॥
इत्याग्नेये महापुराणे समवृत्तवर्णनं नाम त्रयस्त्रिंश-
दधिकत्रिशततमोऽध्यायः॥
आग्नेये छन्दःसारे सप्तमोऽध्यायः॥ ७॥

अग्निरुवाच,—

(४९) छन्दोऽत्रासिद्धं गाथा स्यात्, पादे सर्वगुरौ तथा।
(५०) प्रस्तार आद्यगोऽधो लः परतुल्योऽथ पूर्वगः॥ १॥
(५१) नष्टमध्ये समेऽङ्के लः समेऽर्धे विषमे गुरुः।
(५२) प्रतिलोमगुणं लाद्यं द्विरुद्दिष्टक एकयुत्॥ २॥
(५३) सङ्ख्या द्विरर्धे, रूपे शून्यं, शून्ये द्विरीरितम्।
(५४) तावदर्धे तद्गुणितं, द्वि द्विरूनन्तु तदन्ततः॥ ३॥
परे पूर्णं परे पूर्णं मेरुः प्रस्तारतो भवेत्।
(५५) लगसङ्ख्या वृत्तसङ्ख्या चाध्याङ्गुलमधोर्ध्वतः॥
(५६) सङ्ख्यैव द्विगुणैकोना छन्दःसारोऽयमीरितः॥ ४॥
इत्याग्नेये महापुराणे प्रस्तारनिरूपणं नाम चतुस्त्रिंश-
दधिकत्रिशततमोऽध्यायः॥
आग्नेये छन्दःसारेऽष्टमोऽध्यायः॥ ८॥

समाप्तश्च।

श्रीनारायणभट्टविरचितया व्याख्यया

सहितम्

वृत्तरत्नाकरम् ।

अनुक्रमः ।

Explanations.

A. Taranatha Tarkavacaspati's edition.

B. Beneres Edition with Hari Bhaskara's commentary.

D. The ordinary Beneres Edition.

P. Visvanatha Shastri's edition of Pingala with Halayudha.

Pra. or प्रा० पि०. Prakrta Pingala with Ravikara's commentary lent by a Beneres Pandit.

( ) indicates that such passages have been supplied by me.

सटीकं वृत्तरत्नाकरम्।

श्रीगणेशाय नमः। श्रीगुरुभ्यो नमः।

नत्वा गणेशं वाग्देवीं पिङ्गलं मातरं गुरुम्। अन्यानपि च भाष्यादिकर्तृंश्छन्दोविशारदान्॥ १॥ श्रीभट्टरामेश्वरसूरिसूनु र्नारायणः स्वामनिवेश्य बुद्धिम्। संक्षेपवृत्त्या विवृतिं सुवृत्तरत्नाकरे व्यक्ततया तनोति॥ २॥ विशिष्टशिष्टाचारमूलभूत "स्वस्ति न इन्द्रो वृद्धश्रवा" इत्यादिवैदिकलिङ्गकल्पितश्रुतिप्रमाणकविशिष्टेष्टदेवतानमस्कारजनितनिर्विघ्नतादिः स्वनामकीर्त्तनपूर्व्वकं स्वग्रन्थस्य ग्रन्थान्तरैरधिगतार्थतांश्च सूचयन् सप्रयोजनं कर्त्तव्यं सामान्यज्ञानपूर्व्वकविशेषजिज्ञासुप्रवृत्तिसिद्ध्यर्थं सामान्यतः प्रतिजानीते सुखेत्यादिश्लोकत्रयेण।

सुखसन्तानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्च्चितम्।
गौरीविनायकोपेतं शङ्करं लोकशङ्करम्॥ १॥
वेदार्थशैवशास्त्रज्ञः * पव्वेकोऽभूद्द्विजोत्तमः। * पठेत्रकः। A.
तस्य पुत्रोऽस्ति केदारः शिवपादार्च्चने रतः॥ २॥
तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम्।
वृत्तरत्नाकरं नाम बालानां सुखसिद्धये॥ ३॥

ब्रह्माच्युताभ्यां विधातृविष्णुभ्यां अर्च्चितं पूजितं गौर्य्या पार्व्वत्या विनायकेन गणाधिपेन चोपेतं लोकानां चतुर्द्दशभुवनानां भूरादीनां सप्तानां वा शङ्करं सुखकर्त्तारं एवंविधं शङ्करं महादेवं सुखसन्तानसिद्ध्यर्थं

प्रणामजनिताविघ्नतादिसम्भूताव्याकुलीभाववृद्धिवैभवादिजनितसुखपरम्परा-प्राप्त्यर्थं तेन केदारेण इदं छन्दः क्रियत इति तृतीयश्लोकेनान्वयः। वेदानाम् ऋगादीनामर्थं शैवशास्त्राणि च रुद्रयामलादीनि जानातीत्येवंविधः पव्ये-कसंज्ञो द्विजोत्तमो ब्राह्मणोत्तमोऽभूत्। तस्य पुत्रः केदारनामा शिवचरणा-रविन्दपूजनतत्परोऽस्ति लक्ष्योदाहरणेन मात्रावर्णान्यतरनियतात्मकेन छन्दसा लक्षणेन च तन्नियमकथनात्मकेन छन्दसा तदभिन्नेन युक्तं लक्ष्यमेव लक्षणमिति विग्रहः वृत्तरत्नानामाकरः खनि र्यत्र तत् यद्वा आकरः समूहो यत्र 'आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु' कथ्यते इति विश्वप्रकाशोक्तेः। एतयैवान्वर्थसंज्ञया नाम प्रसिद्धं छन्दस्तत्प्रतिपादकत्वाल्लक्षितं तच्छास्त्रं बालानां छन्दः-शास्त्राज्ञानानां सुखेनाल्पोपायेन सिद्धये छन्दोज्ञानार्थं क्रियत इत्यर्थः। सुख-पदस्य प्रथमप्रयोगादेतच्छ्रवणेन श्रोतॄणां सुखातिशयः सूचितः। यद्वा बाल-प्रतिपत्तेः प्रयोजनत्वेऽपि स्वप्रयोजनत्वाभावादेतद्ग्रन्थजनितबालव्युत्पत्ति-जनितोपकारादृष्टेन जनिष्यमाणस्वर्गादिसुखपरम्परैव स्वेष्टस्य ग्रन्थप्रयो-जनत्वेनानेन निर्दिश्यते। ब्रह्मविष्णुगौरीविनायकम् तेन मङ्गलान्तरं तदनु स्मृतिसंरूपं सूचितम्। शङ्करमित्यत्र शंशब्दस्याव्ययत्वाद्विभक्त्यन्तत्वाभा-वात् सुपो धातुप्रातिपदिकयोरिति न भवति। द्विजोत्तमग्रहणेन च ब्राह्मण-कर्त्तृत्वादेतस्य ग्रन्थस्य श्रवणे दोषाभावः सूचितः। लक्ष्यत्यादीनां लक्ष्येभ्यः काव्यादिभ्यः केवललक्षणेभ्यश्च सूत्रादिभ्यो भिन्नलक्ष्यलक्षणेभ्यश्च वृत्तादिभ्यो ऽतिशय इति सूचितः। एवं सामान्यतो ग्रन्थकरणं प्रतिज्ञाय पूर्व्वाचार्य्योक्ति-मूलकतया स्वकल्पिततांशङ्काजनितश्रोतृनादरं निराकर्त्तुं प्रतिपाद्यमर्थं-विशेषतः प्रतिजानीते।

पिङ्गलादिभिराचार्य्यैर्यदुक्तं लौकिकं द्विधा।
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥ ४ ॥ इति।

पिङ्गलेन सूत्रकर्त्त्रा आदिपदाद् भाष्यकारादिभिश्चाचार्य्यैरवधेय-वचनै र्यल्लौकिकं छन्दो मात्रावर्णविभेदेन इदं मात्राच्छन्द आर्य्यादि इदं

वर्णच्छन्दः समान्यादीति भेदेन द्विधा द्विप्रकारमुक्तं तच्छन्द इह ग्रन्थे कथ्यत इत्यर्थः। लौकिकशब्देन वेदवेदाङ्गानधिकारिणामत्रैवर्णिकानामप्यस्मिन् ग्रन्थे अधिकार इति दर्शयति। मात्रावर्णग्रहणेन मात्राच्छन्दो गणच्छन्द इति केश्चिदुक्तो द्वेधा विभागः पराकृतः,ताहशविभागे च गणच्छन्दसामपि संग्रहादिति भावः। अन्यत्र तु गणमात्राक्षरच्छन्दस्त्वेन त्रैविध्यमाहुः यदुक्तं "आदौ तावद्गणच्छन्दो मात्राच्छन्दस्ततः परम्। तृतीयमक्षरच्छन्दश्छन्दस्त्रेधा तु लौकिकम्"इति। गणच्छन्द आर्यादि, मात्राच्छन्दो वैतालीयादि, अक्षरच्छन्दः समान्यादीति अन्यकर्तृकसम्भावितच्छन्दोऽन्तःप्रक्षेपनिक्षेपनिराकरणाय ग्रन्थं परिमाणतः परिच्छिनत्ति॥

षड़ध्यायनिबद्धस्य छन्दसोऽस्य परिस्फुटम्।
प्रमाणमिह विज्ञेयं षट्त्रिंशदधिकं शतम्॥ ५॥ इति।

परि समन्तात् साकल्येन स्फुटं प्रकटं यथा स्यात्तथा षड्भिरध्यायैर्निबद्धस्य घटितस्यास्य छन्दसः छन्दोग्रन्थस्य छन्दोरत्नाकराख्यस्य षट्त्रिंशदधिकं षट्त्रिंशत्संख्याधिकं द्वात्रिंशदक्षराणामनुष्टुप्छन्दसां श्लोकानां १३६ परिमाणं ज्ञेयम्। अनुष्टुप्श्लोकपरिमाणमेवात्र गृह्यते, ग्रन्थगणनायां लोके तस्यैव प्रसिद्धत्वात्। एतेनान्यतरग्रन्थपाठे प्रयासाभावाद्विस्तीर्णभाष्यखट्टत्रादिग्रन्थप्रयासनैरपेक्ष्येणैव प्रसिद्धसकलच्छन्दोज्ञाननिरतैर्बुभुत्सुभिरयमेव ग्रन्थोऽभ्यसनीय इत्युक्तं भवति। इदानीं सकलवाङ्मयव्यापित्वेन मादीन् गणान् स्तुवन् लक्षणकथनार्थमुद्दिशति॥

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥ ६॥ इति।

मगण यगण रगण सगण तगण जगण भगण नगण गुरुभिर्लान्तैर्लघुयुक्तैरेभि र्दशभि र्गणाष्टकगुरुलघुरूपैरक्षरैः समस्तं वाङ्मयं वाग्जालं व्याप्तमस्तीति शेषः। अत्रोपमा विष्णुना त्रैलोक्यं यथा व्याप्तं तद्वत्। अत्र स्वरोच्चारणसौकर्यार्थम्, एवमुत्तरत्रापि। वक्ष्यमाणाक्षरप्रस्तारक्रमोपक्रमनिर्देश-

कम्रत्वानुरोधेनायं क्रमं भङ्क्त्वा। "धी श्री स्त्री म्" "वरा सा य्" "का गुहा र्" "वसुधा स्" "सा ते क्व त्" "कदा स ज्" "किं वद भ्" "न हसन्" "गृ ल्" इति क्रमेण गणान् लक्षयति॥

सर्व्वगुर्मो मुखान्तर्लौ यरावन्तगलौ सतौ।

मध्याद्यौ ज्भौ त्रिलोनोऽष्टौ भवन्त्यत्र गणास्त्रिकाः॥ ७॥ इति।

अत्र छन्दःशास्त्रे अष्टौ त्रिकास्त्र्यक्षरा गणा भवन्ति चतुरक्षरा गणा मा भूदिति त्रिका इत्युक्तम्। परिभाषेन तानाह सर्व्वेति, सर्व्वे गवो गुरवो यस्मिन्नसौ सर्व्वगुः, नामैकदेशे नामग्रहणमिति न्यायेन गुशब्दो गुरुवाची एवं लशब्दो लघुवाची एवं सर्व्वत्र, मः मगणः। मुखे आदौ अन्तर्मध्ये लो लघुर्ययो-स्तौ यरौ यगणरगणौ। अन्ते गलौ गुरुलघू ययो स्तौ क्रमेण सतौ सगणतगणौ। ग् गुरुर्मध्य आद्यश्च ययोस्तौ ज्भौ जगणभगणौ। त्रिलस्त्रिलघुर्नः नगणः। एतेषां प्रस्तारो यथा, मः ऽऽऽ, यः।ऽऽ, रः ऽ।ऽ, सः ।।ऽ, तः ऽऽ।, जः ।ऽ।, भः ऽ ।।, नः ।।। एतेषां क्रमनियमश्च प्रस्तारे प्रकटीभविष्यति॥ अन्य-त्रापि मादीनां स्वरूपमुक्तम्॥ "मस्त्रिगुरु स्त्रिलघुश्च नकारो भादिगुरुः पुन-रादिलघु र्यः। जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥" इति। अन्यैस्तु देवताफलस्वरूपाण्येषामुक्तानि "मो भूमिस्त्रिगुरुः श्रियं दिशति, यो वृद्धिं जलञ्चादिलो, रोऽग्निर्मध्यलघु र्विनाशमनिलो देशाटनं सोऽन्त्यगः। तो व्योमान्तलघु र्धनापहरणं, जोऽर्को रुजं मध्यगो, भश्चन्द्रो यश उज्ज्वलं मुखगुरु र्नो नाक आयुस्त्रिलः" इति॥ इदञ्च फलं काव्यनाटकस्य तत् कर्त्तुः पठितु र्वा यथायोगं व्यस्तं समुचितं वा ज्ञेयम्। यत्र नायकादिभिः प्राचीनो देवतादिः स्वकल्पितो वात्र कर्त्तुः श्रोतॄणाञ्चेत्यादि। क्वचित्तु देवता-मात्रकवादि "पृथ्वी जलशिखिवायुगगनं सूर्यश्चन्द्रमा नाकः। प्रस्तारक्रमवशतो देवा ज्ञेया यथासङ्ख्यम्" इति। अथ यदि दैवाद् दुष्टफलो गणः काव्यादौ कृतः तद्रक्षणार्थं द्वितीयो गणः शोध्यः तत्र मगणनगणौ मित्रसंज्ञौ भगणयगणौ भृत्यौ जतावुदासीनौ रसावरी नीचौ च। तदुक्तं "मनौ मित्रे भयौ भृत्यावुदा-

सोनौ जतौ स्मृतौ। रसावरौ नौचसंज्ञौ ज्ञेयावेतौ मनीषिभिः" इति।
तथा च यदि मित्रगणान् मित्रगणस्तदा समृद्ध्यादि फलम्, मित्रगणाद् भृत्यगणो
जयादिशुभम्, मित्रादुदासीने शून्यकम्, मित्राच्छत्रौ बन्धुपीड़ा, भृत्या-
न्मित्रे तु सर्व्वकार्यसिद्धिः, भृत्याद्भृत्ये सर्व्वो लाभः, भृत्यादुदासीने
धननाशः। भृत्याद्वैरिणि शोकः। उदासीनान्मित्रे किञ्चिदेव कार्यसिद्धिः,
उदासीनाद् भृत्ये सर्व्वं वशाः, उदासीनादुदासीने न शुभं न चाशुभम्,
उदासीनाच्छत्रौ स्वजनवैरम्, (शत्रो र्मित्रे भ्रमः,) शत्रो र्भृत्ये गृहिणीनाशः,
शत्रोरुदासीने स्वकुलक्षयः, शत्रोः शत्रौ काव्यनायकनाशो भवति इति गण-
गुणफलम्। तदुक्तं "मित्रान्मित्रादयः स्युर्यदि धनमुदयं शून्यकं बन्धुपीड़ा
भृत्यान्मित्रादयश्चेद् द्युतिमधिकगुणं हानिशोकौ च कुर्युः। औदासयार्थाच्च
मित्रादय इह कुसखा धैर्यमीषत् स्ववैरं शत्रो र्मित्रादयश्चेद्भ्रममथ गृहिणी
नाशमाधिं विनाशम्॥" इति। तथा "मित्रान्मित्रं विधत्ते प्रचुरधनमथो
मित्रतो भृत्यसंज्ञः स्थैर्यं मित्रादुदासो न किमपि च फलं मित्रतः शत्रुसंज्ञः।
बन्धोः पीड़ामथो स्याद्यदि खलु नियतं भृत्यतो मित्रसंज्ञः सर्वं कार्यं च भृ-
त्याद् भृत्यगण इह चेद्दायतिः सर्वलोके॥ भृत्याच्चेत् स्यादुदासो धनविगममथो
भृत्यतः शत्रुसंज्ञः शोकं कुर्य्यादुदासाद् यदि भवति तदा मित्रसंज्ञोऽल्पका-
र्यं। तस्माद्भृत्यः प्रभुत्वं तत इह सततं स्यादुदासोऽपि नाशं तस्माच्छत्रुः
स्ववैरं विविधगुणहरं सर्वसत्कार्यनाशम्॥ शत्रो र्मित्रञ्च शून्यं यदि भवति
ततो भृत्यसंज्ञो गृहिण्या नाशं तस्मादुदासो धनहरमधिकं दुःखदारिद्र्य-
शोकम्॥ शत्रोः शत्रु र्भवेच्चेद् द्विगुणसमहितो नायकस्यैव नाशं देशोद्वासं
विधत्ते कथयति च फलं पिङ्गलो नागराजः" इति। अत एव किरातमाघनैष-
धीयेषु दुष्टफलादपि उदासीनाज्जगणादुदासीनस्य तगणस्य सत्त्वान्न मन्दं न
चाशुभमिति दोषाभावः। अथ गणशुद्धिप्रसङ्गाद्वर्णशुद्धिर्विचार्य्यते। तच्छुद्धौ हि
नायकादीनां सुखं भवति। तदुक्तं "अक्षरे परिशुद्धे तु नायको भूतिमृच्छति।"
इति। तत्र ङ झ ञ ट ठ ढ ण प फ व भ म र ल व ष ह लान् संयुक्ताक्षराणि
च विहाय शेषाक्षराणि शुभफलानीति संक्षेपः। तदुक्तं भामहेन "अवर्णात् संप-

त्ति र्भवति मुदिवर्णाद् धनशतान्यवर्णाद्ख्यातिः सरभसमृवर्णाद् विरहितात्। तथा ऐश्च सौख्यं ङ ञ णरहितादच्वरगणात्। पदादाविन्यासात् भ र ब ह ल पूर्वं विरहितात्॥ कः खो गो घ श्च लक्ष्मीं वितरति न यशो ङ स्तथा चः सुखं छः प्रीतिं जो मित्रलाभं भयमरणकरौ झ्ञौ टठौ खेददुःखे। डः शोभां ढो विशोभां भ्रमणमथ च ण स्तः सुखं थश्च युद्धं दो धः सौख्यं मुदं नः सुखभयमरणक्लेशदुःखं पवर्गः॥ यो लक्ष्मीं रश्च दाहं व्यसनमथ लवौ शः सुखं षश्च खेदं सः सौख्यं हश्च खेदं विलयमपि च लः क्षः समृद्धिं करोति। संयुक्तं चेह न स्यात् सुखमरणपटु वर्णविन्यासयोगः पद्यादौ गद्यवक्त्रे वचसि च सकले प्राकृतादौ समोऽयम्॥" इति। तथा दुःखदारिद्र्यवाचकाः शब्दाश्चादौ न प्रयोज्याः। अयञ्च प्रयोगनिषेधः काव्यादौ उक्तः श्लोके चादौ ज्ञेयः। देवतादिवाचकशब्दे तु गणविचारेऽक्षरविचारे दोषाभावः। तदुक्तं भामहेनैव "देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि च" इति। तथाच माघकिरातयोर्जगणसंयोगयोः प्रयोगेऽपि श्रीशब्दप्रयोगाद्दोषाभाव इत्यलं भूयसा प्रसक्तेन, प्रकृतमनुसरामः। इदानीं मात्राच्छन्दःसूपयोगिनो गणानाह॥

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः॥ ८॥ इति।

अत्रार्यादिषु छन्दःसु स्थिताश्चतुष्कलाश्चतुर्मात्राः पञ्चगणा ज्ञेयाः। प्राक-ख्याय स्वरूपतस्तानाह सर्वेति। सर्वत्रान्ते मध्ये आदौ च गुरुर्येषां ते तथा कथंभूताः चतुर्लघुना गणेनोपेताः युक्ताः। तत्र चतुर्मात्रिकत्वात् सर्वगुरुर्द्विगुरुर्लभ्यते यथा सर्वगुरुः ऽऽ, अन्त्यगुरुः ।।ऽ, मध्यगुरुः ।ऽ।, आदिगुरुः ऽ।।, चतुर्लघुः ।।।।, अयं गणक्रमः आर्यानष्टोद्दिष्टयोरुपयोगीति तत्रैव वक्ष्यति। पञ्चकलादयस्तु प्राकृतप्रक्रमे वक्ष्यन्ते, संस्कृतेऽनुपयोगात्। गणान् संलक्षयित्वा गुरुं लक्षयति॥

सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।
वा पदान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यमात्रिको लृजुः ॥ ९ ॥ इति।

असौ वर्णो ग् गुरु र्ज्ञेयः॥ कोऽसावित्यपेक्षायामाह सानुस्वार इति अनुस्वारेण युक्तः अं कमित्यादिः विसर्गान्तः अः कः इत्यादिः दीर्घः आकारइत्यादिः। इदं च तस्याप्युपलक्षणं। युक्तपरः युक्तः संयुक्तः परो यस्य स संयोगे परभूते यः पूर्वः सोऽपि गुरुरित्यर्थः, यथा विष्णुरित्यादौ विशब्दादिः। पादान्ते श्लोकचरणान्तेऽनुवर्त्तमानो लघु गुरु र्वा भवति लघ्वपेक्षिते लघु कार्यं गुरावपेक्षिते गुरु कार्यं करोतीत्यर्थः। अयञ्च व्यवस्थितविकल्पः तेन "अथ वासवस्य वचनेन" इत्यादौ वचनादिपदान्तस्य लघुतैव। "तस्याः खुरन्यासपवित्रपांसुम्" इत्यादौ च गुरुतैव। युक्तपरश्च इति व्यञ्जनोपाध्मानीयजिह्वामूलीयपराणामुपलक्षणं। तथा च "तनुवाग्विभवोऽपि सन्। मन्दः कवियशःप्रार्थी" इत्यत्र वमादिषु सकारस्य जिह्वामूलीयोपध्मानीयपक्षे च दकारशकारयोर्गुरुत्वं सिद्धं भवति। इतरथा नकारस्य पादान्तत्वात् सकारस्य न प्राप्नोति जिह्वामूलीयोपध्मानीययोश्च संयोगत्वाभावाद् दकारशकारयो र्न प्राप्नोति। तदुक्तं "दीर्घं संयोगपरं तथा प्लुतव्यञ्जनन्तामूष्मान्तम्। सानुस्वारञ्च गुरु क्वचिदवसानेऽपि लघ्वन्त्यम् ॥" इति। व्यञ्जनपरस्य गुरुत्वाल्लघ्वन्तपादेषु समान्यादिषु व्यञ्जनान्तः पादो न कार्यः। ननु संयोगे गुरु दीर्घञ्चेति वदता पाणिन्याचार्येण पादान्तस्थादीनां गुरुसंज्ञायामनुक्तत्वात्तद्विरोधः इति चेत् नैवं कुण्डा ऊण्डा इत्यादिषु "गुरोश्च हलः" इत्यकारप्रत्ययस्य ईहाञ्चक्रे ऊहाञ्चक्रे इत्यादिषु च "इजादेश्च गुरुमतोऽनृच्छः" इति आम्प्रत्ययस्य सिद्ध्यर्थं स्वशास्त्रे संयोगदीर्घयो र्गुरुत्वं पाणिनिः प्रत्यज्ञासीत्। अन्यैस्तु स्वशास्त्रे प्रयोजनाभावान्नोचे इति न किञ्चिदेतत्। वृत्तिकारस्तु "गन्ते" इति सूत्रे वाशब्दाश्रवणात् सर्वत्र पादान्तस्थस्य लो गु र्भवतीति व्याचख्यौ तदयुक्तं। गुरुलघुभ्यां लघुभिरेव च समाप्तयोः समानीगीत्यार्ययो र्व्यभिचारात्। अथ तत्र लघुसमाप्तिविधायकशास्त्रेण विशेषात्मकेन सामान्यस्यास्य बाध

इति मतं तदपि न सिद्धं। न हि लघुना समाप्ति विधीयते न तु समाप्तिस्थस्य लघुत्वं येन बाधः स्यात् गन्ते इति सूत्रन्तु अन्ते पदान्ते स्थितो लघुः क्वचिद्गुरुरिति क्वाचित्कत्वाभिप्रायं व्याख्येयं। तेन न तद्विरोध इत्यलं प्रपञ्चेन। स च प्रस्तारे वक्रः नागराक्षरेऽकारप्रश्लेषचिह्नवत् (ऽ) ज्ञेयो लेख्यः,अन्यः पूर्वोक्तेभ्यः सानुस्वारादिभ्योऽन्यः ल् लघुः। कोऽसावन्यमात्रिकः मात्रारूपः एतेन गुरोर्द्विमात्रत्वमुक्तम् भवति। स प्रस्तारे कर्त्तव्ये ऋजुः रेखाकारः कार्यः (।)। संयोगपरस्य क्वचिदपवादमाह॥

पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः।

पुरा स्थितेन तेन स्याल्लघुतापि क्वचिद्गुरोः॥१०॥ इति॥

इह छन्दःशास्त्रे पादादौ चरणादौ वर्णान्तरेण संयोगः क्रमसंज्ञकः पूर्वाचार्यैरुक्त इति शेषः। तेन पादादिसंयोगेन पुरःस्थितेन क्वचिदपेक्षितविषये संयोगपरत्वाद् गुरोरपि लघुता स्यात् "वा पादान्ते" इत्यत्र पादान्ते लघो र्गुरुत्वं इह तु गुरोर्लघुत्वमिति न पौनरुक्त्यमिति भावो वक्ष्यते। गुरो र्लघुतायामुदाहरणं साम्प्रतमाह॥

तरुणं सर्षपशाकं नवोदनं पिच्छिलानि च दधीनि।

अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति॥ ११॥ इति।

अस्य पूर्वश्लोकार्धस्य अत्र ग्राम्यनागरिकवरागमे ग्राम्य वरेसाभिलाषां चतुरवधूं निन्दागर्भस्तुत्या निवारयन्ती सखीआह। हे सुन्दरि ग्राम्यजनो ग्रामीणो जनो अल्पव्ययेन मिष्टं रसवदन्नमश्नाति भुङ्क्ते किं तत् तरुणं कोमलं सर्षपानां शाकं नवानां तण्डुलानामोदनं च अपर्युषितौदनं पिच्छिलानि बहुलानि दधीनि अल्पद्रव्यो मिष्टाभासभोजी ग्राम्यजनोऽचतुरोऽर्थः। हे सुन्दरि अतोऽमुं परित्यज्य नागरिके साभिलाषा भवेत्यत्र ध्वन्यं। अत सुन्दरीत्यत्र संयोगपरत्वाद्गुरुत्वे सति तृतीये पादे त्रयोदश मात्रा माभूदिति लघुत्वं प्रतिज्ञायते तथा च द्वादशमात्रतैवेति भावः। क्वचिदिति व्यवस्थितविकल्पार्थं तेन सुन्दरीत्यत्र लघुतैव। गुणिनामपि निजरूपप्रतिपत्तिपरत एवं संभ-

यन्ति। "स्तनयुगमश्रुस्नातं समीपतरवर्त्ति हृदयशोकाग्नेः। चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्॥" इत्यादौ गुरुतैव। आर्य्यामुदाहरता आर्य्यायास्तु पादव्यवस्थाभावं वदन्तो वृत्तिकृतः परास्ताः। अत एव त्रिभिस्त्रिगणैः पादौ आर्य्यायाः विषमौ स्मृताविति, यस्याः पादे प्रथम इत्यादि चाभियुक्तैरुक्तं पथ्याभिप्रायं वा तत्र पादव्यवस्थाया वक्ष्यमाणत्वात्। ननु वा पदान्ते इत्यत्र वर्णमात्रस्य वा पादान्तस्थस्य गुरुता विकल्प्यते, गुरोरेव वा नित्यप्राप्ता सा विकल्प्यते, लघोरेव वा। नाद्यः पादान्तवर्णमात्रस्य तेनैव गुरुताविकल्प-पक्षे लघुत्वस्यापि सिद्धत्वात् पादादावित्यस्य वैयर्थ्यप्रसङ्गात्, लघ्वंशे अप्राप्तविकल्पः गुर्वंशे प्राप्तविकल्प इति विरुद्धार्थद्वयकृतवाक्यभेदप्रस-ङ्गाच्च। न द्वितीयः तेनैव पाक्षिकलघुतायाः सिद्धौ पुनर्विधानवैयर्थ्यात्, तरुणमित्युदाहरण एव द्वितीयचतुर्थपादान्तयो र्लघ्वो र्गुरुत्वाभावे छन्दो-भङ्गप्रसङ्गाच्च। न तृतीयः लघोस्तत्राप्रस्तुतत्वात्, असंयोगपरस्यापादान्त-गुरोरक्रमपरत्वात्पाक्षिकलघुत्वाभावप्रसङ्गाच्चेति चेत्, अत्र पादान्तवर्ण-मात्रमुद्दिश्य विकल्पितं गुरुत्वं तेन विधीयते इति विधेयोद्देश्ययोरैकाव-च्छेदार्थद्वयस्यार्थसिद्धत्वाद् वाक्यभेदाभावः पौरुषेयत्वाद्वा स न दोषः। पादादाविति च तस्यैव विषयं प्रदर्शयद्विवरणं तरुणमित्यादिषु गुरोर्लघुतायां तृतीयपादे उदाहरणं लघो र्गुरुतायाश्च द्वितीयचतुर्थपादयोरुदाहरणमित्या-पातत उत्तरं भवति। वस्तुतस्तु अप्रस्तुतस्याप्यर्थतो बुद्धिस्थस्य लघोरेव गुरुता तेन विकल्प्यते। पादान्तगुरोस्तु लघुता संयोगपरस्यैवेत्यनेनैवो-च्यते। अक्रमपरस्य तु पादान्तगुरो र्लघुता नेष्टैव अतएव "गन्ते" इति सूत्रे "गृल्" इति पूर्वसूत्राद्ग्रहणमनुवर्त्य गृशब्दोपलक्षितस्य क्रस्याक्षरस्य पादान्ते वर्त्तमानस्य गुरुसंज्ञा निर्दिश्यते इति वृत्तिकारे-णोक्तम्। इदं च गुरो र्लघुत्वं संयोगनिमित्तकगुरोरेव न दीर्घादेः। अत्र सोदाहरणो मामकः संग्रहश्लोकः 'युक्तपरत्वनिमित्तकप्रान्तगुरोरेव वेष्यते लघुता। पादान्तस्थस्य लघोरिह गुरुता वेष्टस्य जानीहि' इत्यलं प्रपञ्चेन। इदं चोपलक्षणं प्रशब्दे क्रशब्दे च परतोऽपादान्तस्यापि लघुतायाः

कविप्रयोगे दर्शनात् । तथाच कुमारसंभवे 'गृहीतप्रत्युद्गमनीयवस्त्रा' इति प्रशब्दे परतस्तत्र लघुता दृष्टा । 'प्राप्तनाभिह्रदमज्जनमाशु' इति । अन्यत्रापि, 'तवक्रियापक्रियो मम ह्रीरभूत्' इति ह्रशब्दे परतो लघुता दृष्टा । अन्यत्र तु संयोगमात्रे परभूते लघुत्वमतीवप्रयत्नतयैवेत्याहुः । अतएव सरस्वतीकण्ठाभरणे उक्तं "यद्वातीव्रप्रयत्नेन संयोगादेरगौरवं । न छन्दोभङ्गमित्याहुस्तदा दोषाय सूरयः ॥" इति । तथाच कविप्रयोगाः । रामायणे 'कृतार्थाश्च कृतार्थानां मित्राणां न भवन्ति ये । तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते' इति । 'एवं तदार्या रघुवीरसिंह सीता वचः प्राह विषादयुक्तम् । एतच्च श्रुत्वा गदितो मया त्वं सीतोपलम्भ प्रकुरुष्व यत्नम्' इतिच । 'तव क्रियापक्रियो मम ह्रीरभूद्धरिगृहे विह्वला न धृता ततः । बकुलश्यामरमेचकतामसं मम प्रिये क्व समेष्यति मो द्रुमः' इति च । अन्यच्च 'धनप्रदानेन श्रुतेन कर्णः' इत्यादि । प्राकृतेऽपि "जह णहाउं ओइण्णो अह्मन्तमुल्हसिअसंसुअद्धन्तं । तह अणह्रा ओसि तुमं सच्छे गोलाणईतूहे" इति । अत्र द्वितीयैकादशत्रयोविंशतितमवर्णानां संयोगपरत्वाद्गुरुत्वेऽपि ण्हल्हह्रादिसंयोगस्यातीवतीव्रप्रयोगोच्चारणेन पूर्वस्य लघुतायां न छन्दोभङ्गो भवति । इदंच महाकविप्रयोगदर्शने भवति न तु स्वेच्छया । अत एवाहुः, 'क्वचिदपि संयुक्तपरो वर्णो लघुरत्र दर्शनेन यथा । परं क्रसति चित्तधैर्यं द्वारकटाक्षेषु निर्वृतमिति' । तीव्रप्रयत्ने तु गुरुतैव 'अथ प्रजानामधिपः प्रभाते' इत्यादौ । तथा इं हिं उं ङ्काराणां एकारौकारयोश्च केवलयोः सव्यञ्जनयोर्वा प्राकृतादिभाषासु विभाषागुरुता भवति । तदुक्तं "इहिकारौ बिन्दुयुतौ एओ शुद्धौ च वर्णमिलितौ च । रहयोर्वर्णसंयोगे सविभाषं सर्वमेव लघु ॥" इति । अत्र इहिकाराविति उपलक्षणं । इं हिं ए ओ एतेषूदाहरणं 'माणिणि माणेहिं काइं फलं एओ जे चरणमिलिउ कन्त । सहजे भुअङ्गमु जइ णमइ, तह किं करिअ मणिमन्त ॥' अत्र इं हिं ए ओ इत्येतेषां लघुतायां दोहाछन्दसोऽधिकमात्रताप्यपदेत्यत इह व्यञ्जनसंयोगे उदाहृतं तथा प्राकृतादिषु

दीर्घस्यापि त्वरितपाठे लघुता। तथा द्वयोस्त्रयाणां वा वर्णानां त्वरितपाठे एकवर्णता भवति। तदुक्तं "दीर्घाक्षरमदीर्घाक्षरमपि जिह्वा द्रुतं चेत्पठति तदपि भवति लघु। द्वौ वा त्रीनथ वर्णानेकं जानीहि शीघ्रपठनाच्च" इति। अत्रोदाहरणमूह्यम्। अयं प्राकृतविचारः पञ्चमाध्यायान्तर्गतमात्राप्राकृतच्छन्दःसूपयोगाय कृत इत्यलं बहुना॥ परिभाषान्तरमाह।

अब्धिभूतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः।
ज्ञेयः पादश्चतुर्थांशो यतिर्विच्छेदसंज्ञितः॥ १२॥ इति।

लोकतो लोकव्यवहारादब्ध्यादीनां संज्ञाः संज्ञीभूताः चतुरादिसंख्या इति यावत् ज्ञेया यतिनियमेषु। तद्यथा अब्धयश्चत्वारः ४ भूतानि पञ्च ५ रसाः षट् ६॥ आदिपदादश्वा मुनयश्च सप्त ७, वसवो नागाश्चाष्टौ ८, ग्रहा नव ९, दिशो दश १०, रुद्रा एकादश ११, आदित्या द्वादश १२ इत्येवमादि ज्ञेयम्। अब्ध्यादिशब्दाः स्वपर्यायाणां स्वार्थसङ्ख्यासमानसङ्ख्यार्थानाञ्चाप्युपलक्षकाः। तेन समुद्रवेदादयोऽपि लोकतो ज्ञेयाः। तथा छन्दःशास्त्राच्छन्दश्चतुर्थांशश्चतुर्थो भागः पादो ज्ञेयः। पादादिव्यवहारेषु अंशः समचतुर्थोऽत्र न ग्राह्यः किन्तु यावान् यत्रोक्तः। तथाच समानां विषमाणां चोक्तादीनां पादाः संगृहीता भवन्ति। पादशब्दः स्वपर्यायाणामङ्घ्रिचरणादीनामुपलक्षकः। तथा यतिः यतिशब्दो विच्छेदे विरामे संज्ञितः परिभाषितः संज्ञाकृतो ज्ञेयः। संज्ञितेति पाठे यतिशब्दसामानाधिकरण्यात् स्त्रीलिङ्गता ज्ञेयेति विपरिणततानुषङ्गः। इयञ्च यतिः श्रुतिसौकर्यार्थं नियतस्थानेषु कार्या। यतिनियमस्थानानि च वृत्तकारैः संगीतानि "यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः। समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके॥ १॥ क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत्। यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ॥ २॥ पूर्वान्तवत् स्वरसन्धौ क्वचिदेव परादिवत्। एष्यो यतिचिन्तायां यणादेशः परादिवत्॥ ३॥ नित्यं प्राक्पादसम्बन्धा-

चादयः प्राक्पदान्तवत् । परेण नित्यसंबद्धाः प्रादयश्च परादिवत् ॥ ४ ॥" इति । तेषामर्थं उदाहरणेन स्पष्टीक्रियते । यतिः सर्वत्र पादान्ते इत्यस्योदाहरणं 'अत्र मे सखि शिखण्डमण्डने पुण्डरीककमनीयलोचने । श्यामतामरसदामकोमले रामनामनि मनो मनोरमे" इत्यादि । प्रत्युदाहरणं तु "नमस्तस्मै । महादेवाय शशाङ्कार्धधारिणे" इत्यादि । श्लोकार्धे तु विशेषत इत्यस्योदाहरणम् पूर्वोदाहरणे दर्शीनि अत्यव्यये-नेत्यत्र । सन्धिर्न भवति स्पष्टविभक्तिकता च भवतीति विशेषः । सन्धौ प्रत्युदाहरणं 'श्यामा कामाकुला रामा वामा भोगाय चाप्यते । नैक-जन्मसुपुण्यानां निचयो न चितो यदि ।' अत्र पूर्वरूपकरणम् । स्पष्टविभक्तिकतायां प्रत्युदाहरणम् 'सुरासुरशिरोरत्नस्फुरत्किरणमञ्जरी पिञ्जरी-कृतपदाब्जद्वन्द्वं वन्दे महेश्वरम् ॥' अत्र समासकरणम् । समुद्रादौतस्यो-दाहरणम् 'तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी' इति । अत्र मन्दाक्रा-न्तायां चतुर्षु स्पष्टविभक्तिकता ततः षड्व्यक्तविभक्तिकता । पादान्त इतस्यापि विशेषणम् । व्यक्ताव्यक्तविभक्तिक इति तत्रोभयोदाहरणम् "स्यन्दने ग-रुडकेतुलाञ्छने कुण्डिनेशतनयाधिरोपिता । केनचिन्नवतमालकोमलश्याम-लेन पुरुषेण नीयते ॥' क्वचिदिति समुद्रादौ या यतिः सा पदमध्ये क्वचिद्भवति यदि पदस्य यत्यपेक्षया पूर्वपरभागौ एकवर्णौ न भवत इत्यर्थः । अत्रोदाहरणं 'पर्यन्ताश्रितं तप्तचामीकरकटकतटे श्लिष्टशीतेतरांशौ' इति । समुद्रादावित्युक्तं । पादान्तयतिः पदमध्ये न भवति । प्रत्युदाहरणम् 'प्रणमत भवबन्धक्लेशनाशाय-नारायणचरणसरोजद्वन्द्वमानन्दहेतुम् ।' पूर्वोत्तरभागयोरेकाक्षरत्वे तु यति र्दो-षाय सा च धातुनामप्रत्ययाव्ययभागभेदेन चतुर्धा । तत्र क्रमेणोदाहरणानि । 'एतासां राजति सुमनसां दाम कण्ठावलम्बि' 'स्वीकुर्वन्ति हि सुधियः प्रकुर्वते च' 'दुःसोढो दाशरथिमहिमा राक्षसानां बभूव' 'सुरासुरशिरोनिघृष्टचरणार-विन्दः शिवः' 'सबलयति सुरवधूकल्पासु रामासु को न' 'भुवि सुरगुरुदेशीयाः कियन्तो न सन्ति' 'कलिवशविवशः संप्रत्ययं जीवलोकः।' 'रामेशं वा प्रतिदिनमुदि-ताब्दो रमे शम्भुनामा ।' एवमन्यानपि सङ्कीर्णानुदाहरणानि ज्ञेयानि ।

पूर्वान्तवत्स्वरसन्धाविध्यस्यार्थः योऽयं पूर्वपरयोरेकादेशः स्वरः सवर्णदीर्घादिः स प्रायः पूर्वान्तवत् क्वचिदेव परादिवच्च द्रष्टव्य इति। अतएवान्तादिवच्चेति पाणिनिः सस्मार। पूर्वान्तवद्भावे यथा, 'कस्ते दारिद्र्यदावानल वदतु यशो वावदूकोऽपि दाने' 'स्यात्स्थानोपगतयमुनासङ्गमे वाभिरामा।' 'परादिवद्भावे यथा, 'अन्तेवासिदयालुरश्मितनयेनासादितो जिष्णुना।' अत्र स्वरस्य परादिवद्भावे व्यञ्जनमपि परादिवद्भवति। तद्भक्तत्वात् यदि पूर्वापरभागौ न स्यातामेकवर्णकाविति पूर्वान्तवत्स्वरसन्धावित्यादेरपि शेषस्तेन 'अस्या वक्त्रं समरजयि पूर्णेन्दुशोभं विभाति' इत्यादौ यतिर्दुष्टा। असौ तत्रापि पूर्वभागस्यैवैकवर्णतायां दोषः नह्युत्तरस्य तदर्थमेव स्वरसन्धावनेनापवादकरणात् यथादेशः। पवादिवदित्यत्रोदाहरणम् "सप्ताकूपारप्रथितपृथुयशसर्थिसार्थैः कृतार्थैः"। व्यञ्जनस्यापि परादिवद्भावो दृश्यते यथा, 'इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे" इति। तेभ्यः पूर्वा यति र्न कार्येत्यर्थः। यथा, "वाले भूपतिमौलिलालितपदद्वन्द्वश्च वृद्धोऽपि च"। आदिपदात् 'रक्षोभिः सुरमनुजैर्दितेः सुतैर्वा' प्रत्युदाहरणन्तु "नमः शिवाय कृष्णाय च दानवविनाशिने"। नित्यं प्राक्पदसम्बद्धा इति, किं "तथाद्रियन्ते न बुधाः सुधामपि।" चादय इति किं 'सम्पत्तिः सैव रमणीसखैर्या भुज्यते भुवि।' अत्र समासान्तटच्प्रत्ययान्तसखिशब्दस्य नित्यं प्राक्पदसम्बन्धत्वेऽपि यतिर्न दुष्यति। परेण नित्यसम्बद्धा इति पदादिति तेभ्यः परा यतिर्न भवतीत्यर्थः 'प्रश्रुतः किमथवा पठितो नु'। आदिपदात् 'निजगृहे जयिनं निरक्षां पुराम्'। परेण नित्यसम्बद्धा इति किं कर्मप्रवचनीयेभ्यः परा यतिर्भवत्विति। यथा, 'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि।' प्रादय इतिकिं 'राक्षसाधिपबलं प्रणाशयाम्बकल्प रघूवरौ वशौ रणे॥' अयन्तु अनेकाक्षराणां चादीनां प्रादीनाञ्चादिवद्भावः पादान्तयताविष्यते। एकाक्षराणां तु पादान्तयतौ पादमध्ये समुद्रादियतौ च। तदुक्तं कविकल्पलतायाम् 'एकस्वरोपसर्गेण विच्छेदश्रुतिसौख्यकृत्' इति। पादान्ते यतौ प्रत्युदाहरणं तत्रैवोक्तं यथा, 'पिनाकपाणिं प्रणमामि स्मरशासनम्'

इति। पादमध्ये यतौ प्रत्युदाहरणं 'विष्णुं वन्द्यं खलु भजतां नैव संसार-बन्धः'। अनेकाक्षराणां तु पादमध्ये चामीकरादिष्विव पूर्वापरभागयोरेक-वर्णत्वाभावाद्यतिरिष्टैव। तत्र चादीनां यथा, 'प्रतत्रादेशादपि च मधुनो विस्मृतभ्रूविलासम्' इत्यादि। प्रादीनां यथा, 'दूराद्दूत्प्रमोदं हसितमिव परिस्पृष्टमाशासखीभिः।' अत्र नितरं प्राक्पदसंबद्धा इत्यत्र 'स्वादु स्वच्छं सलिलमपि च प्रीतये कस्य न स्यात्।' नितरं प्राक्पद-सम्बद्धा इति किं 'मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः' इति। परेण नितरसम्बद्धा इत्यत्र च 'दुःखं मे प्रक्षिपति हृदये दुःसहस्त्व-द्वियोगः' इत्यादि हत्तिकारैः समुद्रादियतिरुदाहृता। अन्ते चायं तु पदा-न्तयतावन्तादिवद्भाव इष्यते न तु पादमध्ययतावित्यादि स्वयमेवोक्तं तद्वि-चारणीयम्। यथा, 'अनुक्तयतिकेऽप्येवं कार्या श्रुतिसुखा यतिः।' तदुक्तं कविकल्पलतायाम् 'एवं यथायथोद्वेगः सुधियां नोपजायते। तथा तथा मधुरतानिमित्तं यतिरिष्यते'॥ इति। शुक्लाम्बरादयस्तु पदान्त एव यतिमाहुः। भरतादयस्तु यतिमेव नेच्छन्ति। अतएव कविप्रयोगाः। तत्र भर्तृहरेः 'लभेत सिकतासु तैलमपि यत्नतः पीडयन् पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः। कदाचिदपि पर्यटन् शशविषाणमासादयेन्नतु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्'॥ इति। जयदेवस्यापि 'भावं शृङ्गारसारस्वतमयजयदेवस्य विष्वग्वचांसि' इति। तदुभयं बहुविरोधाच्चिन्त्यम्। इयञ्च यति र्वृत्तस्वरूपाङ्गिन्यापि गुणालङ्का-राद्यपेक्षया अन्तरङ्गाङ्गत्वात् सूत्रकारादिभिर्लक्षणमध्ये निबद्धा, नतु वृत्त-स्वरूपतया। मात्रागुरुलघुनियमनं हि वृत्तलक्षणं विरामात्मकत्वं च यतेः, अतएव वामनेन काव्यालङ्कारसूत्रेषु 'न वृत्तदोषात् पृथग्यतिदोषो वृत्तस्य यत्यात्मकत्वात्' इत्याशङ्क्य न लक्षणस्य पृथक्त्वादिति परिहृत-मित्यलं। परिभाषान्तरमाह।

युक् समं विषमं चायुक् स्थानं सद्भि र्निगद्यते॥

समं द्वितीयचतुर्थादि स्थानं युगिति सद्भि र्निगद्यते विषमञ्चैकतृती-

यादि स्यानं षड्विंशत्यक्षरं निगद्यते। चकारात्समस्य युग्मामोजसंज्ञे विषमस्यायुग्मौजसंज्ञे इत्यादि ज्ञेयं। पदैः पादाख्यै घटितं पद्यं। तद् द्विविधं जातिर्वृत्तञ्चेति। जाति र्नियतमात्रिका, वृत्तं नियतगुरुलघुविन्यासं। तत्र जातिरार्य्यादि। वृत्तमुक्तादि समार्धसमात्मकं। तदुक्तं "पद्यं चतुष्पदं तच्च वृत्तं जातिरिति द्विधा। वृत्तमक्षरसङ्ख्यातं जाति र्मात्राकृता भवेत्।" इत्येतत् सर्वं मनसि विधाय वृत्तस्य भेदानाह।

समम र्धसमं वृत्तं विषमञ्च तथापरं॥ १३॥ इति।

समाख्यं अर्धसमाख्यं विषमाख्यं चेति त्रिधा वृत्तमित्यर्थः। त्रिविधस्यापि वृत्तस्यान्वर्थसंज्ञामाश्रित्य क्रमेण स्वरूपमाह श्लोकत्रयेण।

अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।
तच्छन्दःशास्त्रतत्त्वज्ञाः समवृत्तं प्रचक्षते॥ १४॥
प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत्।
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते॥ १५॥
यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम्।
तदाहु र्विषमं वृत्तं छन्दःशास्त्रविशारदाः॥ १६॥

यस्याङ्घ्रयः पादा श्चत्वारोऽपि तुल्येन लक्षणेन लक्षिता युक्ताः तच्छन्दःशास्त्रविशारदाः छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं वदन्ति। द्वितीयचरणस्तुर्य्यस्य चतुर्थवत् अर्धसमं यस्य तदर्धसमं इत्यन्वर्थता। यस्य पादचतुष्टये परस्परं लक्ष्म लक्षणं भिद्यते तद्विषममाहुः विगतं समं यस्मादिति व्युत्पत्तेः तत्र समं अग्र्यादि, अर्द्धसमं द्रुतमध्यादि, विषमं पदचतुरूर्ध्वादि। तत्र समवृत्तभेदानाह।

आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः।
पृथक्छन्दो भवेत् पादै र्यावत् षड्विंशतिं गतम्॥१७॥ इति।

एकाक्षरात् पादादारभ्यैकेनाक्षरेण कविना वर्द्धितैः पादैः कृत्वा पृथक् भिन्नं छन्द उक्तादि भवेत्। इहावधिमाह यावदिति यावत्षड्विंशतिं षड्विंशतिसङ्ख्याकं पादं प्रति गतं गमनं भवति षड्विंशत्य-

क्षरपादपर्य्यन्तं वृद्धि र्भवतीत्यर्थः। अधिकाक्षरपादस्य छन्दसः संज्ञा-माह।

तदूर्द्धं चण्डवृष्ट्यादिदण्डकाः परिकीर्त्तिताः॥ १८॥ इति।

षड्विंशत्यक्षरात् छन्दस ऊर्द्ध्वं सप्तविंशत्याद्यक्षरपादं छन्दश्चण्डवृष्ट्यादि-दण्डकसंज्ञं भवति सप्तविंशत्यक्षरादेकैकेन रगणादिना वृद्धि र्नत्वेकैका-क्षरेण आदिपदादर्णवादि इह शास्त्रे विशेषलक्षणेनालक्षितस्य छन्दसः कविभिश्च ग्रथ्यमानस्य सामान्यसंज्ञामाह।

शेषं गाथास्त्रिभिः षड्भि श्चरणैश्चोपलक्षिताः॥ १८॥ इति।

शेषं विशेषनिरूपितादन्यत्। तदेवाह त्रिभिरिति क्वचित् त्रिभिः क्वचित्षड्भिः चकाराद्दशादिभि र्विलक्षणगुरुलघुक्रमवद्भि र्न्यूनाधिकाक्षरै-श्चरणै र्युक्तास्ता गाथा ज्ञेया इत्यर्थः। पूर्वोक्तानामेकाक्षरपादमारभ्य षड्विंशत्यक्षरपादावधिकानां छन्दसां सामान्यतो जातिसंज्ञा आह।

उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका।
गायत्र्युष्णिगनुष्टुप् च वृहती पंक्तिरेव च॥ १९॥
त्रिष्टुप् च जगती चैव तथातिजगती मता।
शक्करी सातिपूर्व्वा स्यादष्ट्यत्यष्टी ततः स्मृते॥ २०॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः सङ्कृतिश्चैव तथातिकृतिरुत्कृतिः॥ २१॥इति।

एकाक्षरपादोक्ता नाम इयं च जातिसंज्ञा अवान्तरसंज्ञास्तु वक्ष्यन्ते। एव-मितरत्रापि द्व्यक्षरपादाऽत्युक्ता। एवं शेषा अपि ज्ञेया अन्या सुपूर्विका अन-न्तरोक्ता प्रतिष्ठैव सुपूर्वा सती सुप्रतिष्ठा नामान्या जातिरित्यर्थः। सातिपू-र्व्वेति सा शक्कर्य्यतिपूर्वा अतिशक्करीत्यर्थः ननु सूत्रकारेण समस्तछन्दसां गाय-त्र्यादीनामेवोक्तत्वादुक्ताद्युक्ते न तत्सूत्रत्वमिति चेत् न 'द्विकौ ग्लौ' इत्यादि-सूत्रोक्तैकाक्षरादिप्रस्तारस्य तत्संज्ञायां ज्ञापकत्वात् कविभिः प्रायेणाप्रयुक्त-त्वाच्च तेषां लक्षणावसरेऽनुक्तिरिति भाव्यम्। ता उक्ता १ अत्युक्ता २ मध्या ३ प्रतिष्ठा ४ सुप्रतिष्ठा गायत्री ६ उष्णिक् ७ अनुष्टुप् ८ वृहती ९ पंक्तिः १०

त्रिष्टुप् ११ जगती १२ अतिजगती १३ शक्करी १४ अतिशक्करी १५ अष्टिः १६ अत्यष्टिः १७ धृतिः १८ अतिधृतिः १९ कृतिः २० प्रकृतिः २१ आकृतिः २२ विकृतिः २३ सङ्कृतिः २४ अतिकृतिः २५ उत्कृतिः २६ । अत्र प्रतिपादमेकैकाक्षरवृद्धौ सकले छन्दसि चतुरक्षरा वृद्धिर्भवति । तत्रोक्ता चतुरक्षरा । अत्युक्ताष्टाक्षरा । एवमुत्तरत्रापि । उत्कृतिश्चतुरधिकशताक्षरा । उक्तानुवादपूर्वकं वक्तव्यमाह ।

इत्युक्ताः छन्दसां संज्ञाः क्रमतो वच्मि साम्प्रतं ।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥ २१ ॥ इति ।

छन्दसामीत्यमुना प्रकारेण जातिसंज्ञा उक्ताः । साम्प्रतमिदानीं मात्रावृत्तानुपूर्वकं मात्रावृत्तमादितः कृत्वा सर्वेषां वृत्तादीनामुक्तानां क्रमशः क्रमेण लक्षणं वच्मि वदामि इति योजना । प्रथमं मात्रावृत्तमुच्यते ततः उद्देशक्रमेण वर्णवृत्तमुच्यत इत्यर्थः ॥

इति श्रीमद्विद्वन्मुकुटमाणिक्यश्रीमद्भट्टरामेश्वरसूनुनारायणभट्टविरचितायां वृत्तरत्नाकरव्याख्यायां परिभाषाध्यायः प्रथमः ॥

अथ मात्रावृत्तानि विवक्षुः प्रथममार्यां लक्षयति लक्ष्मैतदिति द्वयेन ।

लक्ष्मैतत् सप्त गणा गोपेता भवन्ति नेह विषमे जः ।
षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः ॥ १ ॥
षष्ठे द्वितीयलात् परके न्ले मुखलाच्च सयतिपदनियमः ।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥ २ ॥ इति ।

आर्यायाः प्रथमे एतन्नियतं सार्वत्रिकं लक्ष्म लक्षणं ज्ञेयं । किं तत् सप्तसंख्याका गोपेताः गुरुणा युक्ताः गणाश्चातुर्मात्रिकाः पूर्वोक्ताः गुरूपेतत्वात् सार्धाः यद्यपि 'स्वरा अर्धं चार्यार्धम्' इति सूत्रे अर्धं चेति ग्रहणात् सार्धाः सप्त गणा भवन्तीति सामान्यतः उक्तं, तथाप्यर्धगणस्थाने एको गुरुरेवान्ते कार्यो

न तु लक्षयमिति सूचितम्। इहार्यार्धे विषमे प्रथमतृतीयादौ स्थाने जः जगणो मध्यगुरुर्गणो न कार्यः। षष्ठश्चायं जगणः कार्यः नलघू वा कार्यौ नश्च लघुश्चेति नलघू चतुर्लघुर्वा गणः कार्य इत्यर्थः। अन्ये तु स्वेच्छया ज्ञेयाः। षष्ठ इति द्वितीयलादित्यतः परं पूर्वमिति शेषः। षष्ठे तु षष्ठस्थाने चतुर्लघौ गणे कृते सति द्वितीयलात् तस्यैव षष्ठस्य चतुर्लघोर्गणस्य द्वितीयलघोः पूर्वं प्रथमलघ्वन्तं सयतिपदनियमः यतिसहितं पदं नियमेन समाप्यत इत्यर्थः। नले इति प्रथमाद्विवचनं वा ततश्च षष्ठे स्थाने यदि तु नलघू स्यातां तदा द्वितीयलात् पूर्वं यतिरित्यर्थः परके तु नले षष्ठापेक्षया परस्मिन् सप्तमके चतुर्लघौ कृते सति, मुखलात् सप्तमस्य प्रथमलघोः पूर्वं षष्ठगणान्ते सयति पदं नियम्यते। चरमे द्वितीये पुनरर्धे पञ्चमके तु चतुर्लघौ तस्मान्मुखलघोः पूर्वं अर्थाच्चतुर्थान्ते पदं समाप्यत इत्यत्रानुषङ्गेण पूर्वपदाध्याहारेण योज्यं। इहेति इह आर्याचरमार्धे षष्ठो गणो लो लघुरेव भवति न चतुर्मात्रिका इति पूर्वार्धाद्विशेषः। उत्तरार्धे एतावन्मात्रं विशेषं वदतान्यत् पूर्वार्धलक्षणमेव भवतीति द्योतितम्। यतिनियमं छन्दोमाणिक्यकारोऽप्याह 'पूर्वार्धे षष्ठो जः श्लो वा श्ले चास्य लघुनि भवति यतिः। षष्ठः श्लपरोऽत्र यतिस्तुर्योपरत्र भवति चरमदले' ॥ इति। अस्यार्थः श्ल इति चतुर्लघो गणस्य संज्ञा पूर्वार्द्धे षष्ठो गणः जगणः श्लो वा कार्यः। श्ले तु षष्ठगणे अस्य लघुनि तृतीयप्रथमलघ्वन्ते यति भवति। यदि षष्ठः श्लपरः श्लश्चतुर्लघुः परो यस्य स तथा सप्तमश्चतुर्लघुः स्यादित्यर्थः तदात्र षष्ठान्ते वा यतिः चरमदले द्वितीयार्धे यदि तुर्यश्चतुर्थः श्लपरस्तत्रापि चतुर्थान्ते यतिरिति। यद्वा मूले पञ्चम्यौ ल्यब्लोपे। तेन द्वितीयलमादाय सयतिपदनियमः सयतिकपदप्रारम्भनियम इत्यादिरर्थः। उभयथापि लक्ष्येऽविसंवाद एव। किन्तु एतस्मिन् व्याख्याने 'श्लौ चेत् पदं द्वितीयादि' 'सप्तमः प्रथमादि' इति सूत्रानुग्रहो पूर्वपदाध्याहारश्च न कर्तव्यो भवति। अतएव श्वेतराज आह। 'षष्ठे द्वितीयमादाय लस्यैवारभ्यते पदम्। सप्तमे तु पुनर्मुख्यं पूर्वार्धेऽसौ यतिः स्मृता॥ पदमारभ्यते नित्यं गृहीत्वा प्रथमं लघु। पञ्चमे तु बुधैरेवं चरमार्धे स्मृता

यतिः’ इति। छन्दोमाणिक्योक्तसूत्रार्थकथनेनापि सङ्गच्छते। अत्र यतिमात्रे नियते सति चामीकरादिवत् पूर्वापरभागयोरनेकाक्षरत्वे पदमध्ययतिर्मा भूदिति पदस्यापि नियम उक्तः। तत्र स्पष्टास्पष्टविभक्तिकत्वयोर्न विशेषः। अत्र प्रथमार्यां षष्ठजगणपक्षे सामान्यलक्षणोदाहरणं। षष्ठस्य चतुर्लघुत्वे पूर्वार्धद्विविधयतौ च द्वितीयार्यापूर्वार्धमुदाहरणम्। उत्तरार्धे यतेस्तल्लक्षणस्य तदुत्तरार्धमिति विवेकः। अत्र विषमे जगणनिषेधात् प्रत्येकं चत्वारो विकल्पाः। यथा ऽऽ (१) ॥ऽ (२) ऽ॥ (३) इति। समस्थाने तु जगणस्यानिषेधात् प्रत्येकं पञ्च यथा ऽऽ (१) ॥ऽ (२) ।ऽ। (३) ऽ॥ (४) इति। ततश्च पूर्वार्धे प्रथमे भेदाः ४ द्वितीये ५, तृतीये ४, चतुर्थे ५, पञ्चमे ४, षष्ठे २ जनलयोरेव विकल्पनात्, सप्तमे ४, अष्टमे गुरुरेकः। एतेषामन्योन्यगुणने द्वादश सहस्राणि अष्टौ शतानि पूर्वार्धभेदः। उत्तरार्धे तु षष्ठे लघुनियमनात् तदतिरिक्तं सर्वं पूर्ववदेव। तथा चान्योन्यगुणने षट् सहस्राणि चत्वारि शतानि भेदा उत्तरार्धे। उभयविकल्पानां परस्परगुणने अष्टौ कोटय एकोनविंशति लक्षाणि विंशतिः सहस्राणि इयमार्याणां भेदसङ्ख्या॥ अङ्कतोपि ८१९२००००। तदुक्तं ‘जगणविहीना विषमे चत्वारः, पञ्च युजि, जगणनलौ। षष्ठे द्वाविति च गणा तथान्तगः प्रथमदलसंख्या। एवं ये परार्धसंख्या षष्ठे स्याल्लघुनि चैकस्मिन्। आर्याया सङ्ख्योभयदलसङ्गुणिता विनिर्दिष्टा’ इति। अत्रैव प्रसङ्गादार्यायास्तु नष्टोद्दिष्टे उच्येते। लोके प्रसिद्धनामा विद्याविद्याविनोदविभवानां। जयतीह शुद्धचरितो रामेशाख्यो गुरुः काश्यां॥ यदा कश्चित् जिज्ञासेतेयमार्या कतिधेति तदास्या गणान् स्थापयेत् गगणाधश्चतुःपञ्चादिकं संख्याविकल्पं यथासंख्यं स्थापयेत्। तत्र उपान्त्यमन्त्येन हत्वा इष्टाद्विकल्पादधस्तनान् शेषान् विकल्पसंख्यापूरकान् विकल्पानपनीय शेषया संख्यया तदाद्यगुणकविकल्पाङ्कं हत्वा इष्टविकल्पाधस्तनविकल्पान् राशेरपनीय शेषाङ्कं पूर्वपूर्वेण गुणयित्वा इष्टविकल्पाधस्तनविकल्पाङ्कं पातयेत्। एवं यावदाद्यं गणं कुर्यात्। शेषसंख्ययार्यासंख्यां जानीयात्। अत्र सर्वान्तगुरुमध्यगुर्वादिगुरुसर्वलघु-

क्रमेणावस्थानेऽधस्तनत्वं ज्ञेयं। अत्र न्यासः SS, ISI, SS, SS, SS, ISI, IIS, S. IIS, ISI, IIS, SS, SS, I, SS, S. अत्र अन्ते न्यस्तस्यार्धगणस्य विकल्पाभावादधस्तनैकाङ्कस्तत्र द्वितीयेऽर्धे समाप्तेऽधस्तनैश्चतुर्भिर्गुणने जाता श्चत्वारः सप्तमस्तत्र इष्टस्तत्र सर्वगुरुत्वात् तस्तत्राधस्तनान् ज ISI गणव्यतिरिक्तानन्तगुर्वादिगुरुसर्वलघूंस्त्रींश्चतुर्षु पातयेत् शेष एकः षष्ठस्तत्र लघुमात्ररूपत्वाद् विकल्पाभावः पञ्चमाधस्थचतुर्भिरेकगुणने कृत्वापि पूर्ववत् त्रयाणां त्यागे शेषस्त्वेकस्तत्र चतुर्थाधस्थपञ्चमहतौ चतुर्षु शेषस्त्वेकस्तत्र तृतीयाधस्थैश्चतुर्भिर्हतौ शेषयोर्द्वयोस्त्यागे शेषद्वयस्तत्र द्वितीयस्थैः पञ्चभिर्हतौ द्वये तत्र ते शेषा अष्टौ। तेषां प्रथमस्थैश्चतुर्भिर्हतौ जगणातिरिक्ते द्वये त्यक्ते त्रिंशत्। एवमुत्तरार्धं पूर्वार्धान्त्यगणार्धं त्वविकल्पं सप्तमस्थैश्चतुर्भिस्त्रिंशतो हतौ द्वये पातिते शतमष्टादशाधिकं तत्र षष्ठस्थाभ्यां द्वाभ्यां हतौ एकस्तत्र त्यागे पञ्चत्रिंशदधिकं शतद्वयं शिष्टम्। तत्र पञ्चमस्थैश्चतुर्भिर्हतौ त्रिषु पातितेषु शिष्टा सप्तत्रिंशदधिका नवशती। तस्यां चतुर्थस्थैः पञ्चभिर्हतायां चतुर्णां त्यागे एकाशीत्यधिकानि षट्चत्वारिंशच्छतानि। तेषु तृतीयस्थैश्चतुर्भिर्हतेषु त्रिषु पातितेषु अष्टादश सहस्राणि एकविंशत्यधिकानि सप्त शतानि च। तेषां द्वितीयस्थैः पञ्चभिर्हतौ द्वयोरपाये सहस्राणां त्रिनवतिः त्र्यधिका षट् शती च। तस्यां प्रथमस्थैश्चतुर्भिर्हतायां त्रयत्यागे सिद्धोऽङ्को लक्षत्रयं चतुःसप्ततिः सहस्राणां नवाधिकानि चत्वारि शतानि च। अङ्कतोऽपि ३७४४०९। एतावत्संख्येयं पूर्वोक्ता आर्या भवति। तदुक्तं 'गणानुद्दिष्टगाथायाः संस्थाप्य तदधो लिखेत्। चतुःपञ्चादिकां संख्यां स्थानस्थानोचितां ततः। हत्वा हत्वाद्यमन्त्येन चोपरिस्थाद् गणादधः। पृथग् घातगणेभ्योऽथ गणसंख्यां विकल्पयेत्॥ हताङ्कार्योचिता तावद्यावदाद्याङ्कसम्भवः। तत्संख्यामुद्दिशेद्गाथामुद्दिष्टप्रत्यये बुधः' इति। इति आचार्योद्दिष्टविधिः। अथ तत्र नष्टं यदा लक्षत्रयं चतुःसप्ततिसहस्राणि चत्वारि शतानि नव चेत्तत्र तत्संख्यार्या कीदृगिति जिज्ञासा तदा नष्टाङ्कां लिखित्वा आदिभूतगण-

विकल्पैर्भागं हरेत्। भागे हृते यः अङ्कः शिष्टः तत्संमितं तद्गणविकल्पेषु गणं लिखेत्। भागहारे यल्लब्धं तत्सैकं कृत्वा पुनः पुनरुत्तरगणविकल्पैर्भागे हृते भाज्यशेषं संख्याङ्को गणस्तत्तद्गणविकल्पेषु पूर्वस्थापितगणानन्तरं स्थाप्यः। इत्येवं यावत्पूर्त्ति कार्यम्। यत्र तु गणविकल्प एवेष्यते तत्र तत्संख्य एव गणो ग्राह्यः। परं लब्धं सैकं न कार्यं शिष्टं पूर्ववत्। तद्यथा प्रथमगणस्य चतुर्विकल्पत्वाच्चतुर्भिः पूर्वोक्ते नष्टाङ्के हृते लब्धं त्रिनवतिसहस्राणि द्व्यधिकानि षट् शतानि च शेष एकाङ्क इति। प्रथमगणविकल्पेषु प्रथमः सर्वगुरुः स्थाप्यः। लब्धे सैके हृते द्वितीयगणस्य पञ्चविकल्पत्वात्तैर्भक्ते लब्धं सहस्राण्यष्टादशविंशत्यधिकसप्तशती च शेषास्त्रय इति। तद्विकल्पेषु तृतीयो मध्यगुरुः स्थाप्यः। लब्धे सैके तृतीयस्य चतुर्विकल्पत्वात्तैर्भक्ते लब्धं अशीत्यधिकषट्चत्वारिंशच्छती शेष एक इति। तद्विकल्पेष्वाद्यः सर्वगुरुः कार्यः। लब्धे सैके चतुर्थः पञ्चविकल्प इति पञ्चभिर्भागे लब्धं नवशती षट्त्रिंशदधिका शेष एक इति। तद्विकल्पेष्वाद्यः सर्वगुरुः स्थाप्यः। लब्धे सैके पञ्चमस्य चत्वारो विकल्पा इति तैर्भक्ते लब्धं (चतुस्त्रिंशदधिकं शतद्वयं शेष एक इति तद्विकल्पेषु सर्वगुरुः स्थाप्यः। लब्धे सैके षष्ठस्य जगणनलयोरेव विकल्पाद् द्वाभ्यां भक्ते लब्धं सप्ताधिकशतं शेष एक इति तद्विकल्पयोराद्यो मध्यगुरुः स्थाप्यः। लब्धे सैके सप्तमस्य चत्वारो विकल्पा इति तैर्भक्ते लब्धम्) एकोनत्रिंशत् शेषं द्वयमिति तद्विकल्पेषु द्वितीयोऽन्तगुरुः। ततः सर्वार्यानियतं गुरुं न्यसेत्, एवं पूर्वार्धं सिद्धम्। ततो लब्धे सैके आर्योत्तरार्धादिगणश्चतुर्विकल्प इति चतुर्भक्ते लब्धं सप्त शेषं द्वयमिति। द्वितीयविकल्पोऽन्तगुरुः। लब्धे सैके, द्वितीयस्य पञ्च विकल्पा इति तैर्भक्ते लब्धं एकः शेषं त्रयः इति तृतीयविकल्पो मध्यगुरुः। लब्धे सैके तृतीय श्चतुर्विकल्प इति चतुर्भिर्भक्ते लब्धं शून्यं शेषं द्वे इति द्वितीयविकल्पोऽन्तगुरुः। लब्धे शून्यं सैके चतुर्थः पञ्चविकल्प इति पञ्चभि र्भागे लब्धं शून्यं शेष एक इति प्रथमविकल्पः सर्वगुरुः लब्धे सैके पञ्चमश्चतुर्विकल्प इति तै र्भक्ते लब्धं शून्यमवशेष एक इति प्रथमविकल्पः सर्वगुरुः। षष्ठो

लघुरेक एव तस्य नियतत्वात्। लब्धे सैके सप्तमचतुर्विकल्प इति तैर्भक्ते लब्धं शून्यं शेष एक इति प्रथमः सर्वगुरुः। अन्ते एको गुरुर्लघ्वो नियतत्वात् एवं सतेऽप्तताद्दशीयमिति पूर्वोक्तामेव आर्यां वदेत्। तदुक्तं 'नष्टाङ्के प्रथमं भक्ते गणाङ्कैश्चतुरादिकैः। शेषसंख्यो गणो ज्ञेयो लब्धं कुर्यात् सरूपकम्॥ पुनः भजेत् पुनर्लब्धं सरूपं शेषसङ्ख्यया। गणान् दद्याच्च शेषे गाथाश प्रागणक्रमः॥' इति। एवमार्यादिषु गीत्यादिषु च ज्ञेयम् इत्यार्यानष्टविधिः। अथ कश्चिदार्याविशेषानाह।

त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः।
पथ्येति नाम तस्याः प्रकीर्त्तितं नागराजेन॥ ३॥

आद्येषु त्रिषु अंशकेषु चतुर्मात्रेषु त्रिषु गणेषु यस्या दलयोरर्धयोः पादो दृश्यते कविप्रयोगेषु तस्याः आर्याया नागराजेन श्रेष्ठेन पिङ्गलेन पथ्येति नाम प्रकीर्तितम् उक्तं 'त्रिषु गणेषु पादः पथ्याद्ये च'इति सूत्र इत्यर्थः। सर्वत्रात्र ऋषिनामनिर्द्देशः समूलताप्रदर्शनार्थः, नत्वन्यतमत्वप्रदर्शनार्थः। इदमेवात्रोदाहरणम्। एवमुत्तरत्रापि।

संलङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः।
यस्यास्तां पिंगलनागो विपुलामिति समाख्याति॥ ४॥ इति।

यस्या आर्यायाः आद्यं गणत्रयं लङ्घयित्वा परतो यत्र क्वचित् द्वयोः शकलयोरर्धयो र्व्यस्तयोः समस्तयोर्वा पादयोर्यतिः स्यात् तामार्यामित्येवंप्रकारतया पिङ्गलनागो विपुलां समाख्याति कथयति 'विपुलान्येति' सूत्रम्। इति शब्दं प्रकारवचनमङ्गीकृतत्र व्याख्येयं तेन इतिनायुक्तत्वाद्विपुलामिति कर्मणि द्वितीया न विरोधः प्रकारवाचिनेतिशब्देन चपलादीनामपि गणत्रयानन्तरं विरामत्वप्रकारे सति विपुलात्वमपि भवतीति संकीर्णभेदा अपि संगृहीताः। इयञ्च त्रिविधा पूर्वार्द्ध एव त्रिगणानान्त इतिविरामा मुखविपुला, उत्तरार्धे एतादृग् जघनविपुला, उभयोरर्धयोस्तादृगुभयविपुलेति। इयमेव महाविपुलेति। तत्र षष्ठ इत्यादिमूलव्याख्या। द्वितीया ममैव यथा,

करुणाविषये करुणा करुणाकरणालयाशु मयि धेहि। राघव करुणाशील- वतां विषमा मानसी वृत्तिः॥ तृतीयामूलस्यैव।

उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः।
चपलेति नाम तस्याः प्रकीर्तितं नागराजेन॥ ५॥ इति।

यस्या द्वयोरर्धयोर्वा तयोः समस्तयोर्वा द्वितीयचतुर्थौ गणौ पश्चात् पुरःस्थितगुरुमध्यगौ जगणौ स्यातां सा आर्या चपला। एतदुक्तं भवति प्रथमो गणो द्विगुरुः अन्तगुरुर्वा तृतीयो द्विगुरुः पञ्चमो द्विगुरुः आदिगुरुर्वा द्वितीय-चतुर्थौ मध्यगुरू नियतमस्यामिति। अत्राद्यार्धे प्रथमे द्वौ विकल्पौ ऽऽ, ॥ऽ, द्वितीये एकः ।ऽ।, तृतीयेऽप्येकः ऽ ऽ, चतुर्थेऽप्येकः ।ऽ।, पञ्चमे द्वौ ऽ॥, ऽऽ, षष्ठे द्वौ ।ऽ।, ॥॥, सप्तमे चत्वारः ॥॥, ऽऽ, ऽ॥, ॥ऽ, अष्टमे गुरुरेव अन्योन्यगुणने द्वात्रिंशत्॥ उत्तरार्धे षष्ठस्य लघुतामात्रत्वात् षोडश १६॥ उभयार्द्धविकल्पानां अन्योन्यगुणने द्वादशाधिकपञ्चशती विकल्पानाम् अङ्कतोऽपि ५१२ मुखविपुलादीनां सूत्रकारानुक्तत्वात् स्वयं स्फुटतयानुक्तावपि चपलाभेदौ सूत्रोक्तत्वात्सूचयति।

आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः।
शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना॥ ६॥ इति।

यस्या आर्याया आद्यं प्रथमं दलं अर्धं चपलाश्रितं लक्ष्म लक्षणं भजेत शेषे द्वितीयार्धे पूर्वजं सामान्यार्याभवं लक्ष्म यस्याः सा तथा सा मुनिना पिङ्गलेन मुखचपलोक्ता। अत्र चपलापूर्वार्द्धविकल्पानां द्वात्रिंशताम् आर्यापरार्द्धविकल्पानां चतुःषष्टिशतरूपगुणानां परस्परताडनेन द्वौ लक्षौ चत्वारि सहस्राणि अष्टौ शतानि च विकल्पा भवन्ति॥ अङ्कतोऽपि २०४८००।

प्राक्प्रतिपादितमर्धं च प्रथमे प्रथमेतरे च चपलायाः।
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला॥ ७॥ इति।

प्राक्प्रतिपादितं पूर्वोक्तं लक्ष्म सामान्यलक्षणं प्रथमार्धे भवति प्रथमेतरे द्वितीयार्धे चपलालक्षणं भवति सार्या विशुद्धा विवेकचतुरा धी बुद्धि-

येषां तैः पिङ्गलादिभि र्जघनचपलोक्ता। अत्रापि चपलायामिवोत्तरार्धविकल्पाः षोडश विकल्पाः। पूर्वार्धे त्वष्टशताधिकद्वादशसहस्रसंख्या आर्यापूर्वार्धविकल्पाः। अविरता एव परस्परं गुणने द्वे लक्षे चत्वारः सहस्रा अष्टौ शतानि विकल्पाः अङ्कतोऽपि २०४८०० उभयार्द्धयोश्चपलालक्षणयोगे महाचपला। सा च प्रथमैव मूले। अत्र चैका पथ्या विपुलाभेदत्रयं चेति चत्वारो भेदाः। पुनश्चैत एव प्रत्येकं चपलाभेदत्रयेण सम्पन्नाः सन्तो द्वादश एव मिलित्वा षोड़शार्याभेदः स्थूलदृशा भवति। एषां भेदानां मध्येऽनुक्तोदाहरणानि सुबुधा यथान्तरात्रावगन्तव्यानि अस्माभिस्तूक्तप्रायत्वाद्ग्रन्थविस्तरभयाच्च नोक्तानि।

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायामार्याप्रकरणम्।

अथार्यालक्षणज्ञानपूर्वकशेषस्वरूपत्वात् केश्चिदार्याभेदत्वाङ्गीकाराद्गीतिं लक्षयति।

आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः।
दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेशः॥ ८॥ इति।

तदाशब्दोऽत्राध्याहार्यो यदिशब्दप्रयोगाय। तथाच यदार्याप्रथमार्धोक्तं लक्षणमुभयोरर्द्धयोः कथमपि विकल्पितषष्ठजगणचतुर्लघुगणान्यतमप्रकारेण येनापि भवेत् तदा कृतयतिशोभां कृता यत्या विच्छेदात्मिकया शोभा श्रुतिसौभाग्यं यस्यास्तां। एतेनार्योक्तो यस्तद्गणविशेषे सति विरामविशेषः सोऽप्यस्यां भवतीति दर्शितं भुजङ्गेशः पिङ्गलस्तां गीतिं गीतवान् उक्तवान् 'आद्यार्द्धसमा गीतिः' सूत्रेणेत्यर्थः। ततश्चात्र द्वितीयार्धेऽपि पूर्णाः सगुरवः सप्तगणा न तु षष्ठे लघुमात्रमित्यादि ज्ञेयम्। इयमेका पथ्या तिस्रो विपुलाः द्वादश चपलाः। एतत् पूर्वोक्तत्वात् षोड़शधा। तत्र पथ्यागीति र्मूलं अन्याः स्वयमुदाहार्याः। अत्राद्यार्धे आर्या च द्वादश सहस्राष्टौ शतानि च विकल्पाः। उत्तरार्द्धेऽपि तावन्त एव। परस्परहतौ कोट्यः षोड़शाष्टत्रिंशल्लक्षा श्चत्वारिंशत्सहस्राणि च विकल्पाः। अङ्कतोऽपि

१६३८४००००। पथ्यागीत्यादिचतुर्षु भेदेष्वियं संख्या ज्ञेया। द्वादशस्तु चपलागीतिषु पूर्वापरार्द्धविकल्पघाते सङ्ख्या स्वयमूह्या।

आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत् स्यात्।
यद्युभयोरपि दलयोरुपगीतिं तां मुनि ब्रूते॥ ९॥ इति।

अत्रापि तदेति विशेषः। यद्यार्याद्वितीयार्धे यदुक्तं लक्षणं षष्ठलघ्वादि तदुभयोरर्धयोः स्यात् तदोपगीतिं पिङ्गलोऽन्तेऽनोपगीतिरित्यत्राहेत्यर्थः अस्यां पूर्वार्धे षट् सहस्राणि चत्वारि शतानि विकल्पाः। उत्तरार्धेऽपि तावन्त एव। अन्योन्यघाते चतस्रः कोट्यो नव लक्षाः षष्टिः सहस्राणां विकल्पाः। अङ्कतोऽपि ४०९६००००।

आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः।
सोद्गीतिः किल गदिता तद्वत् यतंशभेदसंयुक्ता॥ १०॥ इति।

आर्ययाद्वयं यस्याः व्यत्ययेन विपर्यासेन यत्पूर्वार्धं तदुत्तरार्धं यदुत्तरार्धं तदत्र पूर्वार्धमित्येवं रूपेण रचितं सा किलेति प्रसिद्धोद्गीतिरुक्ता तेनैव तद्वदिति पथ्याद्यार्याभेदवदेव यत्या विरामेण योऽंशभेदः पादभेदस्तेन संयुक्ता तत्र्थः। अत्रार्यावद्विकल्पसङ्ख्या। यथा ८१९२००००॥

आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम्।
इतरत्तद्वन्निखिलं भवति यदियमुदितेयमार्या गीतिः॥ ११॥ इति।

आर्यायाः पूर्वार्धं यदेकेनाधिकेन गुरुणा निधने (अन्ते) युक्तं स्यात् इतरच्च द्वितीयं समस्तं यदीयमर्धं तद्वत् पूर्वार्धवत् इयमार्यागीतिरिति मुनिनोक्ता। आर्यायां हि पूर्वार्धेन गुरुकाः सप्तगणकाः इह तु पूर्णा अष्टौ गणाः अर्धद्वयेऽपि भवन्ति। अन्तिमस्तु गणो द्विगुरुरेव अन्यत् सर्वमार्यापूर्वार्धतुल्यमेवेति भावः। आर्यायाः पूर्वार्द्धविकल्पानाम् अष्टमगणे विकल्पाभावात् परस्परताडेन जातोऽङ्कः द्वादश सहस्राण्यष्टौ च शतानि पूर्वार्धे उत्तरार्धेऽपि तावदेव। अन्योन्यहतौ जातानि मुख्यगीतिवद्भेदसंख्या। अङ्क-

तोऽपि १६३८४००००। केचित्तु अत्रोत्तरार्धेऽर्धशब्दमपठित्वा इतरार्याया एवोत्तरार्धं तद्वदन्तेऽधिकैकगुरुयुक्तं स्यात् सार्य्यागीतिरिति। आर्यापूर्वार्धमितयत्र समस्तं यथार्याशब्दं षष्ठ्यन्तं समासान्निष्कृष्टमनुषज्य पूर्वार्धस्याष्टगणत्वेन द्वात्रिंशन्मात्रताम् उत्तरार्द्धस्यैकोनत्रिंशन्मात्रतां चाभिप्रेत्य व्याचक्षते। भवतु नामैतद्व्याख्याकौशलं, किन्तु बहूनामसम्मतं, सूत्राननुगुणं च, अर्धे वसुगणे आर्यागीतिरिति सामान्यतोऽर्धे वसुगणेऽष्टगणे सतीति। यद्वा आर्यार्धे यदि अष्टगणे स्यातामिति सूत्रकार आह केचित्त्वियं सङ्गीतिः संज्ञिता अपरैः स्कन्धकमिति। गीतीनामप्यार्यापूर्वकत्वादार्यात्वमस्त्येव एताश्चतस्रोऽपि गीतयः प्रत्येकं पथ्यादिपूर्वोक्तषोडशार्या मिलित्वाशीतिः। तदुक्तं हलायुधेन "एकैव भवति पथ्या तिस्रो विपुलास्ततश्चतस्रस्ताः। चपलाभेदैस्त्रिभिरपि भिन्ना इति षोडशार्याः स्युः॥" गीतिचतुष्टयमित्थं प्रत्येकं षोडशप्रकारं स्यात्। साकल्येनार्याणामशीतिरेवं विकल्पाः स्युः इति। छन्दोविरचितौ त्वेकादश परे गीतिभेदाः प्रदर्शिताः। ते यथा, आर्यैव दलद्वयेऽप्यधिकैकगुरुयुता सङ्गीतिः। ममैव यथा "आगमविद्यैकनिधि विबुधेन्द्रशतैरधीतनिगमविलासः। रामेश्वरभट्टगुरुर्जयति पिता मे पितामहतुल्यः" ॥ (१)। पूर्वार्ध एवाधिकैकगुरुयुक् सुगीतिर्नाम। पितामहस्वगिति पठित्वा पूर्वमेवोदाहरणम् (२)। यद्युत्तरार्ध एव तादृक् तदा प्रगीतिर्नाम। अधीतनिगमार्थ्य इति पठित्वा प्रथममेवोदाहार्य्यम् (३)। सुगीतिरेव व्यत्यस्तार्धानुगीतिः। सुगीत्युदाहरणमेव व्यत्यस्तार्धं ज्ञेयं (४)। प्रगीतिरेव व्यत्यस्तार्धा मञ्जुगीतिः। प्रगीत्युदाहरणम् व्यत्यस्तार्धमत्रोदाहरणम् (५)। यद्यधिकैकगुर्वार्योत्तरार्धेन पठितार्धद्वया तदा विगीतिः। ममैव यथा "विषयान् विषधरविषमान् संसृतिमपि नीरसां ज्ञातवतः। संसारभूते दशरथबाले मतिरतिस्थैर्य्यमियात्॥"(६)। यद्युद्गीतिर्द्वयोरप्यर्धयोरधिकगुरुयुक्ता तदा चारुगीतिः। अत्र पूर्वोक्तं सङ्गीत्युदाहरणमेव विपर्यस्तार्धं ज्ञेयम् (७)। आर्य्यागीतेरेवैकगुरुहीनोत्तरार्धतायां वल्गुगतिः॥ ममैव यथा 'पीतोन्नतकुचकलशा पीवरजघनोरुभारमन्थरयाता। पश्यन्ती प्रणयेन त-

रथो कं वा न चालयेत् पुरुषम्' (८)। तस्या एव पूर्वार्धं एव तया चेच्चलितेति संज्ञा। अर्धयोर्व्यत्यासेन पूर्वमेवोदाहरणम् (९)। उपगीतिरेवाद्यार्द्धेऽधिकैकगुरुयुता प्रमदा नाम। ममैव यथा "यस्य विलासवतीनां केलिकलाकौशलरतिर्विरतिः। मैथुनमात्ररसज्ञः स्मरविहीनः पुमान् स पशुः" (१०) सैवोत्तरार्धेऽधिकैकगुरुयुता चन्द्रिका नाम। व्यत्यस्तार्धं पूर्वमेवोदाहरणम् (११)। एतासामपि पूर्वोक्तपथ्यादिषोडशार्याणां संभिन्नतया प्रत्येकं षोडशधात्वे सति सङ्ख्या (१७६)। एतासामुदाहरणानि स्वयमूह्यानि, विस्तरभयात्तु नोच्यन्ते। पूर्वोक्तानां चतुर्विधगीतीनां च तथैव षोडशधात्वे सङ्ख्या ६४। ऐकेत्र गीतिसङ्ख्या २४०॥ पूर्वोक्तषोडशशुद्धार्याभेदैकेत्र सङ्ख्या २५६।

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरव्याख्यायां गीतिप्रकरणम्।

मात्राछन्दसां प्रक्रान्तत्वाद्वैतालीयप्रकरणमारभते।

षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः।
न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः॥ १२॥ इति

वैतालीये छन्दसि विषमे अर्थात् पादे प्रथमे तृतीये च षट् कला मात्राः स्युः समे पादे द्वितीये चतुर्थे चाष्टौ कलाः स्युः अन्ते उक्तानां कलानामन्ते परस्तात् रलौ रगणलघू गुरुश्च भवतीति वैतालीयस्वरूपपरिच्छेदः एतदुक्तं भवति विषमे पादे चतुर्दश समे च षोडश मात्राः कार्यास्तन्मध्येऽन्तिमाः अष्टौ मात्राः रेफलघुगुरुभिः कार्या इति। विषमे पश्चात् षट् समेऽष्टौ अवशिष्यन्ते तासां निवेशने नियमविशेषमाह ताश्चेति। समे ताः षट् कलाः निरन्तराः केवलाः षट् लघव एव न कार्याः किन्तु गुरुमिश्रा इत्यर्थः। समे विशेषोक्त्या विषमे स्वरुचिः। अत्रावशिष्टासु षट्सु अष्टसु च कला द्वितीया चतुर्थी षष्ठी च परया तृतीयपञ्चमसप्तमकलया आश्रिता मिलिता न

भवन्ति, द्वितीयतृतीयकलादीनामेकेन गुरुणोपादानं न कार्यमित्याशयः। अत्र विषमपादयोराद्यासु षण्मात्रासु अष्टौ विकल्पाः यथा SSS, S॥S, ॥SS, ॥॥॥. SS॥, ॥S॥, S॥॥, ॥॥S, समपादयोराद्यास्वष्टमात्रासु त्रयोदश विकल्पाः॥ SSSS, SSS॥, SS॥S, SS॥S, S॥SS, ॥SSS, SS॥॥, S॥S॥, S ॥॥ S, ॥॥SS, ॥॥SS, ॥S॥S, S॥॥॥, ॥S॥॥, ॥॥S॥. एते आर्याभिवर्णक्रमेण निबद्धाः केचित्। मीनाङ्काः १सुरसद्मैः २ पङ्कजै ३ भेरितजलाः ४ ततसारस ५ खगसंभृत ६ सज्जनमुदि ७ तवनककुभि ८ एते विषमे पादे। हंसस्थो १ अलिके नद्यो २ नीरजवक्त्राः ३ कुवलयनेत्राः ४ सुस्वच्छजलाः ५ सुतरङ्गभुजाः ६ केसरदशना ७ राजन्ते स्त ८ अनन्तर्षा भुवि ९ शरणदा त्रिषु वि१० मलनिशाकरा ११ भानुप्रभतिषु १२ ननु पश्य सुतनु १३ एते समे। ततोऽष्टभिस्त्रयोदश-गुणिताश्चतुरधिकं शतं वैतालीयस्याद्यार्धे भेदाः। एतावन्त एवापरार्धे। परस्परहतौ जातं दश सहस्राण्यष्टौ शतानि षोडश च। अङ्कतोऽपि १०८१६। इयमेवौपच्छन्दसिकापातलिकयोर्वक्ष्यमाणयोः सङ्ख्या। वैतालीय-भेदानाच्च।

पर्यन्ते र्यौ तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्तम्॥ १३॥ इति।

विषमसमपादयोः षण्णामष्टानां च कलानामन्ते र्यौ रेफयगणौ स्यातां, शेषं षडष्टककलानियमादीनि तथैव सामान्यवैतालीयवदेव यदा तदा छन्दोविद्भिरौपच्छन्दसिकसंज्ञं वैतालीयमुक्तम्। वैतालीय एव प्रतिचरणमेक-गुर्वाधिक्येन विषमपादे षोडश समपादे चाष्टादश मात्राः कार्या इति भावः।

आपातलिका कथितेयं भाद्गुरुकावथ पूर्ववदन्यत्॥ १४॥ इति।

षण्णामष्टानां च मात्राणां पर्यन्ते भाद्भगणात् परौ गुरुकौ गुरू स्यातामिति रेफलघुगुरूणामपवादः अथान्यत् शेषं पूर्ववद्वैतालीयवत्। सेयमापातलिका सुधीभिः कथितेति पर्यन्तसुधीशब्दानुषङ्गेण योजनम्।

तृतीययुग्दक्षिणान्तिका समस्तपादेषु द्वितीयलः ॥ १५ ॥ इति।

समस्तेषु चतुर्ष्वपि पादेषु द्वितीयलो द्वितीया मात्रा तृतीयया युग् युक्ता चेत् स्यात् तदा दक्षिणान्तिका नाम स्यादिति। चेत्तदाशब्दयोरध्याहारः कार्यः। सर्वेषु पादेषु द्वितीयो वर्णो गुरुरेव कार्य इति न समात्र पराश्रिता कलेत्यस्यापवादः शेषं यथाप्राप्तमिति भावः। इयं वैतालीयौपच्छन्दसिकापातलिकापूर्वकत्वेन त्रेधोदाहार्या। अस्मिन् भेदत्रयेऽपि विषमपादयोर्विकल्पौ द्वौ यथा ।S।S, ।S।।।. समयोश्चत्वारो यथा ।S।SS, ।S।।।S, ।S।S।।, ।S।।।।. द्वयोश्चतुर्णां च परस्परहतौ अष्टौ पूर्वार्द्धे द्वितीयार्धेऽपि तावन्त एव। तयोरन्योन्यघाते चतुःषष्टिभेदा भवन्ति ।

उदीच्यवृत्ति द्वितीयलः सक्तोऽग्रेण भवेदयुग्मयोः ॥ १६ ॥ इति।

अयुग्मयोर्विषमयोः प्रथमतृतीययोः पादयो द्वितीयलो द्वितीयमात्रा अग्रेण तदग्रिमेण लेन सक्तो युक्तश्चेत् तदा उदीच्यवृत्तिर्वदितेति वक्ष्यमाणानुषङ्गः शेषं यथाप्राप्तम्। इयं वैतालीयौपच्छन्दसिकापातलिकापूर्वकत्वेन त्रेधोदाहार्या अत्र द्वौ विषमयो विकल्पौ यथा SS।।, S।।।। समयोः पूर्वोक्ताश्चयोदश। परस्परहतौ षड्विंशतिः पूर्वार्धभेदाः। तावन्त एवापरत्र। परस्परहतौ जाता भेदाः षट् शतानि षट् सप्ततिश्च। अङ्कतोऽपि ६७६।

पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिर्वदितेति युग्मयोः ॥ १७ ॥ इति।

अथेति यदीत्यर्थे वैलक्ष्ये वा निपातानामनेकार्थत्वात्। युग्मयो द्वितीयचतुर्थपादयोः पञ्चमो लः पञ्चमी मात्रा पूर्वेण चतुर्थेन लघुना यदि युतः एकेन गुरुणा चतुर्थपञ्चममात्रयोरुपादानं यदि स्यादित्यर्थः तदा प्राच्यवृत्तिर्वदितोक्ता पिङ्गलादिभिरिति। समासान्त्रिष्वष्टलशब्दमनुषज्य व्याख्येयं शेषं यथाप्राप्तम्। अनयोरपि उदीच्यवृत्तिप्राच्यवृत्त्यो र्न समात्र पराश्रिता कलेत्यस्य पूर्ववदेवापवादः। सेयमपि पूर्ववत् त्रेधा॥ अत्र विषमयोः पूर्वोक्ता अष्टौ विकल्पाः। समयोश्चत्वारः यथा। S।S।S, ।।।S।S, S।S।।।, ।।।S।।।. अष्टानां

चतुर्भिर्हतौ द्वात्रिंशत् पूर्वार्धभेदाः तावन्त एवोत्तरार्धे। परस्परहतौ भेदाश्चतुर्विंशत्यधिकसहस्रं। अङ्कतोऽपि १०२४।

यदा समावोजयुग्मकौ पूर्वयोर्भवति तत् प्रवृत्तकम्॥ १८॥ इति।

यदा पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः समौ तुल्यौ क्रमेण ओजयुग्मकौ विषमसमपादौ स्यातां तत् तदा प्रवृत्तकं नाम। विषमयोः प्रथमतृतीययोः पादयोः द्वितीयतृतीयमात्रायोगः। समयोस्तु चतुर्थपञ्चममात्रायोगः स्यादिति भावः। इदं वैतालीयौपच्छन्दसिकापातलिकापूर्वकत्वेन त्रेधोदाहार्यम्। अत्र पूर्वोक्तविषमसमविकल्पानामन्योन्यहतौ संख्या स्वयमूहनीया। एवमपरान्तिकादिष्वपि।

अस्य युग्मरचितापरान्तिका॥ १९॥ इति।

अस्य प्रवृत्तकस्य युग्मपादैर्या सम्पूर्णा रचिता सा ऽपरान्तिका नाम। पञ्चमी चतुर्थमात्रायुक्ता षोडशमात्रता चतुर्ष्वपि पादेषु कार्येत्यर्थः। इयं च वैतालीयौपच्छन्दसिकापातलिकापूर्वकत्वेन पूर्ववत् त्रेधा। कश्चित् अस्य वैतालीयादिच्छन्दोवृन्दस्य युग्मरचितेति व्याचख्यौ। तन्मते वैतालीयादिपूर्वकत्वेन तत्पूर्वकप्राच्यवृत्तिपूर्वकत्वेन च षोढा। उदाहरणानीति तु स्वयमूह्यानि। भेदाः २५६॥

अयुग्भवा चारुहासिनी॥ २०॥ इति।

अस्य प्रवृत्तकस्यायुग्भवायुक्पादैः विषमपादैः रचिता चारुहासिनी। समस्तपादेषु चतुर्दशमात्राः द्वितीया तृतीयायुक्ता कार्येत्यर्थः। इयमपि पूर्ववत् त्रेधा। अस्येति वैतालीयादिच्छन्दोवृन्दपरत्वेन व्याचक्षाणस्य मते तु वैतालीयौपच्छन्दसिकापातलिकातदुदीच्यवृत्तिपूर्वकत्वेन षोढा। उदाहरणानि ऊह्यानि। भेदाः २५६। अन्येऽपि भेदा अन्यैरुक्तास्ते स्वकीयैरुदाहरणैः प्रदर्श्यन्ते। यथा वैतालीयसमपादचतुष्टययुतान्त्येयं दक्षिणान्तिका। यथा,—
पुरुषश्रेष्ठ तमः स पुरुषो विषये र्यस्य मनो हृतं न हि। पुरुषकुञ्जरः स पुरुषो विषयैर्यस्य मनो हृतं मुक्तः॥ वैतालीयविषमपादरचितोत्तरान्तिका।

यथा,—विषयान् विषमान् विषोपमानवधार्य्य ततोऽवधीर्य्य च। कुरु सर्वक-
चिन्तनं सदा यदि ते हितमीहितं स्वकम्॥ तथा आपातलिकाप्राच्यवृत्तयो
विषमसमपादाभ्यां यत् क्रमेण रचितोर्धपातलिका नाम। यथा, यः
पुरतो वक्त्यतिमिष्टं दोषभाषणरतः परोक्षतः। वाञ्छसि सौख्यं त्यज तं
कृष्णमिव संश्रितमरिं विषोपमम्॥ तथाद्यापातलिकादीनां सप्तानां छन्दसां
प्रतिपादमन्तेऽधिकैकगुरुयोगः स्यात् तदा तन्नामकान्यौपच्छन्दसिकानि सप्त
भवन्ति। तत्रापातलिकौपच्छन्दसिकम् यथा, आपातलिकादिषु चेदेको गुरु-
रधिको भवति प्रतिपादान्ते। आपातलिकादिकसंज्ञायुगौपच्छन्दसिकं तदाऽ-
भिप्रेतम्। एवं दक्षिणान्तिकौपच्छन्दसिकादौ ग्रन्थगौरवप्रसङ्गादस्मदनुक्तान्यु-
दाहरणान्यूह्यानि। एवं च वैतालीयसंख्या सप्तत्रिंशत् ३७।

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकराख्यायां
वैतालीयप्रकरणम्॥

अथ वक्त्रस्याष्टाक्षरत्वेनानुष्टुभि वक्त्रस्य व्यवस्थायामपि तद्वत् सकलनि-
यतगुरुलघुत्वाभावात् पथ्याचपलादिसंज्ञा कार्य्या। मात्रावृत्तनामसौकर्य्यात्र
मात्रावृत्तप्रस्ताव एव लक्षणमाह॥

वक्त्रं नाद्यान् नसौ स्यातामब्धे र्योऽनुष्टुभि ख्यातम्॥ २१॥ इति।

आद्यादक्षरादूर्धं नगणसगणौ न स्यातां,मगणादि र्यथेच्छं स्यात्, अब्धे-
चतुर्थादक्षरादूर्धं यः यगणः स्याद् यदि तदा वक्त्रं ख्यातं तच्चानुष्टुभि ख्यात-
मुक्तमाचार्य्यैरिति। यदातदाशब्दाध्याहारेण ख्यातशब्दावृत्त्या च व्याखेयय
यथा आद्याब्धेश्चेति गणग्रहणमपि सम्भवति तथानुष्टुभि ख्यातमित्यष्टाक्षरत्व-
सूचनागणचतुष्टयासम्भवादब्धिग्रहणं स्यात्,अक्षरपरता। आद्यग्रहणस्यापि
च तत्समभिव्याहाराद्गणग्रहणे चतुर्थाक्षरमादाय गणारम्भाच्चतुर्थाक्षरादूर्धं
यगणारम्भायोगाच्चाक्षरपरतैव। आद्यात् परतो नगणसगणनिषेधे न द्वितीय-
तृतीयवर्णात् परस्य गुरु नावश्यं भवतीति सूचितम्। अनुष्टुभि ख्यात-

मित्यनेनाष्टाक्षरपादता सूचिता। अतश्चानुक्तोऽप्यष्टमो वर्णो ज्ञेयः। समयोश्च पादयोः प्रथमादक्षरादूर्ध्वं रगणोऽपि न कार्यं इति सम्प्रदायः। अत्रादेव पादे प्रथमस्थाने गुरुलघुरूपौ द्वौ विकल्पौ, द्वितीये नसनिषेधाच्छेषाः षड् गणाः, तृतीयस्थाने एको य एव, चतुर्थे स्थाने द्वौ। अन्योन्यघाते चतुर्विंशतिः। एवं द्वितीयादिपादत्रयेऽपि प्रत्येकं चतुर्विंशतिः। तेषां परस्परहतौ जाता त्रयो लक्षाः एकत्रिंशत् सहस्राणि सप्त शतानि षट्सप्ततिः सङ्ख्या। अङ्कतोऽपि ३३१७७६। एषैव संख्या प्रत्येकं पथ्यावक्त्रादिषु विपूलास्वा। सम्प्रदायमाश्रित्य द्वितीयचतुर्थपादयो र्द्वितीयस्थाने रगणस्यापि निषेधात् समयोः प्रत्येकं विंशति भेदाः विषमयोश्चतुर्विंशतिरेव। तेषामन्योन्यघाते जाता सङ्ख्या लक्षद्वयं त्रिंशत् सहस्राणि चत्वारि शतानि। अङ्कतोऽपि २३०४००। अवशेषे सूत्रसत्रापवादेनास्यैव भेदानाह।

युजो र्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्त्तितम् ॥ २२ ॥ इति।

युजो र्युग्मयो र्द्वितीयचतुर्थचरणयोः सरिद्भर्त्तुश्चतुर्थाक्षरात् परेण जगणेन पथ्यावक्त्रं प्रकीर्त्तितम्। पिङ्गलेन 'पथ्या युजो ज्' इति सूत्र इत्यर्थः। विषमयोस्तु यगणः सामान्यप्राप्तः।

ओजयो र्जेन वारिधेस्तदेव विपरीतादि ॥ २३ ॥ इति।

विषमपादयोश्चतुर्थादूर्ध्वं जगणे तदेव पथ्यावक्त्रं विपरीतशब्दादि विपरीतपथ्येति ज्ञेयमित्यर्थः। समयो र्य एव ॥

चपलावक्त्रमयुजो र्नकारश्चेत् पयोराशेः ॥ २४ ॥ इति।

अयुजो र्विषमयोः पयोराशेश्चतुर्थान्नकारश्चेन्नगणश्चेच्चपलावक्त्रं। समयोर्य एव।

यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ॥ २५ ॥ इति।

युग्मे द्वितीये चतुर्थे च पादादेः सप्तमो वर्णो लो लघु र्यस्याः सा विपुला मता सम्मता। यद्यपि पथ्यायामपि युजोः सप्तमो लस्तथापि तत्र जगणेनैव।

अत्र तु नजभतैः सप्तमस्य लघुतेति न सङ्करः। तथापि जगणपक्षे सङ्कर एवेति चेत्, तर्हि तत्र संज्ञाविकल्प एवास्तु। ये त्वत्र जेव सप्तमेनैव लघुतेति असङ्करमाहुस्तेषां मूलसूत्र लक्ष्यविरोधो जगणेन लघुकरणात्। 'सैतवेन पथा-र्थवं तीर्णो दृग्गरयात्मजः। रत्नःचयकरीं पुनः प्रतिज्ञां स्वेन बाहुना' इति सैतवमतेन विपुलोदाहरणे जकारेणैव वृत्तिकृता लघुकरणात् तद्विरोधश्चेति पूर्वमेवोत्तरं सुक्तं संज्ञाविकल्प इति। अत्र समपादयोस्तृतीये स्थाने चत्वारो विकल्पाः शेषेषु प्राग्वत्। तेन समयोः परस्परहतौ षण्णवति भेदाः, विषमयोः प्रत्येकं पूर्ववच्चतुर्विंशतिः परस्परहतौ सङ्ख्या त्रिपञ्चाशच्छताः अष्टौ सहस्राः चत्वारि शतानि (षोडश)। अङ्कतोऽपि ५३८४१६। अत्रायुग्मे यसूत्रां लः साऽयुग्मविपुलेति प्रकारप्रस्तुषेणापि केचिद् व्याचक्षते। पादव्य-त्ययं यत्नोदाहरणमाहुः। विपरीतपथ्याचपलाभ्यां चैव भेदः। तत्र जगणनगणाभ्यां सप्तमस्य लघुता, अत्र तु भताभ्यामपि तथात्वमिति। उदा हरणं च सप्तमस्य लघुत्वमात्रतात्पर्येण जगणेन न त्वभावेनोक्तमिति चाहुः।

सैतवस्याखिलेष्वपि ॥ २६ ॥ इति।

सैतवस्याचार्यस्य मतेऽखिलेष्वपि पादेषु सप्तमो लः स्यादिति सूत्र इत्यध्याहारेण सप्तमो लं इति पादानुषङ्गेण व्याख्येयम्। संज्ञा विपुलेति निरूपपदैव। अत्र प्रतिपादं षण्णवति भेदाः। तेषां परस्परहतौ सङ्ख्या अष्टौ कोट्य एकोनपञ्चाशच्छताः चतुस्त्रिंशत् सहस्राणि षट्शती षट् पञ्चाशच्च। अङ्कतोऽपि ८४९३४६५६ ॥

भेनाब्धितो भाद्विपुला ॥ २७ ॥ इति।

अब्धितश्चतुरक्षरात् परेण भेन भगणेन भाद् भइत्यक्षरात् परा विपुला भविपुलेत्यर्थः। केचिदत्राखिलेष्वपि इत्यनुवर्तयन्ति। वृत्तिकृतस्तु "श्नौ स्तौ च" इति सूत्रे 'सर्वतः सैतवस्येति निवृत्तम्। चपलाऽयुजो नितय्याद्युग-ग्रहणमनुवर्तते' इति वदन्तो विषमपादविषया एव भविपुला इत्याहुः।

इत्वमन्या रश्चतुर्थात् ॥ २८ ॥ इति।

चतुर्थाचरात् परश्चेद् रगणस्तदेतमन्या यथा भाद्विपुला तथा रादिति रविपुलेत्यर्थः।

नोऽम्बुधेश्च नविपुला ॥ २९ ॥ इति।

अम्बुधेश्चतुर्थान् नो नगणश्चेत् तदा नपूर्वान्या विपुला नविपुलेत्यर्थः। एवं मयाभ्यां तत्पूर्वे विपुले भवतः। अत्रैतासु चतसृषु पादचतुष्केऽपि तत्तद्गणयोगस्य ये सत्वमाहुस्तेषां मते न यत्रैकस्मिन् द्वयोर्वा तत्तद्गणयोगस्तासां परस्परसंसर्गेणानेके भेदा ज्ञेयाः। हस्तिमते तु विषमपादयोरेतद्गणयोगः, अन्ययोस्तु सप्तमस्य लघुत्वमात्रम्। यत्र तु चतुर्ष्वपि पादेषु भादियोगः तस्यानुष्टुभमेव न तु वक्त्रत्वमिति विवेकः। तत्राप्ययुक्पादस्य जातिपरत्वे द्वयोरप्ययुजोर्भगणादियोगः, व्यक्तिपरत्वे त्वन्यतराङ्गीकारेणापि लक्षणार्थं तद्विरोधे तृतीये वा भगणादियोगः। जातिपक्षे भविपुलोदाहरणं, इयं सखे चन्द्रमुखी स्मितज्योत्स्ना च मानिनी। इन्दीवराक्षी हृदयं दहतीति तथापि मे ॥ आद्ये भविपुलोदाहरणं, उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता। समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥ तृतीये, प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा। कृष्णोत्तरासङ्गरुचं विदधच्चौतपल्लवीम् ॥ रेफविपुलायाः क्रमेणोदाहरणानि, सकारनानारकासकायसाददसायका। रसाहवा वाहसारनादवाददवादना ॥ महाकविं कालिदासं वन्दे वाग्देवतागुरुम्। यज्ज्ञाने विश्वमाभाति दर्पणे प्रतिबिम्बवत् ॥ कामिनीभिः सह प्रीतिः कस्मै नाम न रोचते। यदि न स्याद्वारिवीचिचञ्चलं हन्त जीवितम् ॥ नविपुलोदाहरणानि क्रमेण, युयुत्सुनेव कवचं किमामुक्तमिदं त्वया। तपस्विनो हि वसते केवलाजिनवल्कले ॥ अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम्। मौलैरानाययामासु भरतं स्तम्भिताश्रुभिः ॥ तव मन्वकृतो मन्त्रैर्दूरात्संशमितारिभिः। प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ तत्र तविपुलोदाहरणानि, सा वैदुष्यं प्रौढिर्वेदि सर्वशास्त्रविशारदा। सानुगामिनी विस्मेरा यस्योक्तौ पण्डिताः परे ॥ लोकवत् प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः। लोकव्यवहारं प्रति

सहस्रौ बालपण्डितौ॥ सविपुलोदाहरणानि, सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः। स्यातामभित्रौ मित्रे च सहजप्राकृतावपि॥ वियच्चमाणेनाहूतः पार्थेनाथ द्विषन्पुरम्। अभिषेदं प्रतिष्ठासुरासीत् कार्यद्वयाकुलः॥ षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः। ग्रन्थान-धीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम्॥ यविपुलोदाहरणानि, ततः कुमुदना-थेन कामिनीगण्डपाण्डुना। नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता॥ तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवम्। तत् प्रयोजककर्तृत्वमुपैति मम जल्पतः॥ एवं जविपुलाप्युदाहार्या। तत्र तु समपादयोश्चतुर्थादूर्ध्वं जगणेन पथ्यावक्त्रता सप्तमस्य लघुतामात्रत्वे जविपुलात्वमिति विवेकः॥ मविपुला तु कविप्रयोगाभावान्नास्ति। अन्येषां तु मते सुश्रुतसुनैवेतप्रादीनां विषमयोश्चपलादित्वात् समयोस्तु पथ्यात्वाच्चपलापथ्यावक्त्रादि संज्ञा भवन्ति। एवं विपुलापथ्येत्यादिसंज्ञा ज्ञेयाः। अत्र दृष्टिखण्डमते सर्वासु भविपुलादिषु विषमपादयोः प्रत्येकं चतुर्विंशति भेदाः, समयोः प्रत्येकं षण्णवतिः। पर-स्परहतौ युग्मविपुलावत् सङ्ख्या ज्ञेया। अन्येषां मते तु सुखवक्त्रवत्संख्या। तथा संकीर्णत एषां संकीर्णविपुलावक्त्रं भवति। भारवेः, क्वचित् काले प्रसरता क्वचिदापतत्र निम्नता। शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां कुलम्॥ कुमारे, यदध्यक्षेण जगतां वयमारोपितास्त्वया। मनोरथस्याप्यपथं मनोविषय-मात्मनः॥ माघे, भवद्भिरामवसरप्रदानाय वचांसि नः। पूर्वरङ्गप्रसङ्गाय नाटकीयस्य वस्तुनः॥ इत्यादयो विपुलाभेदा अनन्ता एव कविप्रयोगेषु द्रष्टव्याः। सर्वेषु तु प्रायेण चतुर्थवर्णस्य गुरुतेति साम्प्रदायिकाः॥

इतिश्रीनारायणभट्टविरचितायां छन्दोरत्नाकरटीकायां वक्त्रप्रकरणम्॥

अथ मात्रासमान्याह॥ द्विगुणितवसुलघुरचलधृतिरिति च॥ ३१॥ इति।

वर्णच्छन्दोऽप्येतद् द्विगुणितवसुपदस्योत्तरानुवृत्तिसिध्यर्थं प्रकीर्णकेऽभ्य-धायि। तेन मात्रासमकादिषु षोडशमात्रत्वमधिकृतं भवति। द्विगुणवसुलघुः

द्वावष्टौ लघवो यस्यां सा अचलधृतिरिति कथ्यते। चकाराद् गीत्यार्येति संज्ञा भवति इति पिङ्गलमतसंग्रहः। षोडश लघुपादेत्यर्थः।

मात्रासमकं नवमो ल् गान्तम्॥ ३१॥ इति।

यत्र पादे नवमो लघुरेव गुरुश्चान्तनियतस्तन्मात्रासमकसंज्ञम्। नवमान्त्ययोर्लघुगुरुनियमाच्छेषे नियमाभावः सूचितः। सर्वथा षोडशमात्रता कार्येति भावः। सर्वेषु मात्रासमेषु समात्रा परमात्रया युक्ता न कार्येत्यपि सम्प्रदायः। ततश्च प्रथमे जगणाभावाच्चत्वारो गणविकल्पाः॥ यथा ऽऽ, ॥ऽ, ऽ॥, ॥॥, द्वितीये त्रयः ऽऽ, ऽ॥, ॥ऽ, मध्यगुरुसर्वलघू विश्लोकस्य इष्टत्वान्न भवतः। तृतीये एकः ॥ऽ, नवमो लिति वचनादादिगुरुर्न भवति। मध्यगुरुसर्वलघू तु वासिकावचनस्येष्टत्वान्न भवतः। चतुर्थे द्वौ ऽऽ, ॥ऽ, गन्तत्वाभिधानादन्ये गणा न भवन्ति। एतेषां विकल्पानामन्योन्यघाते प्रतिचरणं चतुर्विंशति र्भेदाः। चतुर्णां चतुर्विंशत्यङ्कानामन्योन्यहतौ वक्ष्यवदेव जाता सङ्ख्या लक्षत्रयम् एकत्रिंशत्सहस्रौ षट्सप्तत्यधिकसप्तशती चेति।

जो ल्नावथाम्बुधे विश्लोकः॥ ३२॥ इति।

अथेत्यथवेतत्रयं अम्बुधेः कलाचतुष्टयादूर्ध्वं जगणोऽथवा लौ चतुर्लघु र्वा गणः स्याच्छेषं पूर्ववत् स विश्लोको नाम मात्रासमकम्। यद्यपि विश्लोकः पञ्चमाष्टमाविति सूत्रे पञ्चमाष्टममात्रयोर्लघुत्वमात्रमुक्तं तथापि पञ्चमाष्टमयो र्लघुता चतुर्थमात्रानन्तरं जगणचतुर्लघ्वोरेव भवति नान्यथेत्यभिप्रायेणैवमूचिवान्। जपक्षे इदमेवोदाहरणं लपक्षे तु 'सेव्यो-रघुपतिरामहितार्थम्'। अत्राद्यगणे विकल्पाश्चत्वारः यथा ऽऽ, ॥, ऽ॥, ॥॥, द्वितीये द्वौ ।ऽ।, ॥॥. तृतीयेऽपि द्वौ ऽऽ, ऽ॥. मध्यगुर्वन्तगुरुसर्वलघुरूपं भेदत्रयं तु मात्रासम चित्रापादकत्वान्न भवति। चतुर्थे गुर्वन्तगणद्वयं ऽऽ. एतेषां परस्परघाते द्वात्रिंशत् सन्ति पादभेदाः। एतेषां घाते जाता सङ्ख्या दश लक्षाः अष्टाचत्वारिंशत् सहस्राणि पञ्च शतानि षट् सप्ततिः। अङ्कतोऽपि १०४८५७६।

तद्युगलाद्वानवासिका स्यात् ॥ ३४ ॥ इति ।

तद्युगलाद्द्धि युगलादष्टमात्रानन्तरं यदि जो न्लौ वा स्यात् सा वानवासिकेति। जोन्लावथेति पदत्रयमनुषज्य योज्यम्। अत्रापि 'द्वादशश्च वानवासिका' इति सूत्रे द्वादश चकारलब्धनवमयो र्लघुतोक्ता सा चैवमेव नान्यथेतेत्यवसुत्तम्। अपच इदमुदाहरणम्। तपश्चे यथा। 'लोकहितार्थं हरिहरमूर्तौ' अत्रादेत्र गणे विकल्पाश्चत्वारः ऽऽ, ॥ऽ, ऽ॥, ॥॥. ॥ द्वितीये त्रयः ऽऽ, ऽ॥, ॥ऽ. तृतीये द्वौ ।ऽ।, ॥॥. चतुर्थेऽपि द्वौ ऽऽ, ॥ऽ. एतेषामन्योन्यताड़ने भेदाः प्रतिपादम् अष्टाचत्वारिंशत्। अन्योन्यहतौ जाता सङ्ख्या त्रिपञ्चाशल्लक्षाः अष्टौ सहस्राणि चत्वारि शतानि षोड़श च। अङ्कतोऽपि ५३०८४१६।

वाणाष्टनवसु यदि लश्चित्रा ॥ ३५ । इति॥

वाणाः पञ्च पञ्चमाष्टनवसु यदि लघुः स्यात् शेषं पूर्ववत् तदा चित्रा नाम। असत्रामाद्ये गणे चत्वारो विकल्पाः पूर्ववत्। द्वितीयेऽपि द्वौ ।ऽ।, ॥॥. तृतीये त्रयः ॥ऽ, ।ऽ।, ॥॥. चतुर्थे द्वौ ऽऽ, ॥ऽ. अन्योन्यघाते प्रतिपादं भेदसंख्या अष्टाचत्वारिंशत्। अन्योन्यगुणने पूर्वैव संख्या॥

उपचित्रा नवमे परयुक्ते ॥ ३६ ॥ इति।

नवमे मात्रास्वरूपे दशमेन परेण युक्ते सति मिलिते सति उपचित्रा नाम शेषं प्राग्वत्। जयदेवस्तु कादशद्वादशादिमात्रास्वपि नियममाह 'अष्टभ्यो गो ल्यावुपचित्रेति' अष्टकलानन्तरं गुरुलघुयगणा इत्यर्थः। अत्र तृतीयगणे द्वौ विकल्पौ ऽऽ, ऽ॥. अन्ये गणविकल्पा मात्रासमकवत्। अन्योन्यघाते प्रतिपादं भेदा अष्टाचत्वारिंशत् अन्योन्यघाते संख्या प्राग्वत्।

यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम्।

अनियतवृत्तपरिमाणयुक्तं प्रथितं जगत्सु पादाकुलकम्॥ ३७ ॥इति।

अतीतानि पूर्वोक्तानि कृतानि विविधानि नानाप्रकाराणि यानि लक्ष्माणि लक्षणानि तद्युक्तैः मात्रासमादीनां पद्यानां पादैः कलितं रचितं तथाऽनियतवृत्तपादचतुष्केऽपि नियतैकवृत्तलक्षणहीनं परिमाणे च

द्वावष्टौ लघवो यस्यां सा अचलधृतिरिति कथ्यते। चकाराद् गीत्यार्येति संज्ञा भवति इति पिङ्गलमतसंग्रहः। षोडश लघुपादेत्यर्थः।

मात्रासमकं नवमो ल् गान्तम्॥ ३१॥ इति।

यत्र पादे नवमो लघुरेव गुरुश्चान्तनियतस्तन्मात्रासमकसंज्ञम्। नवमान्त्ययोर्लघुगुरुनियमाच्छेषे नियमाभावः सूचितः। सर्वथा षोड़शमात्रता कार्येति भाव.। सर्वेषु मात्रासमेषु सममात्रा परमात्रया युक्ता न कार्येत्यपि सम्प्रदायः। ततश्च प्रथमे जगणाभावाच्चत्वारो गणविकल्पाः॥ यथा ऽऽ, ।।ऽ, ऽ।।, ।।।।, द्वितीये त्रयः ऽऽ, ऽ।।, ।।ऽ, मध्यगुरुसर्वलघू विश्लोकस्य दुष्टत्वान्न भवतः। तृतीये एकः ।।ऽ, नवमो लिति वचनादादिगुरुर्भवति। मध्यगुरुसर्वलघू तु वासिकालक्षणस्य दुष्टत्वान्न भवत.। चतुर्थे द्वौ ऽऽ, ।।ऽ, गन्तत्वाभिधानादन्ये गणा न भवन्ति। एतेषां विकल्पानामन्योन्यघाते प्रतिचरणं चतुर्विंशति र्भेदाः। चतुर्णां चतुर्विंशत्यङ्कानामन्योन्यहतौ वक्ष्यवदेव जाता सङ्ख्या लक्षत्रयम् एकत्रिंशत्सहस्रौ षट्सप्तत्यधिकसप्तशती चेति।

जो ल्नावथाम्बुधे वि`श्लोकः॥ ३२॥ इति।

अथेत्ययमेतत्रयर्थे अम्बुधेः कलाचतुष्टयादूर्ध्वं जगणोऽथवा लौ चतुर्लघु र्वा गणः स्याच्छेषं पूर्ववत् स विश्लोको नाम मात्रासमकम्। यद्यपि विश्लोकः पञ्चमाष्टमाविति सूत्रे पञ्चमाष्टममात्रयोर्लघुत्वमात्रमुक्तं तथापि पञ्चमाष्टमयो र्लघुता चतुर्थमात्रानन्तरं जगणचतुर्लघोरेव भवति नान्यथेतत्रभिप्रायेणैवमूचिवान्। जपक्षे इदमेवोदाहरणं लपक्षे तु 'सेव्यो-रघुपतिरामञ्चितार्थम्'। अत्राद्यगणे विकल्पाश्चत्वारः यथा ऽऽ, ।।, ऽ।।, ।।।।, द्वितीये द्वौ ।ऽ।, ।।।।. तृतीयेऽपि द्वौ ऽऽ, ऽ।।. मध्यगुर्वन्तगुरुसर्वलघुरूपं भेदत्रयं तु मात्रासम चित्रापादकत्वान्न भवति। चतुर्थे गुर्वन्तगणद्वयं ऽऽ. एतेषां परस्परघाते द्वात्रिंशत् सन्ति पादभेदाः। एतेषां घाते जाता सङ्ख्या दश लक्षाः अष्टाचत्वारिंशत् सहस्राणि पञ्च शतानि षट्सप्ततिः। अङ्कतोऽपि १०४८५७६।

तद्युगलाद्वानवासिका स्यात् ॥ ३४ ॥ इति।

तद्युगलाद्वब्धियुगलादष्टमात्रानन्तरं यदि जो न्लौ वा स्यात् सा वानवासिकेति। जोन्लावथेति पदत्रयमनुषज्य योजनम्। अत्रापि 'द्वादशश्च वानवासिका' इति सूत्रे द्वादश चकारलब्धनवमयो र्लघुतोक्ता सा चैवमेव नान्यथेतेत्र्यवसुक्तम्। जपच इदमुदाहरणम्। तपश्चे यथा। 'लोकहितार्थं हरिहरमूर्तौ' अत्रादेत्र गणे विकल्पाश्चत्वारः ऽऽ, ।।ऽ, ऽ।।, ।।।।. ॥ द्वितीये त्रयः ऽऽ, ऽ।।, ।।ऽ. तृतीये द्वौ ।ऽ।, ।।।।. चतुर्थेऽपि द्वौ ऽऽ, ।।ऽ. एतेषामन्योन्यताड़ने भेदाः प्रतिपादम् अष्टाचत्वारिंशत्। अन्योन्यहतौ जाता सङ्ख्या त्रिपञ्चाशल्लक्षाः अष्टौ सहस्राणि चत्वारि शतानि षोड़श च। अङ्कतोऽपि ५३०८४१६।

वाणाष्टनवसु यदि लश्चित्रा ॥ ३५। इति॥

वाणाः पञ्च पञ्चमाष्टनवसु यदि लघुः स्यात् शेषं पूर्ववत् तदा चित्रा नाम। असत्रामाद्ये गणे चत्वारो विकल्पाः पूर्ववत्। द्वितीयेऽपि द्वौ ।ऽ।, ।।।।. तृतीये त्रयः ।।ऽ, ।ऽ।, ।।।।. चतुर्थे द्वौ ऽऽ, ।।ऽ. अन्योन्यघाते प्रतिपादं भेदसंख्या अष्टाचत्वारिंशत्। अन्योन्यगुणने पूर्वैव संख्या॥

उपचित्रा नवमे परयुक्ते ॥ ३६ ॥ इति।

नवमे मात्रास्वरूपे दशमेन परेण युक्ते सति मिलिते सति उपचित्रा नाम शेषं प्राग्वत्। जयदेवस्वेकादशद्वादशादिमात्रास्वपि नियममाह 'अष्टभ्यो गो ल्यावुपचित्रेति' अष्टकलानन्तरं गुरुलघुयगणा इत्यर्थः। अत्र तृतीयगणे द्वौ विकल्पौ ऽऽ, ऽ।।. अन्ये गणविकल्पा मात्रासमकवत्। अन्योन्यघाते प्रतिपादं भेदा अष्टाचत्वारिंशत् अन्योन्यघाते संख्या प्राग्वत्।

यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम्।

अनियतवृत्तपरिमाणयुक्तं प्रथितं जगत्सु पादाकुलकम्॥ ३७ ॥इति।

अतीतानि पूर्वोक्तानि कृतानि विविधानि नानाप्रकाराणि यानि लक्ष्माणि लक्षणानि तद्युक्तैः मात्रासमादीनां पञ्चानां पादैः कलितं रचितं तथाऽनियतवृत्तपादचतुष्केऽपि नियतैकवृत्तलक्षणहीनं परिमाणे च

षोडशमात्रपादत्वेन युक्तं ततः कर्मधारयः एतादृशं यद्वृत्तं तत् पादाकुलकमिति अन्वर्थसंज्ञा च येति तच्छब्दाध्याहारेण योजनम्। अथ प्रथम पादे मात्रासमकविश्लोकचित्राणां लक्षणयोगः, विश्लोकोपचित्रयो र्द्वितीये, मात्रासमवासिकयोस्तृतीये, उपचित्राविश्लोकयोश्चतुष्कयोर्द्वि चतुर्थे इति। इदं च प्रतिपादमनेकलक्षणयोगं मत्वोदाहरणं मन्तव्यम्। अन्ये तु प्रतिपादमेकलक्षणयोगं वदन्तः समुदितेषु विविधलक्षणयोगाभिप्रायेणेदं व्याचक्षते। वयं तूभयथा व्याख्याने दोषाभावं वदामः॥ अतएव मात्रासमकादिप्रज्ञत्या एभिः पादाकुलकमिति सूत्रकारः सामान्यत एवाह। तथा मात्रासमकविश्लोकवानवासिकोपचित्राणामसंकीर्णं यावदुदाहरणं चाह हलिश्वत् यथा, ‘अलिवाचालितविकसितचूते काले मदनसमागमदूते। स्मृत्वा कान्तापरिहृतसार्थः पादाकुलकं धावति पान्थः’ इति। संकीर्णोदाहरणं तु मूल एव। तेनोभयथापि न दोषः। अत्र पञ्चानां मात्रासमकादीनां परस्परसंकरे अनन्ता एव भेदाः॥ तत्र यथा द्वयो र्द्वयोः सङ्करे चत्वारिंशदधिकं शतं भेदा भवन्ति। तद्यथा

१२३४
२३४५

अत्रैककोष्ठस्थाङ्कद्वयसंज्ञाङ्कः वृत्तद्वयस्य सङ्करे वक्ष्यमाणोपजातिप्रस्तारमार्गेण चतुर्दश चतुर्दश प्रतिकोष्ठं भेदा भवन्ति। एवं च प्रथमद्वितीययोः प्रथमतृतीययोः प्रथमचतुर्थयोः प्रथमपञ्चमयोः संकरे चत्वारश्चतुर्दशका मिलिताः षट्पञ्चाशद्भवन्ति ५६॥ तथा द्वितीयतृतीयद्वितीयचतुर्थद्वितीयपञ्चमानां संकरे द्विचत्वारिंशत् ४२॥ तथा तृतीयचतुर्थतृतीयपञ्चमानां सङ्करे अष्टाविंशतिः २८। तथा चतुर्थपञ्चमयोः संकरे चतुर्दशेति। सर्वेषां मेलने शतमेकं चत्वारिंशच्च १४०॥ एवं त्रयाणां चतुर्णां संकरेऽप्यूह्याः॥ एतेषामुदाहरणानि ऊह्यानि। विस्तरभयात्तु नोच्यन्ते। अत्राचलधृत्यादीनां सर्वेषां षोडशमात्रपदत्वेन समत्वान्मात्रासमकसंज्ञा। अथोक्तानां वक्ष्यमाणानां च वृत्तानां गुरुलघुमात्रावर्णं यथापरिज्ञानोपायमाह।

वृत्तस्य ला विना वर्णैं र्गा वर्णा गुरुभिस्तथा।
गुरवो लै र्दले नित्यं प्रमाणमिति निश्चितम्॥ ३८॥ इति।

वृत्तस्य ला मात्रा वर्णैर्विना गा गुरवो ज्ञेया इत्यध्याहारः। ला वर्णा गा इत्यादिभिः शब्दैस्तत्तत्सङ्ख्या लक्ष्यते। ततश्चायमर्थः यदि वृत्तस्य मात्रावर्णयोः सङ्ख्या विज्ञाता गुरुलघुसङ्ख्या चाज्ञाता तदा मात्रासङ्ख्यामपनीयावशिष्टा गुरुसङ्ख्या ज्ञेयेति, वर्णसङ्ख्यामध्ये च ज्ञाता गुरुसङ्ख्यामपनीयावशिष्टा लघुसङ्ख्या ज्ञेयेत्याशयः। यदि तु मात्राणां गुरूणां च ज्ञातसङ्ख्यत्वं वर्णानामज्ञातसङ्ख्या तदा तज्ज्ञानोपायमाह वर्णा इति। तथा वृत्तमात्रागुरुभिर्विना वर्णा ज्ञेयाः वृत्तमात्रासङ्ख्यायां गुरुसंख्यामपनीयावशिष्टा वर्णसंख्येत्यर्थः। वृत्तमात्रालघुसङ्ख्याया गुरुलघुसंज्ञाने सति गुरुज्ञाने प्रकारान्तरमाह गुरव इति। वृत्तस्य ला इत्यनुषङ्गः। वृत्तस्य मात्रा लैर्लघुभिर्विना दले ऽर्धे कृते गुरवः ज्ञेयाः। वृत्तमात्रासङ्ख्यायां लघुसङ्ख्यामपनीयावशिष्टां सङ्ख्याम् अर्धीकृत्य तावत्प्रमाणा गुरुसंख्येत्यर्थः। उक्तां गुर्वादिसङ्ख्यामुपहरति नियममिति। इत्यमुना प्रकारेण प्रमाणं गुर्वादीनां नित्यं सर्वदा निश्चितं भवतीति शेषः। वृत्तस्येत्युपलक्षणं गद्यादावपि सम्भवात्। अत्र च गुरुवर्णसङ्ख्याज्ञानोपायप्रदर्शनमुपलक्षणार्थम्। तथा हि मात्रावर्णगुरुलघुचतुष्टयात्मके वृत्ते द्वयोर्द्वयोरियत्तापरिच्छेदेऽन्ययोः सङ्ख्यापरिच्छित्तिः, तद्यथा मात्रावर्णयोरियत्तापरिच्छेदेऽन्ययोः सङ्ख्यापरिच्छित्तिः। तद्यथा, मात्रावर्णयोर्मात्रालघ्वोर्वर्णगुर्वोर्वर्णलघ्वोर्मात्रागुर्वोर्गुरुलघ्वोश्च षट्सु द्विकेषु एकैकद्विकज्ञाते परे द्विकमुक्तया दिशा ज्ञेयमिति। इदं सर्वमुदाहरणे योज्यते। ‘वागर्थाविव संपृक्तौ’ इत्यत्र चतुर्दशमात्रासु अष्टरूपां वर्णसङ्ख्यामपनीयावशिष्टाः षड् गुरवः वर्णसङ्ख्या, पूरकौ च द्वौ लघू। एवं षड्रूपां गुरुसङ्ख्यामपनीयावशिष्टा वर्णा अष्टौ, गुरूणां षट्त्वादवशिष्टौ द्वौ लघू। एवं लघुद्वयमपनीयावशिष्टद्वादशसङ्ख्यायामर्धितायां षट् सङ्ख्या गुरवः, गुरुभिर्द्वादशमात्रासिद्धेश्चतुर्दशमात्रासिद्ध्यर्थं द्वौ लघू इति। एवं वर्णगुरुज्ञाने वर्णलघुज्ञाने गुरुलघुज्ञाने चेतरद्वयज्ञानं योज्यं। एवं सर्वेषु गद्यपद्येषु।

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां मात्रासमप्रकरणम्॥

मात्रानियमघटितत्वान्मात्रावृत्तप्रसङ्गेन शिखखञ्जकाभ्याह ।

शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलम् ।

सगुरु शकलयुगलकमपि सुपरिघटितललितपदवितति भवति शिखा ॥३९॥

इति ।

गार्हपत्याहवनीयदक्षिणाग्नयस्त्रयोऽग्नयः । तैः शिखाख्या तत्संख्या लक्ष्यते । तेन शिखिभिर्गुणितास्त्रिगुणीकृता ये दश लघवस्तै रचितमेव शकलमित्यध्याहारः, अपरमित्यभिधानात् । तत्रापगतं न्यूनं लघुद्वयं यस्मात् तादृक् कार्यं । अपरं द्वितीयं शकलमित्यर्थः इदं पूर्वोक्तमखिलं समग्रं लघुना न्यूनं त्रिंशल्लघुकं भवति । शकलयुगलकमर्धद्वयमपि सगुरु अन्तेऽधिकैकगुरुयुक्तं सुष्ठु परिघटिता रचिता ललिता पदविततिः पदरचना यत्र तादृशं भवति शकलं युगलं यस्यां सा शिखेति यत्तच्छन्दोऽध्याहारेणार्थः । अयं भावः पूर्वार्धे अष्टाविंशतिर्लघवः एको गुरुरिति एकोनत्रिंशदक्षराणि, उत्तरार्धे त्रिंशल्लघवः एको गुरुरिति एकत्रिंशदक्षराणि यत्र सा शिखेति । सुपरिघटितेति पदेन श्रुतिसुखकर्त्री यतिः कार्येति सूचयति ।

विनिमयविनिहितशकलयुगलकलितपदविततिविरचितगुणनिचया ।

श्रुतिसुखकृदियमपि जगति ज्जि जशिर उपगतवति सति भवति खजा ॥

४० ॥ इति ।

इयमेव शिखा यदि विनिमयेन व्यत्यासेन विहितं निवेशितं यच्छकलयुगलं तेन कलिता घटिता पदसमुदायकृतसौकुमार्यादिगुणसमुदायवती च कलितान्तस्य पदादिना कर्मधारयः श्रुतिसुखकारिणी चेति पूर्ववद्यतिः कार्येति सूचितम् । ज्जि अकारे जशिर इति जकारप्राग्दाहरणं प्राप्ते सति खजा भवन्ति खञ्जेति यावत् । गुरुद्वयमत्र छन्दसि प्रवेशयितुमशक्यत्वादुक्तिप्रकारोऽयम् । विनिमयविनिहितशकलयुगलकलितपदविततिरचितगुणनिचयेति युगलान्तस्य लघ्वित्यादिना कर्मधारयः । यद्यपि सूत्रकारेणार्धे इत्यधिकृत्य 'शिखैकोनत्रिंशदेकत्रिंशदन्ते ग्' इति 'खञ्जा मद्वत्ययुजीति' च वदता पूर्वोक्तनियमवदेकोनत्रिंशदक्षरैकत्रिंशदक्षररचितकम-

लघुक्रमवत् पादद्वयघटितार्धं द्वयवत्यौ विंशत्यधिकशतावर्णैः शिखाखञ्जे उक्ते अत्र षष्ठ्यक्षरे एवेति विरोधस्तथापि ग्रन्थान्तरपर्यालोचनया एवमुक्तिः। यद्वा सूत्रकारोक्तिशिखाखञ्जाभ्यामेते अन्ये एव सूत्रानुक्ते एव प्रोक्ते। सूत्रोक्ते तु चतुर्थाध्यायेऽर्धसमत्वात् स्वयमूह्यम्। अथवोभयत्रापि शकलशब्दौ अवयववचनत्वात् पादरूपावयवपरौ कृत्वा मूलोदाहरणे च अर्धविषये मत्वार्धसमत्वेऽपि च मात्रानियमात्मकत्वान्मात्रावृत्तप्रकारेणोक्तिं समाधाय सूत्रानुसारः कार्य इति सर्वमूह्यम्।

अष्टावर्धे गा द्व्यभ्यस्ता यस्याः सानङ्गक्रीडोक्ता।

दलमपरमपि वसुगुणितसलिलनिधिलघु कविरचितपदविततिं भवति ॥ ४१ ॥ इति।

यस्य अर्धेऽष्टौ गा गुरवो द्व्यभ्यस्ता द्विगुणाः षोडशेत्यर्थः। अपीति चार्थः। अपरञ्च दलं द्वितीयमपि वसवोऽष्टौ तैर्गुणिताः सलिलनिधिलघवश्चत्वारो लघवो द्वात्रिंशद्यत्र तत्तादृक् कविना रचिता पदानां विततिर्विस्तरो यत्र तदा भवति सा अनङ्गक्रीडेति संज्ञयोक्ता वृत्तज्ञैः। पूर्वार्धे षोडश गुरवः उत्तरार्धे द्वात्रिंशल्लघवः कार्या इति तात्पर्यार्थः। कवीत्यादिना श्रुतिसुखा यतिर्भवतीत्यसूसुचत्। पैङ्गले त्वियं सौम्येति संज्ञितम्। इयमेव व्यत्यस्तार्धतायां ज्योतिराख्या भवति। उदाहरणं तु, 'यदि सुखमनुपममपरमभिलषसि परिहर युवतिषु रतिमतिशयमिह। आत्मज्योतिर्योगाभ्यासात् दृष्ट्वा दुःखच्छेदं कुर्याः॥' अनयोर्द्वयोः शिखेति सामान्यसंज्ञा पैङ्गल उक्ता।

त्रिगुणनवलघुरवसितिगुरुरिति दलयुगलकृततनु रतिरुचिरा ॥४२॥ इति।

त्रिगुणा नव लघवो यत्र सप्तविंशतिरित्यर्थः अवसिताववसाने गुरुर्यस्याः सा तथा इत्यमुना प्रकारेणार्धद्वयरचितशरीरा रतिरुचिरा संज्ञा। पैङ्गले त्वियं चूलिकेत्युक्ता। अर्धसमत्वेऽपि अस्य मात्रामात्रघटितत्वादत्रोक्तिः। "चूलिकैकोनत्रिंशदन्ते ग्" इति सूत्रपाठपक्षेणैवमुक्तम्। "चूलि-

मित्यनेनाष्टाक्षरपादता सूचिता। अतश्चानुक्तोऽप्यष्टमो वर्णो ज्ञेयः। समयो-श्च पादयोः प्रथमादक्षरादूर्ध्वं रगणोऽपि न कार्यं इति सम्प्रदायः। अत्रादेत्र पादे प्रथमस्थाने गुरुलघुरूपौ द्वौ विकल्पौ, द्वितीये नसनिषेधाच्छेषाः षड्गणाः, तृतीयस्थाने एको य एव, चतुर्थे स्थाने द्वौ। अन्योन्यघाते चतुर्विंशतिः। एवं द्वितीयादिपादत्रयेऽपि प्रत्येकं चतुर्विंशतिः। तेषां परस्परहतौ जाता त्रयो लक्षाः एकत्रिंशत् सहस्राणि सप्त शतानि षट्सप्ततिः सङ्ख्या। अङ्कतोऽपि ३३१७७६। एषैव संख्या प्रत्येकं पथ्यावक्त्रादिषु विषूह्या। सम्प्रदायमाश्रित्य द्वितीयचतुर्थपादयो द्वितीयस्थाने रगणस्यापि निषेधात् समयोः प्रत्येकं विंशति भेदाः विषमयोश्चतुर्विंशतिरेव। तेषामन्योन्यघाते जाता सङ्ख्या लक्ष-द्वयं त्रिंशत् सहस्राणि चत्वारि शतानि। अङ्कतोऽपि २३०४००। अनुधेयं इत्य-स्यापवादेनास्यैव भेदानाह।

युजो र्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम्॥ २२॥ इति।

युजो युग्मयो द्वितीयचतुर्थचरणयोः सरिद्भर्तुश्चतुर्थाक्षरात् परेण जग-णेन पथ्यावक्त्रं प्रकीर्तितम्। पिङ्गलेन 'पथ्या युजो ज्' इति सूत्र इत्यर्थः। विषमयोस्तु यगणः सामान्यप्राप्तः।

ओजयो र्जेन वारिधेस्तदेव विपरीतादि॥ २३॥ इति।

विषमपादयोश्चतुर्थादूर्ध्वं जगणे तदेव पथ्यावक्त्रं विपरीतशब्दादि विपरीतपथ्येति ज्ञेयमित्यर्थः। समयो र्येव॥

चपलावक्त्रमयुजो र्नकारश्चेत् पयोराशेः॥ २४॥ इति।

अयुजो विषमयोः पयोराशेश्चतुर्थान्नकारश्चेन्नगणश्चेच्चपलावक्त्रं। सम-योर्य एव।

यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता॥ २५॥ इति।

युग्मे द्वितीये चतुर्थे च पादादेः सप्तमो वर्णो लो लघु र्यस्याः सा विपुला मता सम्मता। यद्यपि पथ्यायामपि युजोः सप्तमो लस्तथापि तत्र जगणेनैव।

अत्र तु नजभतैः सप्तमस्य लघुतेति न सङ्करः। तथापि जगणपक्षे सङ्कर एवेति चेत्, तर्हि तत्र संज्ञाविकल्प एवास्तु। ये त्वत्र जेव सप्तमेनैव लघुतेति असङ्करमाहुस्तेषां मूलस्य लक्ष्यविरोधो जगणेन लघुकरणात्। 'सैतवेन पथार्णवं तीर्णो दशरथात्मजः। रक्षःक्षयकरीं पुनः प्रतिज्ञां स्वेन बाहुना' इति सैतवमतेन विपुलोदाहरणे जकारेणैव वृत्तिकृता लघुकरणात् तद्विरोधश्चेति पूर्वमेवोत्तरं युक्तं संज्ञाविकल्प इति। अत्र समपादयोस्तृतीये स्थाने चत्वारो विकल्पाः शेषेषु प्राग्वत्। तेन समयोः परस्परहतौ षण्णवति भेदाः, विषमयोः प्रत्येकं पूर्ववच्चतुर्विंशतिः परस्परहतौ सङ्ख्या त्रिपञ्चाशल्लक्षाः अष्टौ सहस्राः चत्वारि शतानि (षोडश)। अङ्कतोऽपि ५३८४१६। अत्रायुग्मे यस्यां लः साऽयुग्मविपुलेति प्रकारान्तरेणापि केचिद् व्याचक्षते। पादव्यत्ययं चात्रोदाहरणमाहुः। विपरीतपथ्याचपलावक्त्राभ्यां चैव भेदः। तत्र जगणनगणाभ्यां सप्तमस्य लघुता, अत्र तु भताभ्यामपि तथात्वमिति। उदाहरणं च सप्तमस्य लघुत्वमात्रतात्पर्येण जगणेन न स्वभावेनोक्तमिति चाहुः।

सैतवस्याखिलेष्वपि ॥ २६ ॥ इति।

सैतवस्याचार्यस्य मतेऽखिलेष्वपि पादेषु सप्तमो लः स्यादिति स्मृत इत्यध्याहारेण सप्तमो लं इति पादानुषङ्गेण व्याख्येयम्। संज्ञा विपुलेति निरूपपदैव। अत्र प्रतिपादं षण्णवति भेदाः। तेषां परस्परहतौ सङ्ख्या अष्टौ कोटय एकोनपञ्चाशल्लक्षाः चतुस्त्रिंशत् सहस्राणि षट्शती षट् पञ्चाशच्च। अङ्कतोऽपि ८४९३४६५६ ॥

भेनाब्धितो भाद्विपुला ॥ २७ ॥ इति।

अब्धितश्चतुर्थात् परेण भेन भगणेन भाद् भ इत्यक्षरात् परा विपुला भविपुलेत्यर्थः। केचिदत्राखिलेष्वपि इत्यनुवर्त्तयन्ति। वृत्तिकृतस्तु "श्नौ न्तौ च" इति सूत्रे 'सर्वतः सैतवस्येति निवृत्तम्। चपलाऽयुजो नितस्माद्युग्ग्रहणमनुवर्तते' इति वदन्तो विषमपादविषया एव भविपुला इत्याहुः।

इत्यमन्या रश्चतुर्थात् ॥ २८ ॥ इति।

चतुर्थाक्षरात् परतश्चेद् रगणस्तदेत्यमन्या यथा भाद् विपुला तथा रादिति रविपुलेत्यर्थः।

मोऽम्बुधेश्च नविपुला ॥ २८ ॥ इति।

अम्बुधेश्चतुर्थात् नो नगणश्चेत् तदा नपूर्वान्या विपुला नविपुलेत्यर्थः। एवं मयाभ्यां तत्पूर्वे विपुले भवतः। अत्रैतासु चतसृषु पादचतुष्केऽपि तत्तद्गणयोगस्य ये सत्वमाहुस्तेषां मते न यत्रैकस्मिन् द्वयोर्वा तत्तद्गणयोगस्तासां परस्परसंसर्गेणानेके भेदा ज्ञेयाः। इत्तिरत्नमते तु विषमपादयोरेतद्गणयोगः, अन्ययोस्तु सप्तमस्य लघुत्वमात्रम्। यत्र तु चतुर्ष्वपि पादेषु भादियोगः तस्यानुष्टुभमेव न तु वक्त्रत्वमिति विवेकः। तत्राप्ययुक्पादस्य जातिपरत्वे द्वयोरप्युजोर्भगणादियोगः, व्यक्तिपरत्वे त्वन्यतराङ्गीकारेणापि लक्षणार्थं तद्विरोधे तृतीये वा भगणादियोगः। जातिपक्षे भविपुलोदाहरणं, इयं सखे चन्द्रमुखी स्मितज्योत्स्ना च मानिनी। इन्दीवराक्षी हृदयं दहतीति तथापि मे॥ आद्ये भविपुलोदाहरणं, उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता। समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च॥ तृतीये, प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा। कृष्णोत्तरासङ्गरुचं विदधच्चौतपल्लवीम्॥ रेफविपुलायाः क्रमेणोदाहरणानि, सकारनानारकासकायसाददसायका। रसाहवा वाहसारनादवाददवादना॥ महाकविं कालिदासं वन्दे वाग्देवतागुरुम्। यज्ज्ञाने विश्वमाभाति दर्पणे प्रतिबिम्बवत्॥ कामिनीभिः सह प्रीतिः कस्मै नाम न रोचते। यदि न स्याद्दारिवीचिचञ्चलं हन्त जीवितम्॥ नविपुलोदाहरणानि क्रमेण, युयुत्सुनेव कवचं किमामुक्तमिदं त्वया। तपस्विनो हि वसते केवलाजिनवल्कले॥ अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम्। मौलैरानाययामासु र्भरतं स्तम्भिताश्रुभिः॥ तव मन्यकृतो मन्ये दूरात्संभ्रमितारिभिः। प्रत्यादिशन्त इव मे दृष्टलक्ष्यभिदः शराः॥ तत्र तविपुलोदाहरणानि, सा वैदुषेण प्रौढिर्यदि सर्वशास्त्रविशारदा। सानुगामिनी विस्मेरा यस्योक्तौ प्रखिन्नताः परे॥ लोकवत् प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः। लोकव्यवहारं प्रति

सदृशौ बालपण्डितौ॥ सविपुलोदाहरणानि, सखा गरीयान् शत्रुश्च कृत्रिमः तौ हि कार्यतः। स्यातामभित्रौ मित्रे च सहजप्राकृतावपि॥ यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम्। अभिचैद्यं प्रतिष्ठासुरासीत् कार्यद्वयाकुलः॥ षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः। ग्रन्थान-धीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम्॥ रविपुलोदाहरणानि, ततः कुमुदना-थेन कामिनीगण्डपाण्डुना। नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता॥ तथापि वन्मयत्यपि ते गुरुरितरस्ति गौरवम्। तत् प्रयोजककर्तृत्वमुपैति मम जल्पतः॥ एवं जविपुलाद्युदाहार्या। तत्र तु समपादयोश्चतुर्थादूर्ध्वं जगणेन पथ्यावक्त्रता समस्य लघुतामात्रत्वे जविपुलात्वमिति विवेकः। भविपुला तु कविप्रयोगाभावान्नास्ति। अन्येषां तु मते मुयुत्सुनैतत्रादीनां विषमयोश्चपलादित्वात् समयोस्तु पथ्यात्वाच्चपलापथ्यावक्त्रादि संज्ञा भवन्ति। एवं विपुलापथ्येत्यादिसंज्ञा ज्ञेयाः। अत्र इत्तिजन्मते सर्वासु भविपुलादिषु विषमपादयोः प्रत्येकं चतुर्विंशति भेदाः, समयोः प्रत्येकं सप्तवतिः। पर-स्परहतौ युग्मविपुलावत् सङ्ख्या ज्ञेया। अन्येषां मते तु सुखवक्त्रवत्संख्या। तथा संकीर्णत एषां संकीर्णविपुलावक्त्रं भवति। भारवेः, क्वचित् काले प्रसरता क्वचिदापतत्य निम्नता। शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां कुलम्॥ कुमारे, यदध्यक्षेण जगतां वयमारोपितास्त्वया। मनोरथस्याप्यपथं मनोविषय-मात्मनः॥ माघे, भवद्भिरामवसरप्रदानाय वचांसि नः। पूर्वरङ्गप्रसङ्गाय नाटकीयस्य वस्तुनः॥ इत्यादयो विपुलाभेदा अनन्ता एव कविप्रयोगेषु द्रष्टव्याः। सर्वेषु तु प्रायेण चतुर्थवर्णस्य गुरुतेति साम्प्रदायिकाः॥

इतिश्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां वक्त्रप्रकरणम्॥

अथ मात्रासमान्याह॥ द्विगुणितवसुलघुरचलधृतिरिति च॥ ३१॥ इति।

वर्णच्छन्दोऽप्येतद्, द्विगुणितवसुपदस्योत्तरानुवृत्तिसिद्ध्यर्थं प्रकीर्णकेऽप्यभ्य-धायि। तेन मात्रासमकादिषु षोडशमात्रत्वमभिहितं भवति। द्विगुणवसुलघुः

द्वावष्टौ लघवो यस्यां सा अचलधृतिरिति कथ्यते। चकाराद् गीत्यार्येति संज्ञा भवति इति पिङ्गलमतसंग्रहः। षोडश लघुपादेत्यर्थः।

मात्रासमकं नवमो ल् गान्तम् ॥ ३२ ॥ इति।

यत्र पादे नवमो लघुरेव गुरुश्चान्तनियतस्तन्मात्रासमकसंज्ञम्। नवमान्त्ययोर्लघुगुरुनियमाच्छेषे नियमाभावः सूचितः। सर्वथा षोड्शमात्रता कार्येति भावः। सर्वेषु मात्रासमेषु सममात्रा परमात्रया युक्ता न कार्येत्यपि सम्प्रदायः। ततश्च प्रथमे जगणाभावाच्चत्वारो गणविकल्पाः॥ यथा ऽऽ, ।।ऽ, ऽ।।, ।।।।, द्वितीये त्रयः ऽऽ, ऽ।।, ।।ऽ, मध्यगुरुसर्वलघू विश्लोकस्य इष्टत्वान्न भवतः। तृतीये एकः ।।ऽ, नवमो लिति वचनादादिगुरु र्भवति। मध्यगुरुसर्वलघू तु वासिकालक्षणस्य इष्टत्वान्न भवतः। चतुर्थे द्वौ ऽऽ, ।।ऽ, गन्तत्वाभिधानादन्ये गणा न भवन्ति। एतेषां विकल्पानामन्योन्यघाते प्रतिचरणं चतुर्विंशति र्भेदाः। चतुर्णां चतुर्विंशत्यङ्कानामन्योन्यहतौ वक्ष्यवदेव जाता सङ्ख्या लक्षत्रयम् एकत्रिंशत्सहस्रौ षट्सप्तत्यधिकसप्तशती चेति।

जो ल्नावथाम्बुधे विश्लोकः ॥ ३३ ॥ इति।

अथेत्ययमेतदर्थे अम्बुधेः कलाचतुष्टयादूर्ध्वं जगणोऽथवा लौ चतुर्लघु र्वा गणः स्याच्छेषं पूर्ववत् स विश्लोको नाम मात्रासमकम्। यद्यपि विश्लोकः पञ्चमाष्टमाविति सूत्रे पञ्चमाष्टममात्रयोर्लघुत्वमात्रमुक्तं तथापि पञ्चमाष्टमयो र्लघुता चतुर्थमात्रानन्तरं जगणचतुर्लघ्वोरेव भवति नान्यथेत्यभिप्रायेणैवमूचिवान्। जपक्षे इदमेवोदाहरणं लपक्षे तु 'सेव्यो-रघुपतिरामहितार्थम्'। अत्राद्यगणे विकल्पाश्चत्वारः यथा ऽऽ, ।।, ऽ।।, ।।।।, द्वितीये द्वौ ।ऽ।, ।।।।. तृतीयेऽपि द्वौ ऽऽ, ऽ।।. मध्यगुर्वन्तगुरुसर्वलघुरूपं भेदत्रयं तु मात्रासम चित्रापादकत्वान्न भवति। चतुर्थे गुर्वन्तगणद्वयं ऽऽ. एतेषां परस्परघाते द्वात्रिंशत् सन्ति पादभेदाः। एतेषां घाते जाता सङ्ख्या दश लक्षाः अष्टाचत्वारिंशत् सहस्राणि पञ्च शतानि षट्सप्ततिः। अङ्कतोऽपि १०४८५७६।

तद्युगलाद्वानवासिका स्यात् ॥ ३४ ॥ इति।

तद्युगलाद्द्व्यधियुगलादष्टमात्रानन्तरं यदि जो न्लौ वा स्यात् सा वानवासिकेति। जोन्लाववश्येति पदत्रयमनुषज्य योज्यम्। अत्रापि 'द्वादश्च वानवासिका' इति सूत्रे द्वादश चकारलब्धनवमयो लघुतोक्ता सा चैवमेव नान्यथेतेत्यवसुक्तम्। जपद्य इदमुदाहरणम्। लपद्ये यथा। 'लोकहितार्थं हरिहरमूर्तौ' अत्रादेप्र गणे विकल्पाश्चत्वारः ऽऽ, ॥ऽ, ऽ॥, ॥॥. ॥ द्वितीये त्रयः ऽऽ, ऽ॥, ॥ऽ. तृतीये द्वौ ।ऽ।, ॥॥. चतुर्थेऽपि द्वौ ऽऽ, ॥ऽ. एतेषामन्योन्यताड़ने भेदाः प्रतिपादम् अष्टाचत्वारिंशत्। अन्योन्यहतौ जाता सङ्ख्या त्रिपञ्चाशल्लक्षाः अष्टौ सहस्राणि चत्वारि शतानि षोड़श च। अङ्कतोऽपि ५३०८४१६।

वाणाष्टनवसु यदि लश्चित्रा ॥ ३५ । इति ॥

वाणाः पञ्च पञ्चमाष्टनवसु यदि लघुः स्यात् शेषं पूर्ववत् तदा चित्रा नाम। असत्रामाद्ये गणे चत्वारो विकल्पाः पूर्ववत्। द्वितीयेऽपि द्वौ ।ऽ।, ॥॥. तृतीये त्रयः ॥ऽ, ।ऽ।, ॥॥. चतुर्थे द्वौ ऽऽ, ॥ऽ. अन्योन्यघाते प्रतिपादं भेदसंख्या अष्टाचत्वारिंशत्। अन्योन्यगुणने पूर्ववं संख्या ॥

उपचित्रा नवमे परयुक्ते ॥ ३६ ॥ इति।

नवमे मात्रास्वरूपे दशमेन परेण युक्ते सति मिलिते सति उपचित्रा नाम शेषं प्राग्वत्। जयदेवस्त्वेकादशद्वादशादिमात्रास्वपि नियममाह 'अष्टभ्यो गो ल्यावुपचित्रे ति' अष्टकलानन्तरं गुरुलघुयगणा इत्यर्थः। अत्र तृतीयगणे द्वौ विकल्पौ ऽऽ, ऽ॥. अन्ये गणविकल्पा मात्रासमकवत्। अन्योन्यघाते प्रतिपादं भेदा अष्टाचत्वारिंशत् अन्योन्यघाते संख्या प्राग्वत्।

यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम्।
अनियतवृत्तपरिमाणयुक्तं प्रथितं जगत्सु पादाकुलकम्॥ ३७ ॥इति।

अतीतानि पूर्वोक्तानि कृतानि विविधानि नानाप्रकाराणि यानि लक्ष्माणि लक्षणानि तद्युक्तैः मात्रासमादीनां पञ्चानां पादैः कलितं रचितं तथाऽनियतवृत्तपादचतुष्केऽपि नियतैकवृत्तलक्षणहीनं परिमाणे च

षोडशमात्रपादत्वेन युक्तं ततः कर्मधारयः एतादृशं यद्वृत्तं तत् पादाकुलकमिति अन्वर्थसंज्ञा चेयेति तच्छब्दाध्याहारेण योज्यम्। अथ प्रथम पादे मात्रासमकविश्लोकचित्राणां लक्षणयोगः, विश्लोकोपचित्रयो द्वितीये, मात्रासमवासिकयोस्तृतीये, उपचित्राविश्लोकयोश्चतुष्कयोर्द्वि चतुर्थे इति। इदं च प्रतिपादमनेकलक्षणयोगं मत्वोदाहरणं मन्तव्यम्। अन्ये तु प्रतिपादमेकलक्षणयोगं वदन्तः समुदितेषु विविधलक्षणयोगाभिप्रायेणेदं व्याचक्षते। वयं तूभयथा व्याख्याने दोषाभावं वदामः॥ अतएव मात्रासमकादिप्रज्ञत्या एभिः पादाकुलकमिति सूत्रकारः सामान्यत एवाह। तथा मात्रासमकविश्लोकवानवासिकोपचित्राणामसंकीर्णं यावदुदाहरणं चाह इतितत् यथा, ‘अलिवाचालितविकसितचूते काले मदनसमागमदूते। स्मृत्वा कान्तापरिहृतसार्थः पादाकुलकं धावति पान्थः’ इति। संकीर्णोदाहरणं तु मूल एव। तेनोभयथापि न दोषः। अत्र पञ्चानां मात्रासमकादीनां परस्परसंकरे अनन्ता एव भेदाः॥ तत्र यथा द्वयो र्द्वयोः सङ्करे चत्वारिंशदधिकं शतं भेदा भवन्ति। तद्यथा

१	२	३	४
२	३	४	५

अत्रैककोष्ठस्थाङ्कद्वयसंज्ञाङ्कः वृत्तद्वयस्य सङ्करे वक्ष्यमाणोपजातिप्रस्तारमार्गेण चतुर्दश चतुर्दश प्रतिकोष्ठं भेदा भवन्ति। एवं च प्रथमद्वितीययोः प्रथमतृतीययोः प्रथमचतुर्थयोः प्रथमपञ्चमयोः संकरे चत्वारश्चतुर्दशका मिलिताः षट्पञ्चाशद्भवन्ति ५६॥ तथा द्वितीयतृतीयद्वितीयचतुर्थद्वितीयपञ्चमानां संकरे द्विचत्वारिंशत् ४२॥ तथा तृतीयचतुर्थतृतीयपञ्चमानां सङ्करे अष्टाविंशतिः २८। तथा चतुर्थपञ्चमयोः संकरे चतुर्दशेति। सर्वेषां मेलने शतमेकं चत्वारिंशच्च १४०॥ एवं त्रयाणां चतुर्णां संकरेऽपूह्याः॥ एतेषामुदाहरणानि ऊह्यानि। विस्तरभयान्न नोच्यन्ते। अत्राचलधृत्यादीनां सर्वेषां षोडशमात्रपदत्वेन समत्वान्मात्रासमकसंज्ञा। अथोक्तानां वक्ष्यमाणानां च वृत्तानां गुरुलघुमात्रावर्णं यथापरिज्ञानोपायमाह।

वृत्तस्य ला विना वर्णै र्गा वर्णा गुरुभिस्तथा।
गुरवो ले र्दले नितंत्र प्रमाणमिति निश्चितम्॥ ३८॥ इति।

वृत्तस्य ला मात्रा वर्णैं विंना गा गुरवो ज्ञेया इत्यध्याहारः। ला वर्णा गा इत्यादिभिः शब्दैः सङ्ख्या लक्ष्यते। ततश्चायमर्थः यदि वृत्तस्य मात्रावर्णयोः सङ्ख्या विज्ञाता गुरुलघुसङ्ख्या चाज्ञाता तदा मात्रासङ्ख्या-मपनीयावशिष्टा गुरुसङ्ख्या ज्ञेयेति, वर्णसङ्ख्यामध्ये च ज्ञाता गुरुसङ्ख्या-मपनीयावशिष्टा लघुसङ्ख्या ज्ञेयेत्याशयः। यदि तु मात्राणां गुरूणां च ज्ञातसङ्ख्यत्वं वर्णाश्चाज्ञातसङ्ख्यास्तदा तज्ज्ञानोपायमाह वर्णा इति। तथा वृत्तमात्रागुरुभिर्विना वर्णा ज्ञेयाः वृत्तमात्रासङ्ख्यायां गुरुसंख्या मपनीया-वशिष्टा वर्णसंख्येत्यर्थः। वृत्तमात्रालघुसङ्ख्याया गुरुलघुसंज्ञाने सति गुरु-ज्ञाने प्रकारान्तरमाह गुरव इति। वृत्तस्य ला इत्यनुषङ्गः। वृत्तस्य मात्रा लै लघुभि र्विना दले ऽर्धे कृते गुरवः ज्ञेयाः। वृत्तमात्रा-सङ्ख्यायां लघुसङ्ख्यामपनीयावशिष्टां सङ्ख्याम् अर्धीकृत्य तावत्प्रमाणा गुरुसंख्येत्यर्थः। उक्तां गुर्वादिसङ्ख्यामुपहरति नित्यमिति। इत्यमुना प्रकारेण प्रमाणं गुर्वादीनां नित्यं सर्वदा निश्चितं भवतीतिशेषः। वृत्तस्येत्युपलक्षणं गद्यादावपि सम्भवात्। अत्र च गुरुवर्णसङ्ख्याज्ञानोपाय-प्रदर्शनमुपलक्षणार्थम्। तथा हि मात्रावर्णगुरुलघुचतुष्टयात्मके वृत्ते द्वयोर्द्वयो-रियत्तापरिच्छेदेऽन्ययोः सङ्ख्यापरिच्छित्तिः, तद्यथा मात्रावर्णयोरियत्ता-परिच्छेदेऽन्ययोः सङ्ख्यापरिच्छित्तिः। तद्यथा, मात्रावर्णयो र्मात्रालघ्वो र्वर्णगुर्वो-र्वर्णलघ्वो र्मात्रागुर्वो र्गुरुलघ्वोश्च षट्सु द्विकेषु एकैकद्विकज्ञाते परे द्विक-मुक्तया दिशा ज्ञेयमिति। इदं सर्वमुदाहरणे योज्यते। 'वागर्थाविव संपृक्तौ' इत्यत्र चतुर्दशमात्रासु अष्टरूपां वर्णसङ्ख्यामपनीयावशिष्टाः षड् गुरवः वर्णसङ्ख्या, पूरकौ च द्वौ लघू। एवं षड्रूपां गुरुसङ्ख्यामपनीयावशिष्टा वर्णा अष्टौ, गुरूणां षट्त्वादवशिष्टौ द्वौ लघू। एवं लघुद्वयमपनीयावशिष्टद्वादश-सङ्ख्यायामर्धितायां षट् सङ्ख्या गुरवः, गुरुभि र्द्वादशमात्रासिद्धेश्चतुर्दश-मात्रासिद्ध्यर्थं द्वौ लघू इति। एवं वर्णगुरुज्ञाने वर्णलघुज्ञाने गुरुलघुज्ञाने चेतरद्वयज्ञानं योज्यं। एवं सर्वेषु गद्यपद्येषु।

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां मात्रासमप्रकरणम्॥

मात्रानियमघटितत्वान्मात्रावृत्तप्रसङ्गेन द्विखण्डकान्याह।

शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलम्।
सगुरु शकलयुगलकमपि सुपरिघटितललितपदविततिं भवति शिखा ॥३९॥
इति।

गार्हपत्याहवनीयदक्षिणाग्नयस्त्रयोऽग्नयः। तैस्त्रिधाख्या तत्संख्या लक्ष्यते। तेन शिखिभिर्गुणितास्त्रिगुणीकृता ये दश लघवस्तै रचितमेव शकलमित्यध्याहारः, अपरमित्यभिधानात्। तत्रापगतं न्यूनं लघुद्वयं यस्मात् तादृक् कार्यं। अपरं द्वितीयं शकलमित्यर्थः इदं पूर्वोक्तमखिलं समग्रं लघुना न्यूनं त्रिंशल्लघुकं भवति। शकलयुगलकमर्धद्वयमपि सगुरु अन्तेऽधिकैकगुरुयुक्तं सुष्ठु परिघटिता रचिता ललिता पदविततिः पदरचना यत्र तादृशं भवति शकलं युगलं यस्यां सा शिखेति यच्छन्दोऽध्याहारेणार्थः। अयं भावः पूर्वार्धे अष्टाविंशतिर्लघवः एको गुरुरिति एकोनत्रिंशदक्षराणि, उत्तरार्धे त्रिंशल्लघवः एको गुरुरिति एकत्रिंशदक्षराणि यत्र सा शिखेति। सुपरिघटितेति पदेन श्रुतिसुखकर्त्री यतिः कार्येति सूचयति।

विनिमयविनिहितशकलयुगलकलितपदविततिविरचितगुणनिचया।
श्रुतिसुखकृदियमपि जगति जि जशिर उपगतवति सति भवति खजा ॥
४० ॥ इति।

इयमेव शिखा यदि विनिमयेन व्यत्यासेन विहितं निवेशितं यच्छकलयुगलं तेन कलिता घटिता पदसमुदायकृतसौकुमार्यादिगुणसमुदायवती च कलितान्तस्य पदादिना कर्मधारयः श्रुतिसुखकारिणी चेति पूर्ववद्यतिः कार्येति सूचितम्। जि जकारे जशिर इति जकारप्रागुदाहरणं प्राप्ते सति खजा भवन्ति खञ्जेति यावत्। गुरुद्वयमत्र छन्दसि प्रवेशयितुमशक्यत्वादुक्तिप्रकारोऽयम्। विनिमयविनिहितशकलयुगलकलितपदविततिरचितगुणनिचयेति युगलान्तमत्र लघ्वित्यादिना कर्मधारयः। यद्यपि सूत्रकारेणार्धे इत्यधिकृत्य 'शिखैकोनत्रिंशदेकत्रिंशदन्ते ग्' इति 'खञ्जा मइत्यनुजोति' च वदता पूर्वोक्तनियमवदेकोनत्रिंशदक्षरैकत्रिंशदक्षररचितकम-

लघुक्रमवत् पादद्वयघटितायं द्वयवतत्रो विंशतत्रधिकशतावरैः शिखाखञ्जे उक्ते अत्र पञ्चस्वरे एवेति विरोधस्तथापि ग्रन्थान्तरपर्यालोचनया एवमुक्तिः। यद्वा सूत्रकारोक्तिशिखाखञ्जाभ्यामेते अन्ये एव सूत्रानुक्ते एव प्रोक्ते। सूत्रोक्ते तु चतुर्थाध्यायेऽर्धसमत्वात् स्वयमूह्येत्र। अथवोभयत्रापि शकलशब्दौ अवयववचनत्वात् पादरूपावयवपरौ कृत्वा मूलोदाहरणे च अर्धविषये मत्वार्धसमत्वेऽपि च मात्रानियमात्मकत्वान्मात्रावृत्तप्रकारेणोक्तिं समाधाय सूत्रानुसारः कार्य इति सर्वमूह्यम्।

अष्टावर्धे गा इत्यभ्यस्ता यस्याः सानङ्गक्रीडोक्ता।

दलमपरमपि वसुगुणितसलिलनिधिलघु कविरचितपदविततिर्भवति॥ ४१॥ इति।

यस्य अर्धेऽष्टौ गा गुरवो इत्यभ्यस्ता द्विगुणाः षोडशेत्यर्थः। अपीति चार्थः। अपरञ्च दलं द्वितीयमपि वसवोऽष्टौ तैर्गुणिताः सलिलनिधिलघवश्चत्वारो लघवो द्वात्रिंशद्यत्र तत्तादृक् कविना रचिता पदानां विततिर्विस्तरो यत्र तदा भवति सा अनङ्गक्रीडेति संज्ञयोक्ता वृत्तज्ञैः। पूर्वार्धे षोडश गुरवः उत्तरार्धे द्वात्रिंशल्लघवः कार्या इति तात्पर्यार्थः। कवीत्यादिना श्रुतिसुखा यतिर्भवतीत्यसूसुचत्। पैङ्गले त्वियं सौमेत्यभिसंज्ञितम्। इयमेव व्यत्यस्तार्धतायां ज्योतिराख्या भवति। उदाहरणं तु, ‘यदि सुखमनुपममपरमभिलषसि परिहर युवतिषु रतिमतिशयमिह। आत्मज्योतिर्योगाभ्यासात् दृष्ट्वा दुःखच्छेदं कुर्याः॥’ अनयोर्द्वयोः शिखेति सामान्यसंज्ञा पैङ्गल उक्ता।

त्रिगुणनवलघुरवसितिगुरुरिति दलयुगलकृततनु रतिरुचिरा॥४२॥ इति।

त्रिगुणा नव लघवो यत्र सप्तविंशतिरित्यर्थः अवसितावसाने गुरुर्यस्याः सा तथा इत्यमुना प्रकारेणार्धद्वयरचितशरीरा रतिरुचिरा संज्ञा। पैङ्गले त्वियं चूलिकेत्युक्ता। अर्धसमत्वेऽपि अस्य मात्रामात्रघटितत्वादत्रोक्तिः। “चूलिकैकोनत्रिंशदन्ते ग्” इति सूत्रपाठपक्षेऽवमुक्तम्। “चूलि-

कार्धमेवोनविंशद्देकविंशदन्ते ग्" इति पाठे तु प्रथमं द्वितीयं चार्धं क्रमेणैकोनविंशद्देकविंशन्मात्रं भवति, अन्ते च मात्राद्वयस्थाने गुरुरेकः स्यात् सा चूलिकेति सूत्रार्थः। अस्मिन् पक्षे मूलानुक्तमुदाहरणं ममैव, रघुकुलकमलिनविकसनमयमवति दशमुखरिपुकुलतिमिरहरे। विषधर-विभ्रमविषयविषहरमहसि कुरु रतिमिह दशरथतनये॥ अत्र सूत्रेऽर्धग्रहणात् पादनियमो नास्ति। इह चावसितिगुरुरिति पदेन गुरावेवावसानं नान्यत्रेति सूचितम्।

इति श्रीमद्भट्टरामेश्वरसूनुनारायणभट्टविरचितायां वृत्तरत्नाकरव्याख्यायां मात्रावृत्ताधिकारो नाम द्वितीयोऽध्यायः॥

एवं मात्रावृत्तान्यभिधायाधुना वर्णवृत्तेषु सुवृत्तानि कीर्तय इति उक्ता इति। अधिक्रियत इति शेषः, समस्यन्तपाठे तु भेदा अभिधीयन्त इति। एवमत्युक्तादिष्वपि व्याखेयम्।

गः श्रीः॥ १॥ इति।

एकाक्षरपादायामुक्तायां गुरुरेकश्चेत् पादः श्रीर्नाम। लक्ष्यलक्षणयोरेकाक्षरेण चाद्विनासंग्रहादर्धोदाहरणमेतत्। नोक्ता उक्तादिभेदा ये ग्रन्थगौरवभीतितः। तांस्तथा प्रस्तचिह्नेन वदामोऽन्यत्रदर्शनात्॥ यथा, अस्मिन् पिटकते नवेत्र कावेत्र रामकुटहले। उक्ता उक्तादयो व्यस्ता विवेक्तव्याः सुयुक्तिभिः॥ अत्र वक्ष्यमाणसंख्याख्यानप्रकारेण वृत्तभेदः २। न च सुप्रतिष्ठान्तानां पञ्चानां जातीनां सूत्रानुक्तत्वान्निर्मूलतेति वाच्यम्। "द्विको ग्लौ" इति प्रस्तारकथने, 'परे पूर्णमिति' रूपप्रस्तारकथने च सूत्रकारेणापि दर्शितत्वात्। बहुतरप्रचाराभावात्तु गाथाभेदवल्लक्षणानुक्तेति निरूपयति।

अथात्युक्ता॥ गौ स्त्री॥ २॥ इति।

द्वौ गुरू यदि पादे तस्तदा स्त्री नाम। अत्र वृत्तसंख्या ४।

अथ मध्या, ३॥ मो नारी॥ ३॥ इति।

मो मगणश्चेत् पादस्तदा नारी नाम।

रो मृगी ॥ ४ ॥ इति।

रगणश्चेत् पादस्तदा मृगी ॥ अत्र संख्या ८।

अथ प्रतिष्ठा ४ ॥ म्गौ चेत् कन्या ॥ ५ ॥ इति।

म्गौ मगणगुरू चेत् पादश्चतुर्गुरुरित्यर्थस्तदा कन्या ॥ अत्र संख्या १६।

अथ सुप्रतिष्ठा ५ ॥ भ्गौ गिति पंक्तिः ॥ ६ ॥ इति।

भगणगुरू पुनर्गुरुश्चेत्तदा पंक्तिः ॥ संख्या ३२।

अथ गायत्री ६ ॥ त्यौ तनुमध्या ॥ ७ ॥ इति।

त्यौ तगणयगणौ यदि स्तो भवतस्तनुमध्येति। यदि तदेतत्रध्याहार्यम्।

शशिवदना न्यौ ॥ ८ ॥ इति।

नगणयगणौ यदि पादस्तदा शशिवदना नाम।

विद्युल्लेखा मो मः ॥ ९ ॥ इति।

मगणौ चेत् पादस्तदा विद्युल्लेखा नाम।

त्सौ चेद् वसुमती ॥ १० ॥ इति।

तगणसगणौ चेत् पादस्तदा वसुमती। गायत्रन्तेषु सर्वेषु पादेषु पादान्त एव यतिरित्याम्नायः ॥ तत्र संख्या ६४।

अथोष्णिक् ७ ॥ म्सौ गः स्यात् मदलेखा ॥ ११ ॥ इति।

मगणसगणगुरुभि मदलेखा नाम।

तथा, सरगै हंसमाला ॥

* मधुमति ननगाः ॥ * "ननगि मधुमती," A.

कुमारललिता ज्सौ ग् ॥

चूडामणिस्तभगात् ॥

अत्र द्वाभ्यां पञ्चभिश्च यतिमाहुः केचित्। अन्ये तु पादान्त एव। अत्र संख्या १२८ ॥

अथानुष्टुप् ८ ॥ भौ गिति चित्रपदा गः ॥ १२ ॥ इति।

भगणौ गुरू च यत्र पादे इतेऽयं सा चित्रपदा। पादे यतिः।

मो मो गो गो विद्युन्माला ॥ १३ ॥ इति।

मगणौ द्वौ च गुरू विद्युन्मालेति । चतुर्भिश्चतुर्भिश्च यतिरिति सम्प्रदायः ।

माणवकं भात्तलगाः ॥ १४ ॥ इति ।

भात्भगणात् तगणलघुगुरवो यदि तदा माणवकम् । माणवकक्रीडितकमिति पैङ्गले संज्ञा । पूर्ववद्यतिः ॥

म्नौ गौ हंसरुतमेतत् ॥ १५ ॥ इति ।

मगणनगणौ गुरू च द्वावेतत् हंसरुतं नाम ।

र्जौ समानिका गलौ च ॥ १६ ॥ इति ।

रेफजकारौ गुरुलघू च समानिका नाम ।

प्रमाणिका जरौ लगौ ॥ १७ ॥ इति ।

जगणरेफौ लघुगुरू च प्रमाणिका । समान्येव समानिका प्रमाणेव प्रमाणिका स्वार्थे कश्छन्दोऽनुरोधात् ॥

वितानमाभ्यां यदन्यत् ॥ १८ ॥ इति ।

आभ्यां समानीप्रमाणीभ्यामन्यद् यदनुष्टुब्जातीयं छन्दो वितानसंज्ञम् । आभ्यामन्यदिति उक्तं लक्ष्यलक्षणम् । केचित्तु समानिकायां गुरुलघुक्रमेण समाप्तिः, प्रमाणिकायां लघुगुरुक्रमेण, विताने तु द्वौ गुरू द्वौ लघू, द्वौ लघू द्वौ गुरू वा, द्वौ गुरू एको लघुः पुनरेको गुरुरिति वा, द्वौ लघू एको गुरुरेको लघुरिति वा, इत्थं वा नियम इत्याहुः ॥ तत्र द्वौ गुरू द्वौ लघू इत्यत्रोदाहरणम्, तृष्णां त्यज धर्मं भज पापे हृदयं मा कुरु । इष्टा यदि लक्ष्मीस्तव शिष्टाननिशं संश्रय ॥ द्वौ लघू द्वौ गुरू इत्यत्रोदाहरणं, हृदयं यस्य विशालं गगनाभोगसमानम् । लभतेऽसौ मणिचित्रं नृपतिर्मूर्ध्नि वितानम् ॥ एवमन्यत्राप्युदाहार्यम् । वयं तु गृह्णीम एतत् एतेषां वितानतेति न तु नियमम् । अतएवोक्तनियमातिक्रमेणैवोदाहरणं मूले । सूत्रमपि "वितानमन्यत्" इति सामान्यत एव, न तु नियमं कश्चिदाह । वृत्तिकृदपि " सूत्रकारो वितानस्यानेकप्रकारतां दर्शयति" इति वदन्ननेकमात्रतामाह, न तु नियममिति ।

तथा ॥ नाराचिका तरौ लगौ ॥ अत्र सङ्ख्या २५६ ॥

अथ वृहती ॥ राज्जसाविह हलमुखी ॥ १९ ॥ इति ।

रगणानन्तरं नगणसगणौ चेदिह छन्दःशास्त्रे हलमुखी नाम । त्रिभिः षड्भिश्च यतिरिति सम्प्रदायः ।

भुजगशिशुभृता नौ मः ॥ २० ॥ इति ।

द्वाभ्यां नगणाभ्यामेकेन च मगणेन भुजगशिशुभृता । सप्तभि र्द्वाभ्यां च यतिः ॥

तथा, भद्रिकेति रनरै रियम् ॥ वृत्तसंख्या ५१२ ॥

अथ पंक्तिः १० ॥ म्सौ ज्गौ शुद्धविराड़िदं मतम् ॥ २१ ॥ इति ।

मगणसगणौ जगणगुरू च तत् शुद्धविराण्मतं छन्दोविदाम् । पादान्ते यतिः ।

* म्नौ ज्गौ चेति पणवनामकम् ॥ २२ ॥ इति । * "म्नौ य्गौ पणवनामेदम् ।" A.

मगणनगणौ जगणगुरू चेति पणवनामकम् । पञ्चभिः पञ्चभिश्च यतिः ॥

र्जौ रगौ मयूरसारिणी स्यात् ॥ २३ ॥ इति ।

रगणजगणरगणगुरुभि र्मयूरसारिणी । पादान्ते यतिः ॥

भ्मौ सगयुक्तौ रुक्मवतीयम् ॥ २४ ॥ इति ।

भगणमगणौ सगणगुरुणा च रुक्मवती । * पञ्चकमालेत्यनेन । पादान्ते यतिः ॥ * "चम्पकमाला" C.m.

मत्ता ज्ञेया मभसगयुक्ता ॥ २५ ॥ इति ।

मभसगणगुरुयुता मत्ता । चतुर्भिः षड्भिश्च यतिः ॥

नरजगै र्भवेन्मनोरमा ॥ २६ ॥ इति ।

नरजगणगुरुभि र्मनोरमा । पादे यतिः ॥

त्जौ जो गुरुणेयमुपस्थिता ॥ २७ ॥ इति ।

तजजगणगुरुभिः उपस्थिता नाम । पादे यतिः ॥ द्वाभ्यामष्टभिश्चेतेन्के । अत्र संख्या १०२४ ॥

अथ त्रिष्टुप् ११ ॥ स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥ २८ ॥ इति ।

ततजगणाः गुरुभ्यां चेन्द्रवज्रा नाम । पादे यतिः ॥

उपेन्द्रवज्रा जतजास्ततो गौ ॥ २९ ॥ इति ।

जतजगणाः गुरू चोपेन्द्रवज्रा नाम। पूर्वोक्तैव यतिः॥

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः॥ ३० ॥

इति।

अव्यवहितोक्तेन्द्रवज्रोपेन्द्रवज्रालक्षणवन्तौ पादौ यत्सम्बन्धिनौ ता उपजातयो नाम। अत्र पूर्वोक्तलक्षणपादद्वयेन यथायोगमेकद्विवारवृत्त्या निष्पत्ति विवक्षिता, न तु द्वाभ्यामेवं वृत्तपूर्तिः पादद्वयमात्रघटितस्य वृत्तस्याभावात्। द्विवचनं लक्षणद्वययोगेन लक्षणया नेयम्। ताश्चतुरक्षरप्रस्तारवत् प्रस्तारे सति आद्यन्तभेदयोः केवलेन्द्रवज्रोपेन्द्रवज्रात्वात् त्यागे चतुर्दश भवन्ति यथा,—इउउउ, उइउउ, इइउउ, इउइउ, उउइउ, उइइउ, इइइउ, उउउइ, इउउइ, उइउइ, इइउइ, उउइइ, इउइइ, उइइइ इति। तथा च वृद्धाः "एकत्र पादे चरणद्वये वा पादत्रये वान्यतरस्थितिश्चेत्। तयोरिहान्यत्र तदोहनीयाश्चतुर्दशोक्ता उपजातिभेदाः" इति। अत्राद्यभेदोदाहरणं "दैत्याधिपप्राणमुषां नखानामुपेयुषा भूषणतां क्षतेन। प्रकाशकार्कश्यगुणौ दधानाः स्तनौ तरुण्यः परिवव्रुरेनम्" ॥ मूलश्लोकस्तु षष्ठभेदोदाहरणम्। एवमन्यभेदेष्वप्युदाहरणानि काव्येषु च विवेचनीयानि।

इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम॥ ३१ ॥

इति।

अन्यास्वपि जगत्यादिजातिषु इत्थं सामान्यसङ्ख्याक्षरत्वसमानयतिकत्वादिप्रकारेण मिश्रितासु इदमेवोपजातिनाम वृद्धाः स्मरन्ति ग्रन्थान्तरेभ्यो ज्ञात्वा वदन्तीत्यर्थः। इत्थमित्यनेन विषमवर्णसङ्ख्याकानां विषमयतिकानां च जातीनां वत्रादीनां च मिश्रणे उपजाति नाम नास्तीति सूचितम्। स्मरन्तीत्यनेन च कविप्रयोगे दर्शनानुरोधः सूचितः। तत्रेन्द्रवंशावंशस्थाभ्यामुदाहरणम्। 'इत्थं रथाश्वेभनिषादिनां प्रगे गणो नृपाणामथ तोरणाद्बहिः। प्रस्थानकालक्षमवेषकल्पनाकृतक्षणक्षेपमुदैक्षताच्युतम्'॥ एवमन्यत्र प्रयोगवशादुदाहरणं ज्ञेयम्। सर्वासामुपजातीनामुक्तया दिशा चतु-

दंयभेदा भवन्ति। विषमार्धसमरूपत्वेऽपुत्रपजातीनां समवृत्तेषूपन्यासः सम-वृत्तघटिततया प्रासङ्गिकः॥

नजजलगैर्गदिता सुमुखी॥ ३२॥ इति।

नजजैर्गंधि लघुगुरुभ्यां च सुमुखी नाम। पञ्चभिः षड्भिश्च यतिः॥

दोधकवृत्तमिदं भभभाद्गौ॥ ३३॥ इति।

भगणत्रयाद् गुरुद्वयं चेद् दोधकं नाम। भभभादिति समाहारद्वन्द्वैकवद्भावः दोधकनामनि भत्रयतो गाविति वा पाठः। पादान्ते यतिः॥

शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः॥ ३४॥ इति।

मततैर्गुरुभ्यां च शालिनी। अब्धिभिश्चतुर्भिर्लोकैः सप्तभिश्च यतिरिति शेषः। एवमुत्तरत्रापि॥

वातोर्मीयं कथिताम्भौ तगौ गः॥ ३५॥ इति।

मभतगुरुभि र्वातोर्मी। इयमिति शालिन्युक्तयतिमतीत्यर्थः।

वाचरसैः स्राद् भतनगगैः श्रीः॥ ३६॥ इति।

भतनगगुरुभिः पञ्चभिः षड्भिश्च यतौ श्री र्नाम॥

म्भौ न्लौ गः स्याद् भ्रमरविलसितम्॥ ३७॥ इति।

मभनलघुगुरुभि र्भ्रमरविलसितमिति। चतुर्भिः सप्तभिश्च यतिः॥

रान्नराविह रथोद्धता लगौ॥ ३८॥ इति।

रनरलगैरिह च्छन्दःशास्त्रे रथोद्धता। पादे यति॥

स्वागतेति रनभाद्गुरुयुग्मम्॥ ३९॥ इति।

रनभगणेभ्यः परं गुरुयुग्मं यदि तदा इतेत्रवं स्वागता। नरभादितेत्रकव-द्भावः पूर्ववद् यतिः॥

ननसगगुरुरचिता वृत्ता॥ ४०॥ इति।

ननसगगुरु र्वृत्ता नाम चतुर्भिः सप्तभिश्चयतिः॥

ननरलगुरुभिश्च भद्रिका॥ ४१॥ इति।

ननरलगै र्भद्रिका। पादे यतिः॥

श्येनिका रजौ रलौ गुरु र्यदा॥ ४२॥ इति।

स्पष्टम्। पादे यतिः॥

मौक्तिकमाला यदि भतनाङ्गौ॥ ४३॥ इति।

भतनादितित्रकवङ्गावः। पञ्चसु षट्सु च यतिः॥

उपस्थितमिदं ज्सौ ताङ्गकारौ॥ ४४॥ इति।

जसतगगैरुपस्थितम्। पादे यतिः॥

तथा, उपचित्रमिदं सससा लगौ॥

कुपुरुषजनिता ननौ गौं गः॥

अनवसिता न्यौं भ्गौ गु षड़न्ते॥ अत्र वृत्तानि २०४८॥

अथ जगती १२॥ चन्द्रवर्त्म निगदन्ति रनभसैः॥ ४५॥

रनभसै र्गणैश्चन्द्रवर्त्म। चतुर्भिरष्टभिश्च यतिः॥

जतौ तु वंशस्थमुदीरितं जरौ॥ ४६॥ इति।

जतजरै र्वंशस्थम्। पादे यतिः॥

स्यादिन्द्रवंशा ततजै रसंयुतैः॥ ४७॥ इति।

ततजैरसंयुतैः रगणसहितैः इन्द्रवंशा। पादे यतिः।

इह तोटकमम्बुधिसैः प्रथितम्॥ ४८॥ इति।

अम्बुधिसैश्चतुर्भिः सगणैः। पादे यतिः॥

द्रुतविलम्बितमाह नभौ भरौ॥ ४९॥ इति।

नभभरै द्रुतविलम्बितमाहाचार्यः। पूर्ववत् पादे यतिः।

मुनिशरविरति नौं म्यौ पुटोऽयम्॥ ५०॥ इति।

मुनिभिः सप्तभिः शरैः पञ्चभिश्च विरति र्यत्र॥

प्रमुदितवदना भवेन्नौ च रौ॥ ५१॥ इति। स्पष्टम्।

नयसहितौ न्यौ कुसुमविचित्रा॥ ५२॥ इति।

स्पष्टम्। द्वयोरपि पादे यतिः।

रसै र्जसजसा जलोद्धतगतिः॥ ५३॥ इति।

रसाश्च रसाश्चेतित्रकशेषे षड्भिः षड्भिश्च यतिः॥

चतुर्जगणं वद मौक्तिकदाम॥ ५४॥

भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥ ५५ ॥

रैश्चतुर्भिर्युता स्रग्विणी सम्मता ॥ ५६ ॥ [पादे यतिः।

भुवि भवेन्नभजरैः प्रियंवदा ॥ ५७ ॥ इति। त्रीणि स्पष्टानि।

त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ॥ ५८ ॥ इति।

तयतये मणिमाला, गुहस्य स्कन्दस्य वक्त्रैः षड्भिः षड्भिश्च छिन्ना यतिम-

धीरैरभाणि ललिता तभौ जरौ ॥ ५९ ॥ इति। [तीत्यर्थः।

प्रमिताक्षरा सजससैरुदिता ॥ ६० ॥ इति। एते स्पष्टे। पादे यतिः।

ननभरसहिता महितोज्ज्वला ॥ ६१ ॥ इति।

महिता पूजिता श्रेष्ठेत्यर्थः उज्ज्वलेति नाम। पादे यतिः।

पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ॥ ६२ ॥ इति।

पञ्चभिः अश्वैः सप्तभिश्छिन्ना यतिमती वैश्वदेवी नाम।

अब्ध्यष्टाभिर्जलधरमाला म्भौ स्मौ ॥ ६३ ॥ इति।

अब्धिभिः चतुर्भिः अष्टाभिश्च पादयतिः। मगणभगणौ सगणमगणौ च भवतः तत् जलधरमाला नाम। चतुर्भिरष्टभिश्छिन्ना इति अनुषङ्गः। पैङ्गले त्वियमेव कान्तोत्पीडा।

इह नवमालिका नजभयैः स्यात् ॥ ६४ ॥ इति।

इह छन्दःशास्त्रे अष्टाभिश्चतुर्भिश्च यतिरित्याहुः वृद्धाः ॥

स्वरशरविरतिर्ननौ रौ प्रभा ॥ ६५ ॥ इति।

स्वरैः षडादिभिः सप्तभिः शरैः पञ्चभिश्च यति र्यत्र।

भवति नजावथ मालती जरौ ॥ ६६ ॥ इति।

पञ्चभिः सप्तभिश्च यतिः।

जरौ जरौ वदन्ति पञ्च चामरम् ॥ ६७ ॥

अभिनवतामरसं नजजाद्यः ॥ ६८ ॥ इति।

स्पष्टम्। इदमेवान्ये ललितपदमाहुः। पादे यतिः।

तथा, नसुगरयुगलं च गौरी मता ॥

पञ्चमुनी भ्मौ सात् सयुता ललना ॥

ललितमभिहितं नौ म्रौ नामतः ।

द्रुतपदं भवति नभनयाश्चेत् ॥ अत्र वृत्त संख्या ४०९६ ।

अथातिजगती १३ ।

तुरगरसयति नौं ततौ गः क्षमा ॥ ६९ ॥ इति ।

ननततगुरुभिः क्षमा, सप्तभिः षड्भिश्च तत्र यतिः । चन्द्रिकेत्यन्ये ।

म्नौ ज्नौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ ७० ॥ इति ।

त्रिभि र्दशभिश्च यतिर्यत्र सा । [* चतुर्ग्रहैरिह रुचिराजभौसरौगः, B.

* चतुर्ग्रहैरतिरुचिरा जभस्जगाः ॥ ७१ ॥ इति ।

जभसजगैश्चतुर्षु नवसु च यतौ अतिरुचिरा ।

वेदै रन्ध्रै म्तौ यसगा मत्तमयूरम् ॥ ७२ ॥ इति ।

वेदाश्चत्वारो रन्ध्राणि नव ।

उपस्थितमिदं ज्सौ त्सौ सगुरुकं चेत् ॥

सजसा जगौ भवति मञ्जुभाषिणी ॥ ७३ ॥ इति ।

स्पष्टम् । पञ्चभिरष्टभिश्चात्र यतिः ।

ननततगुरुभि श्चन्द्रिकाश्वर्तुभिः ॥ ७४ ॥ इति ।

अश्वाः सप्त ऋतवः षट् । इयं ग्रन्थेवाचार्यमतभेदेन संज्ञान्तरार्थं

मया, यमौ रौ विख्याता चञ्चरीकावली गः । [पुनरुक्ते ।

जभौस्जगावतिरुचिराम्बुधिग्रहैः ।

भरतमतेनेयमेव पूर्वं अतिरुचिरोक्ता ।

नसरयुगगैश्चन्द्रलेखतुर्लोकैः ।

षड्भिः सप्तभिश्च यतिः ।

ऋतुमुनियति विद्युन्ननौ तौ गुरुः ॥

अत्र वृत्तसंख्या ८१९२ ।

अथ शक्करी १४ ॥

म्तौ न्सौ गावसग्रहविरतिरसम्बाधा ॥ ७५ ॥ इति ।

मतनसगणै र्गुरुभ्यां चासम्बाधा नाम । अत्रे वौद्धेन्द्रियैः पञ्चभि र्ग्रहै-

नैवभिश्च यति र्यत्र सा तथा।

ननरसलघुगैः स्वरैरपराजिता ॥ ७६ ॥ इति।

स्वराश्च स्वराश्चेतेऽत्र कर्णेषे सप्तभिः सप्तभिश्च यति र्भवति ॥

ननभनलघुगैः प्रहरण * कलिता ॥ ७७ ॥ * कलिका, A.

पूर्वोक्तैव यतिः।

उक्ता वसन्ततिलका तभजा जगौ गः ॥ ७८ ॥ इति।

तभजजा गणा गुरू चेति वसन्ततिलका।

सिंहोन्नतेयमुदिता मुनिकाश्यपेन ॥ ७९ ॥ इति।

काश्यपेन मुनिनेयं वसन्ततिलकैव सिंहोन्नतोक्तेति संज्ञान्तरोक्तिः।

उद्धर्षिणीयमुदिता मुनिसैतवेन ॥ ८० ॥ इति।

सैतवेन त्वाचार्येण इयमुद्धर्षिणीत्युक्ता।

इन्दुवदना भजसनैः सगुरुयुग्मैः ॥ ८१ ॥ इति।

गुरुयुगलसहितै र्भजसनैः।

द्विःसप्तच्छिदलोला म्सौ म्भौ गौ चरणे चेत् ॥ ८२ ॥ इति।

द्वि द्विवारं सप्तसु च्छिद् यति र्यस्याः सा अलोला नाम।

तथा, ननतजगुरुगैः सप्तयति र्नन्दी स्यात् ॥

लक्ष्मीरन्तविरामा म्सौ तभौ गुरुयुग्मम् ॥

त्रिननगगिति वसुयति सुपवित्रम् ॥

मध्यक्षामा युगदशविरमा म्भौ न्यौ गौ ॥

इदमेव कुटिलमित्यनेत्र।

नजभजला गुरुश्च भवति प्रमदा ॥

सजसा यलौ गितिशरग्रहै र्मञ्जरी।

नजभजगै र्गुरुश्च वसुषट् कुमारी ॥

नरनगै र्लगौ च रचितं सुकेशरम् ॥ अत्र वृत्तसंख्या १६३८४ ॥

अथातिशक्करी १५।

द्विहतहयलघुरथगिति शशिकला ॥ ८३ ॥ इति।

द्विगुणिता द्वयाः सप्त लघवो यत्र सा तथा अथ तदनन्तरं गुरुः गुर्विता-चतुर्दश लघवः शशिकलेत्यर्थः । इयमेव पैङ्गले ननननसैश्चन्द्रावर्त्ता नामोक्ता । अत्र सप्तभिरष्टभिश्च यतिरिति सम्प्रदायः ॥

स्रगिति भवति रसनवकयतिरियम् ॥ ८४ ॥ इति ।

इयं शशिकलेव रसेषु षट्सु नवसु यतौ स्रगिति संज्ञिता मालेत्यर्थः ।

वसुहययतिरिह मणिगुणनिकरः ॥ ८५ ॥ इति ।

अष्टसु सप्तसु च यतौ इयमेव शशिकला मणिगुणनिकरसंज्ञितेति । यति-भेदेन संज्ञान्तरद्वयमुक्तम् ।

ननमयययुतेयं मालिनी भोगिलोकैः ॥ ८६ ॥ इति ।

भोगिभि र्नागै रष्टभि र्लोकै र्भूरादिभिः सप्तभि र्यताविति शेषः । नाग-लोकैरिति रुचिरः पाठः ।

भवति नजौ भजौ रसहितौ प्रभद्रकम् ॥ ८७ ॥ इति ।

रसहितौ रगणयुक्तौ । सप्तस्वष्टसु च यतिः ।

सजना नयौ शरदशयतिरियमेला ॥ ८८ ॥ इति ।

शरेषु पञ्चसु दशसु च यतौ सजननयैरेला नाम ।

म्नौ म्यौ यान्तौ भवेतां सप्ताष्टभिश्चन्द्रलेखा ॥ ८९ ॥ इति ।

यान्तौ यगणयुक्तौ ।

तथा, मा वाणा सुञ्ज र्यस्यां सा कामक्रीडासंज्ञा ज्ञेया ॥

नजभजरै विराजितमिदं * सुकेसरम् ॥ * सुखेलकम् A.

चन्द्रलेखाभिधा रौ म्यौ यो विरामः स्वराष्टौ ॥

ननतभरलताङ्गैः स्वरैरुपमालिनी ॥ अत्र वृत्तानि ३२७६८ ॥

अथाष्टिः १६ ॥

भ्रतिनगैः स्वरात् स्वमृषभगजविलसितम् ॥ ९० ॥ इति ।

भ्रौ च तयो नाश्च गुरुश्च तै विग्रहः, स्वरात् सप्तमात् परं खं विरामो यदि तदेतिशेषः । सप्तसु यतिः, पादान्ते यतिः प्राप्तैवेति सा नोक्ता । स्वरात् परं खं शरीरच्छिद्रं नवकं यतिस्थानमिति शेष इति वार्थः ऋषभेत्यादि

सर्वं नाम।

नजभजरैः सदा भवति वाणिनी गयुक्तैः॥ ८१॥ इति।

गयुक्तैः गुरुयुक्तैः।

तथा, चित्रसंज्ञमीरितं रजौ रजौ रगौ च वृत्तम्॥

जरौ जरौ ततो जगौ च पञ्चचामरं वदेत्॥

सङ्कथिता भरौ नरनगाश्च धीरललिता॥

पञ्चभकारयुताश्चगतिर्यदि चान्त्यगुरुः॥ अत्र संख्या ६५५३६।

अथात्यष्टिः १७।

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी॥ ८२॥ इति।

रसैः षड्भिः रुद्रैरेकादशभिश्छिन्ना यतिमती।

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः॥ ८३॥ इति।

वसुभिरष्टभिर्ग्रहैर्नवभिश्च यतिमती।

दिङ्मुनिर्वंशपत्रपतितं भरनभनलगैः॥ ८४॥ इति।

दिशो दश मुनयः सप्त दिशो मुनयश्चेति समाहारे छन्दोविशेषणं यतिस्थाने, न च तत्संख्याकाक्षररूपता विवक्षिता दिङ्मुनिभिर्वंशपत्रपतितमिति। एकं वा पदं यतिपदस्य मध्यमस्य लोपेन वा समासः। तत्र यतिस्थानमिति वाध्याहारः। दिङ्मुनियतीति पदेऽन्त्यपदलोप इति केचित्। लुप्तविभक्त्यन्तमित्यन्ये। तदुभयं चिन्त्यम्॥

रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा॥ ८५॥ इति।

षट्सु चतुर्षु सप्तसु च त्रिषु स्थानेषु यतौ हरिणी नाम।

मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत्॥ ८६॥ इति।

मभनततगगैर्मन्दाक्रान्ता जलधिषडगैश्चतुर्भिः षड्भिरगैः पर्वतैः सप्तभिः।

हयदशभिर्नजौ भजजला गुरु * नर्कुटकम्॥ ८७॥ इति।

सप्तभिर्दशभिश्च यतिः। [* नर्दटकं A.

मुनिगुहकार्णवैः कृतयति वद कोकिलकम्॥ ८८॥ इति।

मुनयः सप्त गुहस्य स्कन्दस्य कानि मुखानि षट् अर्णवा चत्वार-

स्तैः स्तता यतिर्यत्र तन्नर्कुटकमेव कोकिलकं वद भ्रूहीति शिष्योपदेशः। यतिभेदेन तस्यैवान्या संज्ञेति।

तथा, रसयुगहययुङ्नौ म्रौ स्लौ गो हि यदा हरिः॥

भवेत् कान्ता युगरसहयैर्यभौ नरसा लगौ॥

ससजा भजगा गुरु दिक्स्वरैर्भवति चित्रलेखा॥ अत्र वृत्तसंख्या

अथ धृतिः १८॥ [१३१०७२॥

सप्ताङ्गर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ॥ ९९॥ इति॥

भूतानि पञ्च ऋतवः षट् अश्वाः सप्त।

तथा, मात् सो जौ भरसंयुतौ करि (८) वाण (५) कै (५) र्हरिणप्लुतम्॥

यदिह नयुगलं ततो वेदरेफैर्महामालिका॥

पञ्चभकाररताश्वगतिर्यदि चान्तसरचिता॥

सुधातर्कैस्तर्कैर्भवति ऋतुभिर्यो मो नसतसाः॥ तर्काः षट्।

वर्णाश्वैर्मनननतमकैः कीर्तिता चित्रलेखेयम्॥ वर्णाश्चत्वारः।

भाद् रननानसौ भ्रमरपदकमिदमभिहितम्॥

शार्दूलं वद मासषट्कयति मः सौ जसौ रो भवेत्॥ मासा द्वादश।

अर्थाश्वाश्वैर्मभनयरयुगैर्वृत्तं मतं केशरम्॥ अर्थाश्चत्वारः।

भ्नौ नृजौ भ्नौ चेञ्चलमिदमुदितं युगैर्मुनिभिः स्वरैः॥ अत्र

अथातिधृतिः॥१९॥ [वृत्तानि २६२१४४॥

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्॥ १००॥ इति॥

द्वादशभिः सप्तभिश्च यतिः। तथा,

नयुगललगुरू निरन्तरं यदा स पञ्चचामरः॥

रसर्त्वश्वैर्यम्नौ स्नौ ररगुरुयुता मेघविस्फूर्जिता स्यात्॥

भूताश्वाश्वान्तं मतनसररगैः कीर्तितं पुष्पदाम॥

वृत्तं विम्बाख्यं शरमुनितुरगैर्मतौ न्सौ ततौ चेद्गुरुः॥

इयं छाया ख्याता ऋतुरसहयैर्यो मनसा भ्तौ गुरुः॥

रसैः षड्भिर्लोकैर्यमनसजजा गुरुर्मकरन्दिका॥

*युगाश्वैः स्याद् यभनयजजगाः कीर्तिता मणिमञ्जरी। * इमा,
गजाब्धितुरगै र्भसौ जसतभा गश्चेत् समुद्रतता॥ [A.

अत्र वृत्तानि ५२४२८८।

अथ कृतिः २०।

ज्ञेयाः सप्ताश्व षड्भि र्मरभनययुता भ्लौ गः सुवदना॥१०१॥ इति।

सप्तभिः सप्तभिः षड्भिश्च यतिः।

त्रौ रजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम॥ १०२॥

त्रिवारं रगणजगणौ गुरुलघू चेदेतादृशेन लक्षणेन वृत्तं नाम गुरुलघुक्रमेणेत्यर्थः। अत्र पादान्ते यतिः। ढलोपे पूर्वस्य दीर्घोऽण इति त्रिरित्यत्र दीर्घः। तथा, रसैरश्वैरश्वैर्यमननततगै र्गैने शोभेयमुक्ता॥

अत्र संख्या १०४८५७६। [१०३॥ इति।

अथ प्रकृतिः २१॥

म्रौ भ्नौ यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्॥

मरभनै र्यगणत्रयेण च स्रग्धरा त्रिवारं मुनिषु यतियुक्ता सप्तसु सप्तसु सप्तसु यतिमतीत्यर्थः। तथा,

सलिलनिधि र्भवेदिह नजौ भगणौ जगणास्त्रयश्च रः॥

अन्येषां मते सिद्धकमिति संज्ञितमेतत् अत्र संख्या २०९७१५२।

अथाकृतिः २२।

भ्मौ नरना रनावथगुरु दिगर्कविरमं हि भद्रकमिति॥ १०४॥

दिक्षु दशसु अर्केषु द्वादशसु च विरमो विरति र्यस्य तत् तथा प्रसिद्धम्॥ तथा,

सप्तभकाररचितावसितौ सगुरुः कविभिः कथिता मदिरा॥

अत्र वृत्तानि ४१९४३०४॥

अथ विकृतिः २३। [१०५॥ इति।

यदिह नजौ भजौ भजभलगास्तदश्वललितं हरार्कयतिमत्॥

हराः ११, अर्काः १२। [१०६॥ इति।

मत्ताक्रीडा मौ त्नौ नौ नल्गिति भवति वसुशरदशयतियुता।

वसवोऽष्टौ पञ्चदश च तेषु यतिमती। अष्टमे पञ्चदश इति च वर्णे यतिः कार्येत्यर्थः न तु पञ्चसु दशसु चेत्यर्थः, मत्ताक्रीडा मौ त्मौ नौ न्लौग् वसुपञ्चदशकाविति सूत्रे द्विवचननिर्देशात्। अन्यथा हि बहुवचनं स्यात्। अन्यैस्तु वाजिवाहनमेतदुक्तम्। अत्र संख्या ८३८८६०८॥

अथ संकृतिः २४॥

भूतमुनीनैर्यतिरिह भतना स्भौ भनयाश्च यदि भवति तन्वी॥१०७॥ इति। भूतानि पञ्च मुनयः सप्त इनाः सूर्या द्वादश अत्र पैङ्गले द्वादशसु च यतिरुक्ता॥ अत्र संख्या १६६७७२१६॥

अथातिकृतिः २५॥ [१०८॥ इति।

क्रौञ्चपदा भस्मौ स्भौ नननना न्गाविषुशरवसुमुनिविरतिरिह भवेत्॥ इषवः पञ्च शराः पञ्च वसवोऽष्टौ मुनयः सप्त एतेषु विरतिर्यस्याः सा। अत्र संख्या ३३५५४४३२।

अथोत्कृतिः २६॥ [इति।

वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम्॥१०९॥ वसवः ८, ईशाः ११, अश्वाः सप्त एतैश्छेदेन यत्या युक्तम्॥ [११०॥ इति।

मो नाः षट् सगगिति यदि नवरसरसशरयतियुतमपवाहाख्यम्॥ मः मगणः षड्नाः नगणाः सगणाः गः गुरुः पुनर्गुरुश्च नवभिः षड्भिः पुनः षड्भिः पञ्चभिश्च यत्या युतमपवाहाख्यकम्। अत्र छन्दःसंख्या ६७१०८८६४॥

इति छन्दोरत्नाकरटीकायामुक्तादिप्रकरणम्॥

इदानीं समस्तच्छन्दःसङ्केन समस्तरूपाम् दण्डकानाह।

यदि ह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टि* प्रपातो भवेद्दण्डकः॥१११॥ इति।

*प्रयातो A.

यदीति यद्यर्थेऽव्ययम्। हेति प्रसिद्धर्थेऽव्ययं वा। नयुगलं नगणद्वयं तत-

स्तदनन्तरं सप्त रगणाः स चण्डवृष्टिप्रपातो नाम दण्डकः। इदमेवोदाहरणं पादे। इयं च संज्ञा रातमाण्डव्यव्यतिरिक्तपिङ्गलादिमते। न ताभ्यां त्वेतस्य संज्ञान्तरमकारि॥ [११४ ॥ इति।

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशंखादयः॥

यद्यपि प्रतिचरणं विवृद्धो रेफो रगणो येषु ते तथेति वृत्तपत्त्या प्रथमे पादे नौ ततोऽष्टौ रेफा, द्वितीये नव, तृतीये दश, चतुर्थे एकादशेति वृद्धिरित्यर्थः प्रतीयते, तथापि ग्रन्थान्तरविरोधात् प्रतिदण्डकं चरणेषु विवृद्धा रेफा यत्रेति विग्रहेणोत्तरदण्डकेषु चरणचतुष्टयेऽपि एकैकरेफ इत्यर्थाश्रयणेन ग्रन्थान्तराविरोधः कार्यः। ततश्च नाभ्यां रगणाष्टकेन च घटितपादोऽर्णाख्यो दण्डकः, रगणनवकेनार्णवः, दशभि र्व्यालः, एकादशभि र्जीमूतः, द्वादशभि र्लीलाकरः, त्रयोदशभिरुद्दामः, चतुर्दशभिः शंखः सर्वत्रादौ नगणद्वयं कार्यम्। आदिशब्दात् पञ्चदशादिराराम-संग्राम-सुराम-वैकुण्ठ-सोत्कण्ठ-सार-कासार-विस्तार-संहार-नीहार-मन्दार-केदार-साधार-सत्कार-संस्कार-माकन्द-गोविन्द-सानन्द-सन्दोह-नन्देत्येवमादिनामका एकैकरगणवृद्ध्या नद्वयोत्तरैकत्रिंशदधिकशतत्रयरगणघटितैकोनसहस्राक्षरपादपर्यन्तं कविप्रयोगानुसारेण दण्डका ज्ञेयाः॥ यदाहुः "एकोनसहस्राक्षरपर्यन्ता दण्डकाद्भुयः प्रोक्ताः। वर्णत्रिकगणवृद्ध्या नद्वितयाद्या महामतिभिः" इति। तथाच, रगणघटितदण्डकाः पञ्चविंशत्यधिकशतत्रयसंख्याका भवन्ति ३२५। एवं यगणादिघटितदण्डका अपि। तत्र रीतिप्रदर्शनायोदाहरणं ममैव यथा, त्रिभुवनसुखहेतवे धातृमुख्यामरप्रार्थनासार्थनावर्षिचिन्तामणे, दशरथक्षतयागसौभाग्यतस्त्वत्तनूजन्मतास्थापितश्रोतमार्गार्गल। मुनिवनगतताटकाकटकीमूलकुद्दालितस्वीयबाणावले राघव, कुशिकयजनसिद्धये व्योम हत्वा शरैश्चण्डवृष्टिं प्रयासि प्रहन्तुं रिपून्॥ एवमर्णादिषु अपि उदाहार्यम्।

प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः॥ ११५॥ इति।

नगणद्वयादुत्तरभाविभिः सप्तभि र्यगणै र्धीरैर्बुद्धिभिः कविभिः प्रचितक-संज्ञको दण्डकउक्तः प्रचितक इति समभिधा नाम यस्येति विग्रहः। अत्रापि पूर्ववदेकैकयगणवृद्ध्या दण्डकाः कार्याः। यैरित्युपलक्षणम् अष्टभिरपि गणैः कविप्रयोगानुरोधाद्भोगावलीविरुदावल्यादिषु दण्डकाना-मिष्टत्वात्। यद्यपि "शेषः प्रचितः" इति सूत्रं वृत्तिकृता रेफाष्टका-दिरचितदण्डकपरं शेषशब्दमङ्गीकृत्य रगणघटितानामेव चण्डवृष्टिप्रपातो-द्भाविनां प्रचित इति समापनसंज्ञाभिधानार्थतया व्याख्यातम्। अतएव चाह सः "प्रथमकथितदण्डकश्चण्डवृष्टिप्रपाताभिधानो मुनेः पिङ्गला-चार्यनाम्नो मतः, प्रचित इति ततः परं दण्डकानामियं जातिरेकैक-रेफाभिवृद्ध्या यथेष्टं भवेत्। स्वरुचिरचितसंज्ञया तद्विशेषैरशेषैः पुनः काम-मन्येऽपि कुर्वन्तु वागीश्वराः, भवति यदि समानसंख्याक्षरै र्यत्र पादव्यवस्था ततो दण्डकः पूज्यतेऽसौ जनैः" इति। तथापि यगणादिदण्डकानामपि कविप्रयुक्तत्वादुक्तरगणरचितदण्डकव्यतिरिक्तयावच्छास्त्रदण्डकानामेव शेषशब्दो-द्दिष्टानामपि तत् संज्ञाज्ञापनार्थतां सूत्रस्याभिप्रेत्य व्याख्या। अत्र तत्कृतव्याख्यामनुसरत एव समादिकोदाहरणेऽप्यदोषः। सर्वेषु दण्डकेषु पादान्ते यतिः। भूतिसौकर्येण वा अन्येऽपि दण्डका अनेकशः। यथा,

नयुगलगुरुयुगेवं यकाराः कवीच्छानुरोधात्तदा
यत्र बध्नन्त एषोऽपरो दण्डकः पण्डितैरीरितः सिंहविक्रान्तनामा॥
यत्र रेफान् कविः स्वेच्छया पाठसौभाग्यसापेक्षया-
रोपयतेऽत्र धीरैः स्मृतो दण्डको मत्तमातङ्गलीलाकरः॥
लघु गुं रुक्रमेण यत्र बध्यते सुधीभिरिच्छया
स दण्डकश्चानङ्गशेखरः स्मृतः॥
स्वेच्छया रजौ क्रमेण सन्निवेशयतुदारधीः कविः स
दण्डकः स्मृतो जगत्यशोकमञ्जरी॥
सगणः सकलः खलु यत्र भवेत्तमिह
प्रवदन्ति बुधाः कुसुमस्तवकम्॥

यकारैः कवीच्छानुरोधान्निबद्धैः प्रसिद्धो

विशुद्धोऽपरो दण्डकः सिंह * विक्रान्तनामा ॥ * विक्रीड, A.

एवं मेघमालाकुसुमस्तरणोत्तरकामबाणाद्यो दण्डकाः षड्विंशत्यक्षराधिकाक्षरपदाः कविप्रयोगानुसारेण ज्ञेयाः। षड्विंशत्यक्षरन्यूनतायां तु पूर्वोक्तासु जातिष्वेवान्तर्भावो यथायोगं भवति॥

इति श्रीमद्गङ्गारामेश्वरसूरिसूनुनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां समवृत्ताध्यायः॥

एवं समवृत्तान्यभिधायाधुना अर्धसमान्याह।

विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्रम् ॥१॥ इति।

विषमे दले प्रथमे तृतीये च पादे सौ सगणद्वयं सलगाश्च सगणलघुगुरवः, युजि समे द्वितीये चतुर्थे च पादे भौ भगणौ पुनर्भगणस्ततो द्वौ गुरू तदोपचित्रं नाम। अर्धसमत्वात् द्वितीयार्धमपेत्रवमेवोदाहार्यम्। एवमन्येऽपि। [२॥ इति।

भत्रयमोजगतं गुरुणी चेद् युजि च नजौ ज्यौ युतौ द्रुतमध्या॥

ओजगतं विषमपादगतं भगणत्रयं च गुरुणी चेद् द्वे अक्षरे, युजि समपादे जयपरौ नगणजगणौ चेत् सा द्रुतमध्येति नाम। उपचित्रापातलिकापरान्तिकेयम्। (अत्रापरान्तिकासन्निवेशो भ्रान्तः)।

सयुगात्सगुरू विषमे चेद्भाविह वेगवती युजि भाद्गौ ॥३॥ इति।

विषमे पादे सत्रयं गुरुश्च, युजि समे पादे भगणत्रयं गुरू च इह छन्दःशास्त्रे वेगवती नाम, आपातलिकैवेयम्।

ओजे तपरौ जरौ गुरुश्चेन् म्सौ ज्गौ भद्रविराड् भवेदनोजे ॥ ४ ॥ इति।

ओजे विषमे पादे तगणात् परौ जगणरगणौ गुरुश्च, अनोजे विषमे

ससजगगुरवश्च भद्रविराड् भवेत्। औपच्छन्दसिकस्यैवेयं गणनिवेशविशेषे संज्ञा॥

असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद्गः॥ ५॥ इति।

विषमे दले पादे सजसा गणा गुरुश्च, समे भरना गणा गुरू च केतुमती नाम। भरनगादिति समाहारैकवचनम्।　　[६॥ इति।

आख्यानकी तौ जगुरू ग ओजे जतावनोजे जगुरू गुरुश्चेत्॥

तौ गणौ जगणगुरू गुरुश्चौजे विषमे पादे, अनोजे समे पादे जतजगगुरवस्तदाख्यानकी नाम।　　[७॥ इति।

जतौ जगौ गो विषमे समे चेत् तौ ज्गौ ग एषा विपरीतपूर्वा॥

विषमे जतजगगुरवः, समे ततजगगुरवस्तदैषा आख्यानकी विपरीतशब्दपूर्वा विपरीताख्यानकीत्यर्थः। अनयोरुपजात्यन्तर्भावेऽपि विशेषसंज्ञाविधानार्थं अर्धसमाध्याये पाठः।

सयुगात् सलघू विषमे गुरु युंजि नभौ भरकौ हरिणप्लुता॥८॥ इति।

सगणद्वयात् सगणलघू गुरुश्च विषमपादे, युजि समे पादे नभभरा गणा हरिणप्लुता नाम।

अयुजि ननरला गुरुः समे नजमपरवक्त्रमिदं ततो जरौ॥ ९॥ इति।

विषमे ननरलगुरवः, समे नजजराः अपरवक्त्रं नाम। अस्य वैतालीयान्तर्गतत्वेऽपि संज्ञान्तरविधानार्थमत्रोक्तिः।　　[॥ १०॥ इति।

अयुजि नयुगरेफतो यकारो युजि च नजौ रगाश्च पुष्पिताग्रा

विषमे नयुगलरेफयकाराः, युजि समे नजजरगुरवस्तदा पुष्पिताग्रा नाम। इयमप्यौपच्छन्दसिकान्तर्भूतैव विशेषसंज्ञार्थमिहोक्ता।

वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः।
पुष्पिताग्राभिधं केचिदौपच्छन्दसिकन्तथा॥ ११॥

विपश्चितः पण्डिता अपरवक्त्राख्यं वैतालीयमेव वदन्ति। पुष्पिताग्राभिधं छन्दः औपछन्दसिकमेव केचिदाहुः। इदं स्वस्यापि सम्मतम्। भावस्तूक्त एव।

स्यादयुग्मके रजौ रयौ समे चेत् जरौ जरौ गुरु, र्यवात् परा म-
तीयम् ॥ १२ ॥ इति।

विषमपादे रजरयाः, समे जरजरगाः यवात् यवशब्दात् परा मती-
यवमतीत्यर्थः।

तथा, सौ लगौ विषमे यदि, सजजा गुरु ललिता समे ॥

ओजपदे भरौ जरौ गुरू समे जौ यौ
कीर्तिता बुधैरियं तु षट्पदाख्या ॥
रो जरौ जसंयुतौ पदे पदेऽथ, युग्मे तरौ जरौ गुरु मृगी यवाग्नौ ॥
अयुजि ननरभाः समेकेऽपि तु, नयुगरयुगलं तदा कैमुदी ॥
यदि विषमे भवतो नजौ जरौ, सजया समे जगुरू मञ्जुसौरभम् ॥

तथा अष्टाविंशति लघव एको गुरुरिति विषमः पादः, त्रिंशल्लघवः एको गुरुश्चेति समः साशिखान्ता। इयमेव विपर्यस्तपादा खञ्जा नाम। एते द्वे अपि द्विखण्डकप्रकरणोक्तशिखाखञ्जयोश्छन्दसोः पञ्चचरतामञ्जीष्टस्य यथाश्रुतव्याख्याने तदतिरिक्ते अत्र स्मृते। यदा त्वस्मदुक्तप्रकारेण तत्र सकलशब्दं पादपरमाश्रित्य व्याख्यायते तत्रैवैतयोरुक्तत्वान्नात्र वक्तव्यता भवति।

इति श्रीमद्भट्टरामेश्वरसूरिसूनुनारायणभट्टविरचितायां वृत्तरत्नाकरव्याख्यायां अर्धसमाध्यायश्चतुर्थः॥

अर्धसमान्यत्वाभिधायोद्देशक्रममनुसृतत्र विषमवृत्तानि लक्षयति।

मुखपादोऽष्टभि वर्णैः, परे तु मकरालयैः क्रमाद्वृद्धैः।
सततं यस्य विचित्रैः पादैः सम्पन्नसौन्दर्यम्
तदुदितममलमतिभिः पदचतुरूर्ध्वाभिधं वृत्तम्॥ १ ॥ इति।

यत्र वृत्तस्तत्र मुखपादः अग्रपादो वर्णाष्टकेन, परे द्वितीयायाः पादा मकरालयैः समुद्रैश्चतुर्भिरक्षरैः क्रमाद्वृद्धैः सततं नैरन्तर्येण सुत्रस्तद्वृत्तं निर्मलबुद्धिभिः पिङ्गलादिभिः पदचतुरूर्ध्वाभिधमुदितमुक्तम्। किं विशिष्टं विचित्रै विलक्षणैः पादैः जातं सौन्दर्यं यत्र तादृशं

अत्र वर्णैरिति सम्पन्नसौन्दर्यमिति च वदता गुरुलघुविशेषनियमो नास्ति। किन्तु श्रोतृश्रोत्रसौभाग्यार्थं वर्णवैचित्र्यं विधेयमिति सूचितम्। प्रथमपादोऽष्टाक्षरः द्वितीयो द्वादशाक्षरस्तृतीयः षोडशाक्षरश्चतुर्थो विंशत्यक्षरः कार्य इति फलितोऽर्थः। अत्र चैकद्वित्रिचतुष्कानां परस्परताडनया पादानां परस्परसङ्करे शंखचक्रगदापद्मानां परस्परसङ्करे केशवरचनाया इव चतुर्विंशति र्भेदा भवन्ति। तत्प्रस्तारतो यथा।*

८. १२. १६. २०, ८. १६. १२. २०, ८. २०. १६. १२, ८. १२. २०. १६, ८. १६. २०. १२, ८. २०. १२. १६, १२. ८. १६. २०, १२. १६. ८. २०, १२. २०. १६. ८, १२. ८. २०, १६, १२. १६. २०. ८, १२. २०. ८. १६, १६. १२. ८. २०, १६. ८. १२. २०, १६. २०. ८. १२, १६. १२. २०. ८, १६. ८. २०. १२, १६. २०. १२. ८, २०. १२. १६. ८, २०. ८. १६. १२, २०. १२. ८. १६, २०. १६. ८. १२, २०. १६. १२. ८, २०. ८. १२. १६।

अत्रैकैकपंक्तिस्थितकोष्ठकचतुष्टयस्थिताङ्कसमानाक्षरक्रमिकपादैरेकैकोभेदो ज्ञेयः। तत्र प्रथमभेदे मूलस्थितमुदाहरणम्। द्वितीये तु ममैव यथा। लोभं लम्भय विलयं ८ लाभालाभावुभौ भावय समानौ भव धीरः १६। यत्नाद्गुरुजनगौरवमाचर १२ यदि तवास्मिन्नमुष्मिंश्च लोके यशो-विशालमाशास्त्र स्यात् २० ॥ इदमेवोदाहरणं पादव्यत्ययेनेतरेषु द्वाविंशतिभेदेषु योज्यम्। एतस्यैव प्रतिपादान्ते गुरुद्वयनियमे संज्ञान्तरमाह।

प्रथममुदितवृत्ते, विरचितविषमचरणभाजि।
गुरुकयुगलनिधन इह सहित आद्या
लघुविरचितपद*विरतिर्यतिरिति भवति पीडः ॥ २ ॥ इति।

* रचन A.

विरचितान् विषमान् विषमसंख्याकाक्षरान् चरणान् भजति एवंभूते

* बोधसौकर्याय कोष्टकान्यत्र क्रमाद्वारा प्रदर्शितानि।

प्रथमोक्ते पदचतुरूर्ध्वाभिधे वृत्ते इति सर्वोऽनुवादः, गुरुयुग्मं निधने यस्य तादृशे सति स्वार्थे कः, तृतीयं प्रकारः आङा उपसर्गेण सहितः पीडः आपीडो भवतीत्यर्थः। कीदृक् लघुकृतपदरचनया यति र्यस्मिन् अन्ते गुरुद्वयमत्र नियतत्वादितरभागे लघुविरचितत्वं श्रुतिसुखकरी च लघुपादयतिः कार्येति सूचनाय यतिग्रहणम्। विंशिष्टानुवादशाष्टाद्यक्षरेष्वेव पादेषु अन्ते गुरुद्वयं कार्यं न तु ततोऽतिरिक्तमिति सूचनार्थः। आपीड इति संज्ञामा-च्छन्दस्यप्रवेशादाङा सहित इत्युक्तिरीतिः। पूर्वोक्तरीत्यापीडेऽपि चतुर्विंशतिप्रकारो भेदः। प्रथमभेदोदाहरणमिदम्। आपीड एव सप्तमाष्टमै-कादशान् भेदान् व्युत्पादनाय व्युत्पादयति। प्रथमे त्रिभिः।

प्रथम * मितरचरणसमुत्थं, श्रयति स यदि लक्ष्म। * अपर A.
इतरदितरगदितमपि यदि च तुर्यं
चरणयुगलकमविकृतमपरमिति कलिका सा ॥ ३ ॥ इति।

तुर्यशब्देन श्लोकचतुर्थांशः पाद उच्यते। ततश्च प्रथमं तुर्यं प्रथमश्चरणः इतरचरणसमुत्थं स्थानमितरद्वितीयचरणगतं लक्ष्म लक्षणं श्रयति, इतरदपि द्वितीयमपि इतरगदितं प्रथमगदितं श्रयति च यदि अपरं चरणद्वयकं तृतीयचतुर्थरूपमविकृतं यथा स्थितमित्येवंविधा स आपीड एव सा प्रसिद्धा कलिका। यद्वा स आपीडः प्रथमं प्रथमस्थाने प्रथमपादे द्वितीय-पादलक्षणं श्रयति सा कलिका द्वादशाक्षराष्टाक्षरषोड़शाक्षरविंशत्यक्षर-पादैः क्रमेण घटितेति फलितार्थः। पैङ्गले त्वेतस्या मञ्जरी नाम।

द्विगुरुयुतसकलचरणान्ता
मुखचरणगतमनुभवति च तृतीयम्।
* चरणमिह हि लक्ष्म * अपर A
प्रकृतमखिलमपि यदिदमनुभवति लवली सा ॥ ४ ॥ इति।

तृतीयश्चरणो मुखचरणगतं प्रथमचरणस्थं लक्षणमनुभवत्यवलम्बते। अपरं पादत्रयं प्रकृतमखिलं लक्ष्म आपीड़लक्षणं च यदि तदा लवली नाम। क्रमेण द्वादशाक्षरषोड़शाक्षराष्टाक्षरविंशत्यक्षरपादावलीत्यर्थः। गुरुद्वययुक्त-

चतुष्टयान्तेति वृत्तपूरणार्थं सामान्यलक्षणमेवानूदितम्॥

प्रथममधिवसति यदि तुर्यम्, चरमचरणपदमवसितिगुरुयुग्मम्।
अखिलमपरमुपरिगतमिति ललितपदयुक्ता
तदियमृतधारा॥ ५॥ इति।

प्रथमतुर्यं प्रथमस्थरणः चरमचरणपदं चतुर्थचरणस्थानं प्राप्नोति चतुर्थो भवतीत्यर्थः, अपरनिखिलं प्रथमचरणत्रयम् आपीडप्रथमपादोपरिगतद्वितीयादिपादसमं तदिदं छन्दोऽमृतधारा नाम। अवसितौ गुरुद्वययुक्तमिति इदमित्यस्य विशेषणं तुर्यवत् स्वरूपकीर्तनार्थम्। ललितपदयुक्तेति वृत्तपूरणाय स्वरूपोक्तिः। द्वादशषोडशविंशत्यष्टाक्षरपादक्रमेण भवतीति सङ्कलितार्थः। यद्यपि वृत्तिकारेण प्रथमस्य तृतीयत्वे तृतीयस्य प्रथमत्वे लवली, प्रथमस्य चतुर्थत्वे चतुर्थस्य च प्रथमत्वेऽमृतधारेति षोड़शद्वादशाष्टविंशत्यक्षरपादक्रमेण विंशतिद्वादशषोडशाष्टाक्षरपादक्रमेण च तयोर्दशैकोनविंशतिभेदयोरेते संज्ञे इति मञ्जर्यप्रभावेऽपि तयोर्विशेष उक्तः, उदाहरणे च तथैव कृते, तथापि प्रथमस्य विपर्यासे मञ्जरीलवल्यमृतधारा इति सूत्रस्य साधारणत्वात् प्रथमपादमात्रविपर्यासोक्तेरितरेषां क्रमेणाभ्यनुज्ञया वा सूत्रस्य मूलकारोक्त एवार्थस्तात्पर्यादेवमुक्तम्। आपीड़वत् पदचतुरूर्ध्वेऽपि पादव्यासे मञ्जर्याद्या भेदा ज्ञेयाः। तथा आदावेव सकलपादेषु गुरुद्वययुतं चतुरूर्ध्वं प्रत्यापीड़ः। यथा वृत्तौ, "चित्तं मम रमयति, कान्तं वनमिदमुपगिरिनदि। कूजन्मधुकरकलरवकृतजनधृति, पुंस्कोकिलमुखरितसुरभिकुसुमचिततरुतति॥" आदावन्ते च गुरुद्वयसहितं तदेवोभयापीड़ः। पैङ्गले त्वयमपि प्रत्यापीड़ एव। यथा तत्रैव, "कान्तावदनसरोजं, इदं घनसुरभिमधुरसाढ्यम्। पातुं रहसि सततमभिलषति मनो मे, किञ्चिन्मुकुलितनयनमविरतमणितरमणीयम्॥" अनयोः पूर्वोक्तविधया चतुर्विंशतित्वमूह्यम्। उदाहरणानि विस्तरभयान्नोदाहृतानि स्वयमूह्यानि॥

इति श्रीनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां पादचतुरूर्ध्वप्रकरणम्॥

विषमवृत्तान्तराण्याह।

सजमादिमे सलघुकौ च, नसजगुरुकैरथोद्गता। [॥ ६ ॥ इति।

त्र्यङ्घ्रिगतभनजला गयुताः, सजसा जगौ चरणमेकतः पठेत्

पाद इति शेषः। आदिमे पादे सजसलघवः, अथानन्तरं द्वितीयपादे इत्यर्थः नसजगुरुषु सत्सु तृतीयेऽङ्घ्रौ भनजलघवस्ते गयुता गुरुयुक्ताः कार्या इत्यर्थः, परिशेषे चतुर्थे सजसा गणा जगुरू च चरणमेकवचननिर्देशात् प्रथममेकं चरणमेकत एकीकृतत्र द्वितीयेनेतत्र्यर्थात् पठेत्। प्रथमद्वितीयौ पादौ विलम्बेन पठेदतत्रन्तयतिं न कुर्यादितत्र्यर्थः। सजमिति द्वन्द्वैकवद्भावः। स्वार्थे कः त्रयाणां पूरणेऽङ्घ्रौ गता ये भनजला गयुक्ताः कार्या इति। मध्यमपूरणपदलोपिसमाश्रयणेन उद्देशविधानाद्वा सर्वविधानाच्च तीयप्रतत्रयोत्पत्तिरसामर्थ्यं च न भवत इति ज्ञेयम्। एकत इति एकशब्दो भावप्रधानः तृतीयार्थे च तसिः तथा चैकेत्रनेतत्र्यर्थः। ल्यब्लोपे पञ्चमी प्रथमं द्वितीयेनै विधाय पठेदितत्र्यर्थः॥

चरणत्रयं व्रजति लक्ष्म, यदि सकलमुद्गतागतम्।

नौं भगौ भवति सौरभकं, चरणे यदीह भवतस्तृतीयके ॥७॥ इति।

स्वार्थे कः। तृतीये चरणे नौं रगणनगणौ भगुरू च भवतः। चरणत्रयपरिशेषात् प्रथमद्वितीयचतुर्थरूपं उद्गतास्थितं समग्रलक्षणं भजति, तदेह शास्त्रे सौरभकं भवतीति व्यवसितिः चतदाध्याहाराभ्यामर्थः॥

नयुगं सकारयुगलं च, भवति चरणे तृतीयके। [इति।

तदुदितमुरुमतिभि र्ललितं, यदि शेषमस्य खलु पूर्वतुल्यकम् ॥ ८ ॥

तृतीयपादे ननससाः, शेषं तृतीयान्यच्चरणत्रयं पूर्वोक्तोद्गतावत् तदा बहुदर्शिभि र्ललितं नामोक्तम्। मते विंषयबाहुल्येनोक्ता न तु स्वतः। अन्यथा स्थूलबुद्धित्वोक्तत्रा निन्दैव स्यात्। स्वार्थे कः तथा उद्गतायाः प्रथमतृतीयपादव्यत्यये मञ्जरा नाम। उदाहरणमूह्यमेव।

इति वृत्तरत्नाकरटीकायामुद्गताप्रकरणम्॥

म्सौ ज्भौ गौ प्रथमाङ्घ्रिरेकतः पृथगन्यत्

त्रितयं सनजरगास्ततो, ननौ सः।

त्रिभपरिकलितजयौ, प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥ ९ ॥ इति

मसजभगगुरवः प्रथमपादः। स चैकः पृथक् पठनीयः, न त्वन्यतावत् द्वितीये-नैकीकृतेत्यर्थः। प्रथमार्थे तसिः। अन्यच्चरणत्रयं कथ्यत इति शेषः। सनजरगुरुभिर्द्वितीयः पादस्तदनन्तरं तृतीयपादे ननौ सगणश्च त्रिभि र्नगणैः परिकलितौ सहितौ जयौ गणौ चतुर्थे पादे इदं छन्द उपस्थितपदपूर्वं प्रचुपितं उपस्थितप्रचुपितमित्यर्थः। अन्यस्तु प्रथमोऽङ्घ्रिरेकः केवलः पठनीयः अन्यत् चरणत्रयं पृथक्कथनाद्भिन्नत्वे नैकीकृत्य पठनीयं न तु तत् प्रतिचरणान्तं विरामः कार्यः, ततः श्लोकार्धे तु विशेषत इत्यस्यापवादोऽयमिति व्याचख्यौ।

नौ पादेऽथ तृतीयके सनौ नसंयुक्तौ, प्रथमाङ्घ्रिकृतयतिस्तु वर्धमानम्।

त्रितयमपरमपि पूर्वसदृशमिह भवति

प्रततमतिभिरिति गदितं लघु वृत्तम् ॥ १० ॥ इति।

तृतीयपादे नौ नगणौ अथ सनौ सगणनगणौ नगणाभ्यां युक्तौ एवं षट् गणा भवन्ति। अपरं पादत्रयं प्रथमद्वितीयचतुर्थरूपं उपस्थितप्रचुपित-तुल्यमेव भवति। इत्यमुना प्रकारेण प्रसिद्धधीभि र्लघु सुन्दरं वर्धमानं नाम वृत्तमुदितमुक्तम्। प्रथमाङ्घ्रौ कृतया यतत्रा प्रसूयते प्रशस्यते प्रशस्ततया पठ्यते तत्ताहगिति वर्द्धमानविशेषणं। तुगभावस्तु आगमजमनित्यमिति स्मरणात्। तु इति भिन्नपदे तु यतिरित्यन्तं पुंलिङ्गं स्त्रीलिङ्गं वाऽनन्वितं स्यात्। यतीद्धेति तु पाठो निर्दोषः। अयञ्च पूर्वोक्तानुवाद एवेति व्याख्यानं तद्वदेव ज्ञेयम्।

अस्मिन्नेव तृतीयके यदा तजराः स्युः, प्रथमे च विरतिरार्षभं ब्रुवन्ति।

तच्छुद्धविराट्पुरःस्थितं, त्रितयमपरमपि यदि पूर्वसमं स्यात् ॥ ११ ॥ इति।

अस्मिन् वर्धमाने एव उपस्थितप्रचुपिते एव तृतीयपादे यदि तजरगणा-

त्रयः सुग्रपरं च चरणत्रयं उपस्थितप्रचुपितवत् स्यात् तच्छ्रुद्धविराट्-पदं पुरः स्थितं पूर्ववर्तमानं यस्य तादृशमार्षभं शुद्धविराडार्षभं नाम ब्रुवन्ति वृद्धाः। संज्ञाया वृत्तेऽप्रवेशादुक्ता रीतिरियं प्रथमे पादे यतिरिति पूर्ववदेवार्थः। पैङ्गले तु शुद्धविराड्षभमिति संज्ञा। केचित्तु प्रथमे पादे यतावार्षभम्, यदा तु प्रतिपादं यतिस्तदा शुद्धविराडादिकं तदेवेति यतिभेदाच्छन्दोद्वयमेव पृथग् वदन्ति।

इति उपस्थितप्रचुपितप्रकरणम्॥

अत ग्रन्थेऽनुक्तानि छन्दांसि सामान्यसंज्ञया गृह्णाति।

विषमाक्षरपादं वा पादैरसमं दशधर्मवत्।

यच्छन्दो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तम्॥ १२॥ इति।

विषमाण्यक्षराणि येषु तादृशाः पादा यस्य तत्, तथा अक्षराणां वैषम्यं पादेषु गुरुलघुक्रमनियमसाम्याभावात् संख्यासाम्याभावाच्च वा, अथवा पादैरसमं स्वीयैः पादैः कृत्वा चतुःसङ्ख्याकपादैरन्यच्छन्दैरतुल्यं त्रिपञ्चषडादिपादमिति यावत् न तु समसङ्ख्याकपादरचितमित्यर्थः षट्पदाद्यसंग्रहापत्तेः। अत एव 'शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिता' इति प्रागुक्तं विषमाक्षरपादत्वं चतुष्पदादीनामप्यस्तीति तेषां गाथात्वं निवारयितुमाह यदिति। अत्र यच्छन्दो विशेषेण नोक्तं तदित्यर्थः इदं चाष्टत्रा स्वातन्त्र्येणापि योजग्रम्॥ तेन समाक्षरपादानां समपादानां च कुड्मलदन्त्यादीनामपि गाथात्वं सिध्यति। अतएव "अत्रानुक्तं गाथा" इति सन्दिग्धाकारेण सूत्रितं पिङ्गलेन। विषमाक्षरपादस्य गाथात्वेऽष्टादश-सप्तनवाक्षरमूलकारिकैवोदाहरणं पादैरसममेव। उदाहरणमाह दशधर्म-वदिति। दशधर्मशब्दयोगाल्लक्षणया भारतस्था षट्पदा गाथा दशधर्म-शब्देनोच्यते। सा यथा। "दशधर्मं न जानन्ति धृतराष्ट्र निबोध तान्। मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः। त्वरमाणश्च भीरुश्च लुब्धः कामी

च ते दश॥" इति। असमपादानां दशाष्टादशादिपादानां नाटकादि-स्थनान्द्यादीनामप्यनेन गाथात्वमुक्तं भवति। यथोक्तम्। "शब्दतो वार्थतो वापि मनाक्काव्यार्थसूचना। यत्राष्टभि र्वा दशभिरष्टादशभिरेववा। षड्-विंशत्या पदै र्वापि सा नान्दी परिकीर्तिता" इति। यच्छन्दो नोक्त-मित्यस्य स्वातन्त्र्येण व्याख्या। तेनोक्तमानामपि गाथात्वं भवति। तत्र कियतीनां वृत्तयादिपर्यालोचनयोदाहरणानि सलक्षणानि कथ्यन्ते। तत्र त्रिष्टुभि, भतनगगुरुभिः कुड्मलदन्ती नाम। यथा, कुड्मलदन्ती विकटनितम्बा किन्नरकण्ठी लघुतरमध्या। विम्बफलोष्ठी * लघुतर-नेत्रा मित्र भवन्तं सुखयतु कान्ता॥ अत्र पञ्चभिः षड्भिश्च यतिः। जगत्यां, नजजरै र्वरतनुः। यथा, अयि विजहीहि दृढोपगूहनं त्यज नवसङ्गमभीरु वल्लभम्। अरुणकरोद्गम एष वर्त्तते, वरतनु सम्प्रवदन्ति कुक्कुटाः॥ षड्भिः षड्भिश्च यति। मभसमै र्जलधरमाला। यथा, धत्ते शोभां कुवलयदामश्यामे शैलोत्सङ्गे जलधरमाला लीना। विद्युल्लेखा कनकलता-लङ्कारा क्रीड़ासुप्ता युवतिरिवाङ्के पत्युः॥ चतुर्भिरष्टाभिश्च यतिः॥ नौ रौ गौरी। यथा, प्रणमत चरणारविन्दद्वयं त्रिभुवननमितस्य गौरीपतेः। सकृदपि मनसैव यः सेवितः प्रवितरति यथेष्टमष्टौ गुणान्॥ एतस्या एव गौर्या दण्डकात् प्रागेकैकरेफवृद्धौ नामान्तराणि भवन्ति। भतनसा ललना। यथा, या कुचगुर्वी मृगशिशुनयना पीननितम्बा मदकरिगमना। किन्नरकण्ठी सुललितदशना सा तव सौख्यं वितरतु ललना॥ पञ्चभिः सप्तभिश्च यतिः। अतिजगत्याम्, सजसजगैः कनकप्रभा। यथा, कनकप्रभा पृथुनितम्बशालिनी विपुलस्तनी हरिणशावकेक्षणा। इयमङ्गना नयनयोः पथि स्थिता कुरुते न कस्य मदनातुरं मनः॥ ननततगुरुभिः कुटिल-गतिः। यथा, अधरकिसलये कान्तदन्तक्षते हरिणशिशुदृशां नृत्यति भ्रूयुगम्। ध्रुवमिदमुचितं यद्विपक्षौ सताम् अतिकुटिलगतैः स्वाम्य-स्थानुभवः॥ सप्तभिः षड्भिश्च यतिः॥ शक्वर्याम्, भजसनै र्गुरुभ्यां

* मृगशिशु. P.

च वरसुन्दरी यथा, स्वादुशिशिरोज्ज्वल * जलैः सुपरिपूर्णं वीचिचयचञ्चल-विचित्रशतपत्रम्। हंसकलकूजितमनोहरतटान्तं पश्य वरसुन्दरि सरो-वरमुदारम्॥ मभनयगगैः † कुटिलम्॥ यथा, अध्वन्यानां जनयति सुखमुच्चैः कूजन्, दात्यूहोऽयं पथि निचुलिनि तोयोपान्ते। ‡ कर्णा-टस्त्रीरतिकुहरिततुल्यच्छेदै र्नादैः कण्ठस्खलनकुटिलमन्द्रावर्त्तैः॥ वेदै रसैः समुद्रैश्च यतिः। अष्टौ, भरनभभगैः शैलशिखा। यथा, शैल-शिखा निकुञ्जशयितस्य हरेः श्रवणे जीर्णतृणं करेण निदधाति कपिश्चपलः। पुत्रवधापवादपरिहारविनीत ¶ वृषः तत्र न तावतैव लघुता द्विपयूथ-भिदः॥ भरयननगैर्वरयुवती। कुञ्जरकुम्भपीठपीनोन्नतकुचयुगला पार्व-णशर्वरीशगर्वापहमुखकमला। पीननितम्बविम्बसंवाहनशिथिलगतिः सुन्द-मराधिराज भूयात्तव वरयुवतिः॥ अत्यष्टौ, ससजभजगगै रतिशायिनी। यथा माघे, इति धौतपुरन्ध्रिमत्सरान् सरसि मज्जनेन श्रियमाप्तवतोऽतिशा-यिनीमपमलाङ्गभासः। अवलोक्य तदैव यादवानपरवारिराशेः शिशिरे-तररोचिषाप्यपां ततिषु मङ्क्तुमीषे॥ दशभिः सप्तभिश्च यतिः॥ नज-भजजलगैरवितथम्। यथा, श्रुतिपरि ‖ पूर्णवक्त्रमतिसुन्दरवाग्विभवम् § प्रमथितजैमिनीयमतसागरपारगतम्। अवितथदक्षविप्रजनपूजितपादयुगं पितरमहं नमामि बहुरूपमुदारमतिम्॥ एतदेवाष्टपञ्चचतुर्भि र्यतौ कोकिलकं नाम। यथा, नवसहकारपुष्पमधुनिष्कलकण्ठतया मधुर-तरस्वरेण परिकूजति कोकिलकः। प्रथमककारबिन्दुवचनैर्धनलुब्धमते तव गमनस्य भङ्गमिव सम्प्रति कर्त्तुमनाः॥ धृतौ, रसजजभरै र्विबुध-प्रिया॥ यथा, कुन्दकोमलकुड्मलद्युतिदन्तपङ्क्तिविराजिता हंसगद्गदवा-दिनी वनिता भवेद्विबुधप्रिया। पीनतुङ्गपयोधरद्वयभारमन्थरगामिनी नेत्रकान्तिविनिर्जितश्रवणावतंसितकैरवा॥ अष्टभि र्दशभिश्च यतिः॥ अतिधृतौ, यमनसररगुरुभि र्विलसिता। यथा माघे, श्रिया जुष्टं दिव्यैः

* सुगन्धिजलपूर्ण. P. † कुटिला. P. ‡ काश्मीर. P. ¶ मतेः. P. ‖ पूत. P. § तमखिल. P.

सपटहरवैरन्वितं पुष्पवर्षैः वपुष्टश्चैद्यस्य क्षणमृषिगणैः स्तूयमानं निरीक्ष्य । प्रकाशेनाकाशे दिनकरकरान्विक्षिपद्विस्मिताक्षैः नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षाम्बभूवे ॥ षड्भिः षड्भिः सप्तभिश्च यतिः ॥ प्रकृतौ, भजभजजजरैः * कृतश्रीः ॥ यथा माघे, तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता । परिचलतो बलानुजबलस्य पुरः सततं धृतश्रियश्चिरविगतश्रियो जलनिधेश्च तदाऽभवदन्तरं महत् ॥ त्रिः सप्तसु यतिः एवमादीनि वृत्तप्रस्तारमहाकविप्रयोगेषु दृश्यमानानि गाथाख्यानि ॥ यदा तु यच्छन्दो नोक्तम् अत्रेति विषमाक्षरपादमित्यस्य विशेषणं तदा समच्छन्दसां गाथात्वाभावादेतानि त्रिष्टुबादिषु एव द्रष्टव्यानि । एवमन्यान्यपि छन्दांसि कविप्रयोगानुरोधाज् ज्ञेयानि, समार्धसमविषमप्रस्तारेषु तेषामुपलम्भात् । विशेषसंज्ञाभावात्तु नोदाहृतानि । एतज्जातिवृत्तात्मना द्विविधमपि च्छन्दो न केवलं संस्कृतविषये किन्तु प्राकृतदेशभाषास्वपि कवीच्छया भवति । तत्रार्यैव प्राकृतादिषु गाथेति संज्ञा । यथा ममैव, सअलसिणेहमिअंको तुयि गुणरअणाअरे उदिदो । मिलुप्पलप्पवोहे सिठिलो मा भोदु पच्छणा एसा ॥ वैतालीये च शकुन्तलायां यथा, सहजे किल जे विणिन्दिए णहु दे कम्म विवज्जणीअके । पसुमालणकम्मदालुणे अणुकम्पाभिदुले ए सोत्तिए ॥ एवं समादिष्वपि कर्पूरमञ्जर्यामुदाहरणानि ज्ञेयानि । भाषायामपि । तत्र महाराष्ट्रभाषायामुपजातौ यथा, अगा मुरारी भवदुःखभारी कामादिवैरी मनहेम्यरारी । मीमूढदेवा नकरीं च सेवा माजा कुठावा परितां करावा ॥ गुर्जरभाषया स्रग्विणी यथा, वित्ततें सत्त्ववूं युक्ततें भोगवूं अग्नितें होमवूं विप्रतें आपवूं पापतें खण्डवूं कामतें दण्डवूं पुण्यतें सत्त्ववूं रामतें सेववूं ॥ कान्यकुब्जभाषायां वसन्ततिलका यथा, कन्दर्परूपजवनेतुलली न कृष्णासेकोपकामहमही वक्रपीरछोड़ी ।

---

* शशिवदना. P.

तो भेटिके विरहपीरमसा उमारी यें भान्ति दूति पठई कठिलातगोपी ॥ अथ भाषासंस्कृतयोः सङ्करे मालिन्यां तथा कस्यचित्, हरनयनसमुत्थज्वालवह्नि ज्वलाया रतिनयनजलौघैः खाक वाकी वहाया। तदपि दहति चेतो मामकं क्या करोंगी मदनशिरसि भूयः क्या बला आगि लागी ॥ एवं गौड़ादि भाषासु तत्तत्सङ्करे चोदाहरणानि ज्ञेयानि। अथ शेषं गाथा इति सामान्यत उपक्षिप्तानि विस्तरभीतेः विशेषतो नोक्तानि प्राकृतादिषु प्रायः परिदृष्टानि छन्दांसि प्राकृतपिङ्गलग्रन्थ छन्दश्चूडामण्यादिग्रन्थपर्यालोचनया बुभुत्सितबुभुत्सत्पत्यर्थमस्माभिरुच्यन्ते। तत्र मात्राच्छन्दःसूपयुक्ता गण-भेदाः। तत्र द्विकलौ द्वौ यथा S, ॥ त्रिकलास्त्रयः SI, IS, III. चतुःकलाः पञ्चार्यादिषु संस्थिता इत्यत्र पञ्च मूल एव पूर्वमुक्ताः। पञ्चकला अष्टौ SSI, SIS, ISS, SIII, ISII, IISI, III S, IIIII. षट्कलास्त्रयोदश यथा, SSS, SSII, SISI, SIIS, ISIS, ISSI, IISS, SIIII, ISIII, IISII, IIISI, IIIIS, IIIIII. एतेषां व्यवहारार्थं संज्ञास्तास्ताः शतास्ता अत्यन्तोपयोगाभावात् द्विककलादिशब्दैरेव व्यवहारसिद्धेर्ग्रन्थ विस्तरभयान्नोच्यन्ते। गौरवात् षट्कलस्य *हरि-शशि † सूर्य-शक्र-शेष-अहि-कमल-ब्रह्म ‡ कलि-चन्द्र-ध्रुव-धर्म- || शालि-करसंज्ञाः ॥ अथ गाथाप्रकरणम्। तत्र चतुःपञ्चाशद्भिर्मात्राभि गाथः, सप्तपञ्चाशद्भि गाथा, विपरितार्द्धघटिताभिस्ताभिरेव विगाथः, षष्टिमात्र उद्गाथः, द्विषष्टिमात्रा गाहिनी, सैव विपरीतार्धा सिंहिनी द्विषष्टिमात्रा, चतुःषष्टिमात्राभिः स्कन्धकमिति सप्त भेदाः॥ तत्र यदाऽर्धद्वयेऽपि सप्त सार्धा चतुर्मात्रिका गणाः षष्ठगणास्त्वेककलचतुर्थरूपस्तदा गाहः॥ अत्र उदाहरणम्। चन्दो चन्दणहारो तावअ रूअं पआसन्ति। चण्डेसरस्स कीती जावअ अप्पं न दंसेइ। संस्कृते त्वियमुपगीतिः। आर्येव प्राकृते गाथा उदाहरणं ममैव प्रागुक्तम्। तदुक्तम् 'पढमं वारह मत्ता वीराअट्ठारहेहिं संजुत्ता, जह पढमं तह तीअं दहपञ्चविहूसिआ गाहा'॥ इति। तत्र यदि सप्तविंशति गुरवस्त्रयस्त्र लघव

* हर † सूर ‡ किंचिवल्ल || शाली,चर,प्रा० पि०,

इत्येवं त्रिंशदक्षरा तदा लक्ष्मीनाम्नी। षड़्विंशति गुरवः पञ्च लघव तदा ऋद्धिः। एवमेकगुरुपञ्चाशल्लघुपर्यन्तमेकैकगुरुह्रासे लघुद्वयद्वयवृद्धौ च त्रिंशदक्षरकं भेदमारभ्य षट्पञ्चाशदक्षरभेदपर्यन्तं सप्तविंशति भेदाः। क्रमेण तन्नामानि :—लक्ष्मी-ऋद्धि-बुद्धि-लज्जा-विद्या-क्षमा-गौरी-देही-रात्रि-पूर्णा-छाया-कान्ति-महामाया-कीर्त्ति-सिद्धा-मानी-रामा-गाहिनी-विश्वा-वासिता-शोभा-हरिणी-चक्री-सारसी-कुररी-सिंही-हंसीति (२७)। त्रयोदशलघुपर्यन्तं विप्रा, तत एकविंशतिलघ्वधि क्षत्रिया, ततः सप्तविंशतत्रवधि लघुभि र्वैश्या, ततः सर्वा शूद्रेति गाथाजातिः। गाथान्तर्गतेनैकेन जगणेन कुलीना गाथा भवति, द्वाभ्यां कुलटा, बहुभि र्वेश्या, जगणरहिता रण्डा। तत्रापि या प्रथमादिविषमादिस्थाने जगणयुक्ता सा गुर्विणीति संज्ञिता कर्त्तु र्नायकस्य च दुष्टा भवति। सर्वासां गाथानां प्रथमपादो हंसीवन्मन्थरः पठनीयः, द्वितीयः सिंहविक्रमवदुद्धतः, तृतीयो गजगतिवल्ललितः, चतुर्थः सर्पगतिवच्चञ्चल इति। गाथाद्वितीयार्धं यदि प्रथमं प्रथमञ्च द्वितीयं तदा विगाथः। इयं संस्कृते उद्गीतिः। यथा, परिहर माणिणि माणं पेक्खहि कुसुमाइ णीवस्स। तुम्ह कए खरहिअअ गेण्हइ गुडीआ धणुइ किर कामो॥ तथा द्वयोरप्यर्धयोः त्रिंशन्मात्रा गाथा प्रथमार्धवद् यदि भवति तदोद्गाथः। यथा, सोऊण जस्स णामं अंसुअणआइ सुमहि रहन्ती। भण वीर चेइवइ णो पेच्छामि मुहं कहं जदिच्छं से। इयमेव संस्कृते गीतिः। तथा पूर्वार्धे त्रिंशन्मात्रा गाथावत् उत्तरार्धे एकगुर्वाधिकेऽन द्वात्रिंशत् तदा गाहिनी। अर्धवैपरीत्ये च सिंहिनी। क्रमेणोदाहरणे॥ मुञ्चहि सुन्दरि पाअं अप्पहि हसिऊण सुमुहि खग्गं मे। कप्पिअ मेच्छसरीरं पेच्छइ वअणाइ तुम्ह धुम्म ह वीरो॥ वरिसइ कणअहविट्ठिं तप्पइ भुअणे दिआणिसं जागन्तो। णीसङ्के साहसङ्को णिन्दइ इन्दं अ सूरविम्बं अ॥ एते संस्कृते ललितावल्ग्गीतिसंज्ञे। तथा अर्धद्वयेऽपि चतुर्मात्रिकाष्टगणघटितं स्कन्धकं

* सेतुकावेत्र यथा। जं जं आणेइ गिरिं रइरअचक्कपडिघट्टणसहं हणुमा तं तं लीलाइ णलो वामकरुत्तंभिअं रएइ समुद्दे॥ इदमेव संस्कृते आर्या गीतिः॥ अत्र यदष्टाविंशति र्गुरवः अष्टौ लघवस्तदा नन्दसंज्ञा। तत एकगुरुषड्भिलघुपर्यंतम् एकैकगुरुह्रासे लघुद्वयद्वयवृद्धौ चाष्टविंशति-भेदाः। तेषां क्रमेण संज्ञाः:—नन्द-भद्र-शेष-सारङ्ग-शिव-ब्रह्म-वारण-वरुण-नील-मदन-तालङ्क-शेखर-शर-गगन-शरभ-विमति-क्षीर-नगर-नर-स्निग्ध-स्नेहन-मदकल-लोभ-शुद्ध-सरित्-कुम्भ-कलश-शशधराख्याः। तत्र नन्दोदाहरणम्। चन्दा कुन्दा कासा हारा हंसा तिलोअणा केलासा। जेता जेता तेता सेता कासीस जिणिआ ते रिसि कित्ती। एवमन्येष्वपि भेदेषु ज्ञेयम्। इति गाथाप्रकरणम्॥

अथ दोहा। यस्याः प्रथमतृतीययोः पादयोः प्रथमं षट्कलो गणस्ततश्चतुष्कलस्ततस्त्रिकल इत्येवं त्रयोदश मात्राः, द्वितीयचतुर्थयोः षट्कलचतुष्कलौ समानौ त्रिकलस्थाने एको लघुरितैत्रकादशमात्रा स्तदिदमष्टाचत्वारिंशन्मात्राभि र्दोहाच्छन्दः। यथा, सुरतरुसुरहीपरसमणि ण हि वीरेससमाण। ओ वुण वक्कलकठिणतणुओ पसुओ पाखाण। अत्र द्वाविंशति र्गुरवश्चत्वारो लघवो यत्र तद् भ्रमरम्। तत एकगुरुपर्यन्तमेकैकगुरुह्रासे लघुद्वयद्वयवृद्धौ त्रयोविंशति र्नामानि। यथा, भ्रमर-भ्रामर-शरभ-श्येन-मण्डूक-मर्कट-करभ-नर-मराल-†मधुकल-पयोधर-‡चल-वानर-त्रिकल-कच्छप-मत्स्य-शार्दूल-अहिवर-व्याघ्र-विड़ाल-श्व-उन्दुर-सर्पेति॥ सर्पे अष्टाचत्वारिंशल्लघव एव। तत्र भ्रमरोदाहरणम्। जा अद्धङ्गे पव्वई सीसे गंगा जासु। जो देआणं वल्लहो वन्दे पाअं तासु। तत्रापि द्वादशावधिलघुका विप्रा। ततो द्वाविंशत्यवधिका चत्रिया। द्वात्रिंशदवधिलघुका वैश्या। इतरा शूद्रेति। तत्र यस्याः प्रतिपादं प्रथमे तृतीये च चरणे जगणः सा दुष्टा दोहेति। इति दोहाप्रकरणम्॥

* सेतुबन्धकाव्ये इति रविकरः।

† मदुगलः प्रा० पि०. ‡ चल प्रा० पि०.

अथोत्कृष्टा। प्रथमं चतुष्कलौ द्वौ गणौ ततस्त्रिकल एकः एवमेका-दशमात्रारचितपादषट्कयुक्तोत्कृष्टा। तत्रापि सर्वैं र्लघुभि र्लौहाङ्गिनी नाम। ततश्चतुश्चतु र्गु रुवृद्धौ अष्टाष्टलघुह्रासे दशपर्यन्तं हंसादीनि। लौहा-ङ्गिनी लघवः ६६, हंसी ४ गुरु लघवः ५८, रेखा गु ८ ल ५०, ताल‍ङ्की गु १२ ल ४२, कम्पी गु १६ ल ३४, गम्भीरा गु २० ल २६ काली गु २४ ल १८, कालरुद्राणी गु २८ ल १०, एवमष्टौ भेदाः। तत्र लौहाङ्गिनी यथा, विसुह चलिअ रण अचलु परिहरिअ हअगअवलु। हलहलिअ मलअविवहु जसु जस तिहुअण पिवइ। वरणसिणरवइ लुलिअ सउलु उपरि जस फुलिअ। एवं सर्वेषूह्यमित्युत्कृष्टा॥

अथ रोला। यथेच्छं गुरुलघुभिश्चतुर्विंशतिमात्राः प्रतिचरणं भवन्ति एवं पादचतुष्टययुता रोला। यथा, पअभरदरमइ धरणी तरणि रजधुलिहि ढम्पिअ, कमटपीठ ढरपड़िअ मेरुमन्दरगिरि कम्पिअ। कोहे चलिअ हम्मीरवीर गअजूहजुत्तो, कट्ठे किअउ हाकन्द मुच्छि मेच्छके पुत्तो॥ अत्र एकादश गुरवो द्वौ लघू यदि पादे तदा रोला शुद्धा। प्रतिपादमेकगुरुह्रासे लघुद्वयवृद्धौ च करतालादिसंज्ञा भेदा द्वादश। यथा, कुन्द-करताल-मेघ-तालङ्क-काल-रुद्र-कोकिल-कमल-इन्द्र-शम्भु-चामर-गणेश्वरेति। इतिरोला॥ अथ * गन्धा॥ प्रथमपादे सप्तदशवर्णाः द्वितीयेऽष्टादश मात्रासु न नियमः द्वितीयार्धमपि तादृगेव सा गन्धा। कश्च चलन्ते कुम्म चलइ पुहविअसरण, कुम्म चलन्ते महि चलइ भुअणभअकरणा। महि चलन्ते महिहरअ तहअ सुरगणा, चक्कवइ चलन्ते चलइ चक्क जइ तिहुअण॥ इति गन्धा। अथ चतुष्पदा। चतुर्मात्राः सप्तगणा गुरुश्चेति त्रिंशन्मात्र एकः पादः तादृशा एवान्ये त्रयः एवं विंशत्यधिकशतं मात्रा भवन्ति। एवं † चतुर्भिः पादैरेकः पादस्तादृशैश्चतुर्भिः पादैश्चतुःशतानि अशीत्य-धिकानि मात्राः एतावता चतुष्पदा भवति। तत्र लाघवाय एकपादो-दाहरणम्। जसु सीसहि गङ्गा गोरि अधङ्गा गिम पिन्धिअ फणिहारा,

---

*गन्धाना शा० पि०. † त्रिंशन्मात्रैः षोड़शपादै रिति शा० पि०.

कण्ठे ट्ठिअ वीसा पिन्धन दीसा संतारिअ संसारा, किरणावलिकन्दा वन्दिअ चन्दा णअणहि अणल फुरन्ता, सो मङ्गल दिज्जउ वक्कसुख किज्जउ तुम्ह भवाणीकन्ता॥ एतस्यानंताएव भेदाः। इति चतुष्पदा॥ अथ घात्ता। चतुर्मात्रैः सप्तभि र्गणैस्त्रिभि लघुभिश्चैकः पादः। तत्र प्रथमं दशमात्रासु विरतिः ततोऽष्टसु ततस्त्रयोदशसु एवम्प्रकारकपादचतुष्टयेन घात्ता नाम। यथा, रणु दक्‌ख दक्‌ख हण जिणु कुसुमधणु अन्धअगन्धवि-णासकर,सो रक्‌खउ संकर असुरभयङ्कर गोरिनारि अद्धङ्गधर। इति घात्ता। अथ घात्तानन्दः। षट्‌कल आदौ ततश्चतुष्कलास्त्रयस्ततः पञ्चकलस्ततः षट्‌कलः ततो लघुद्वयम्। एवंप्रकारकपदचतुष्टयेन द्विषष्टिमात्रका घात्तो-नन्दः। एकादशसु (सप्तसु) त्रयोदशसु च यतिः। यथा, जे वन्दिअ सिर-गङ्ग हणिअ अणङ्ग अद्धङ्गे परिकर धवणु। सो जोइजनमित्त हरेउ दुरित्त सङ्कडहर सङ्करचरणु॥ अथ षट्‌पदप्रकरणम्॥ काव्यनाम्नः छन्दसः पादचतुष्टयेन उल्लालनाम्नः पादद्वयेन षट्‌पदं भवति। प्रथमं द्वे मात्रे ततः पञ्च चतुर्मात्रा गणाः ततो द्वे मात्रे इति चतुर्विंशति-मात्राभिः काव्यपदचतुष्टयम्। तत्र एकादशसु त्रयोदशसु च यतिः। उल्लाल-स्याद्ये पादे अष्टाविंशति मात्राः, पञ्चदशसु त्रयोदशसु च यतिः। एवं पदद्वयम् एतादृक् षट्‌पदम्। यथा, पिंधउ दिढ़सन्नाह वाहउप्पर पक्‌खर दइ। बन्धुसमदि रण धसउ सामिहम्मीर वअण लइ। उड्‌डल णभ पह भमउ खग्ग रिउसीस भालउ। पक्‌खर पक्‌खर ठेल्लि-पेल्लि पव्वउ अप्फालउ। हम्मीरकज्जे जजल्ल भण कोहाणल मह-मह जलउ। सुरताणसीस करवाल दइ तेज्जि कलेवर दिउ चलउ॥ प्रकारान्तरमपि षट्‌पदे भवति आदौ षट्‌कलो गण स्तत-श्चत्वारश्चतुःकलास्ततोऽन्ते द्विकलः एवंविधचतुर्भिश्चरणैः षण्णवतिमात्रा भवन्ति। तत्र उल्लालपदद्वयं पूर्ववदेव। उभयथापि द्विपञ्चाशदधिकं शतं मात्राणां षट्‌पदे भवति। अत्रोदाहरणम्। जहा सरअससि-बिम्ब जहा हरहारहंसा ठिअ। जहा फुल्लसिअकमल जहा सिरिखण्ड-

खण्ड दिग्र। जहा गङ्गकल्लोल जहा ए सोभिग्र वप्पइ। जहा कुन्दवर-सुन्दरेण फम्फाइत लुप्पइ। पिग्रपाग्रपसाग्रदिट्ठिपलु पिङ्गल वसइ जहा तहणिजण। वरमन्ति चण्डेसर तह तुम्र कित्ति देक्खु हरिबम्ह भणा॥ काव्यस्वरूपन्तु आदावन्ते च षट्कलः मध्ये त्रयश्चतुःकलास्तृतीयो जो न्लौ वेति इदं स्वतन्त्रस्य काव्यच्छन्दसः करणे। षट्पदे द्वता विधा ज्ञेयाः। काव्यस्य भेदाः पञ्चचत्वारिंशत्। तत्र यत्र पञ्चवति लघूनां न तु गुरुः स शक्रः। तत एकैकगुरुप्रवेशेण लघुद्वयह्रासे च शम्भ्वाद्या अङ्कान्ता भेदा भवन्ति। तथा च अङ्के अष्टौ लघवः प्रतिपादमेकादश लघुप्रकारेण समुदिते चतुश्चत्वारिंशच्च गुरवस्ततो न ह्रासः। यथा, शक्र-शम्भु-सूर-गण्ड-स्कन्ध-विजय-दर्प-ताराङ्क-समर-सिंह-शीर्ष-उत्तेज-फणि-रवः-प्रतिधर्म-मराल-मृगेन्द्र-दण्ड-मर्कट-अनुबन्ध-वासण्ठ-कठ-मयूर-बध-भ्रमर-भिन्न-महाराष्ट्र-बलभद्र-राज-वलित-मयूख-मर्यान-बलिमोह-सहस्राक्ष-बाल-दर्पित-सरभ-दम्भ-उद्दम्भ-वलिताङ्क-तुरग-हार-हरिण-अन्ध-अङ्केति। तत्र शक्रस्योदाहरणम्। जसु कर फणिवइ वलय तरुणिवर तनुमह विलसइ। नयन अनल गल गरल विमल ससहरसिर णिवसइ। सुर-सरि सिरिमह वहइ सअलमणदुरितदलणकर। हसिससहरहर हरउ दुरित तुम्र दिसउ अभअ वर। षट्गणाः शुद्धादौ पङ्क्त्वादयो दोषा ग्रन्थान्तरादवसेयाः, विस्तरभयात्तु न प्रपञ्च्यन्ते। द्वात्रिंशत्तप्रभृवधि काव्यस्य विप्रजातिः, ततश्चत्वारिंशत्तप्रभृवधि क्षत्रियजातिः, ततोऽष्टाचत्वारिंशत्तप्रभृवधि वैश्यः, अवशिष्टः शूद्र इति जातिभेदः। उल्लाललक्षणम् तु त्रयश्चतुःकला आदौ त्रिकलः षट्कलस्ततः चतुष्कलोऽथ त्रिककल उल्लाललक्षणं। तत्र सर्वगुरुः षट्पदो यथा। जाम्रा जाम्रा अद्धङ्के गङ्गा सीसे लोलन्ती, सव्वासा जापूरन्ती सव्वं दुक्खाणं लन्ती। अम्मे आराआहारा दीसा भासा भासन्ता। वेग्राला जासं सङ्गे घट्टे दुट्ठा णाचन्ता। गाचन्ता कान्ता उच्चे ताले भूमी कम्पाणो। जा दिट्ठे मोक्खा पाई सो तुम्भाणं सुक्खं दे॥ अथ षट्पदभेदाः। तत्र काव्ये चतुश्चत्वारिंशद्गुरवः उल्लाले च षड्विंशतिः एवं मिलित्वा सप्तति:

गुरवो द्वादश च लघवो यत्र स यद्यपीत्यक्षरो अजयनामा प्रथमो भेदः, ततः सर्वलघुपर्यन्तमेकैकगुरुह्रासे लघुद्वयप्रक्षेपेण एकैकवर्णवृद्धौ एकसप्तति-रजयाद्या भेदा भवन्ति। यथा, अजय-विजय-बलि-वर्ण-वीर-वैताल-वृह्नल-मर्कट-हरि-हर-ब्रह्म-इन्दु-चन्दन-शुभङ्कर-शाल-सिंह-शार्दूल-कूर्म-कोकिल-खर-कुञ्जर-मदन-मत्स्य-सारङ्ग-शेष-सारस-पयोधर-कुन्द-कमल-वारण-शरभ-जङ्गम-शर-सुशर-समर-सारस-सरस-मेरु-सकल-मृग-सिद्ध-बुद्धि-कलकल-कमलाकर-धवल-चलक-ध्रुव-वलय-किन्नर-शक-जन-मेधाकर-ग्रीष्म-गरुड़-शशि-सूर्य-शल्य-नर-तुरग-मनोहर-गगन-रत्न-नव-हीर-भ्रमर-शेखर-कुसुमाकर—दीप-शङ्ख-वसु-शब्दाः॥ तथा अजये वर्णाः ८२, गुरवः ७० लघवः १२। अन्त्ये शब्दे लघवः १५२। इति षट्पदप्रकरणम्।

प्रतिपादं चत्वारः चतुष्कला गणास्तत्रान्तिमो जगण एव एवं चतुर्भिः पादैश्चतुःषष्टिमात्रं पज्झटिकाच्छन्दः। यथा, जेजे गज्जिअ गउड़ वइ एउ, उट्टल्लउअउज सभअ पराउ। उडविक्कमविक्कमजयिअजूउ, ता-कण परक्कम कोइ ण वुज्झउ। इति पज्झटिका॥ प्रतिपादं षोड़शमात्राः अन्ते च मात्राद्वयं लघुद्वयात्मकं पादे चेत् जगणो न भवति तच्छन्दः अलिल्लिहसंज्ञम्। यथा, अच्छि आसामविदेहा किज्जउ, सुत्थिर डाहर-रज्जा थिप्पि लिउ। कालिञ्जर जिण्हि कित्ती थप्पिअ, धण आरज्जिअ धम्मे अप्पिअ॥ इत्यलिल्लिहः। अनियतगुरुलघुक्रमाः षोड़शमात्राः प्रतिपादं भवन्ति, तच्चतुःषष्टिमात्रं पादाकुलकं। पञ्चदशमात्राभिः प्रथमतृतीय-पञ्चमपादाः पञ्चदशमात्राः, द्वितीयो द्वादशमात्राः, चतुर्थे एकादश मात्राः एवमष्टषष्टिमात्रा भवन्ति। एतदनन्तरं दोहाच्छन्दः समस्तमितेत्रवं नवपदं छन्दो रड्डा नाम। तत्र विषमपादेषु आदौ त्रिकलस्ततस्त्रय-श्चतुष्कलाः, तत्रापि प्रथमेऽन्ते जगणश्चतुर्लघु वा, तृतीयपञ्चमयो र्भगणोऽन्ते द्वितीयपादे सर्वलघ्वन्तास्त्रयश्चतुष्कला वा,चतुर्थे द्वौ चतुष्कलौ ततस्त्रयो लघव इति। तत उक्तलक्षणं दोहाच्छन्दः। यथा, भमइ मअरन्द फुल्लअरविन्द, णवकेसुकाणणपुलिअ। सव्वदेस पिक एउ सुणिअ, सिअलपवण लहु वहइ,

मलयकुहरणउवलि पेल्लिअ। चिन्त मणोभव सर हणइ, दूर दिगन्तर कन्त।
के परि अप्पउ वारिहउ, ए परिमिलिअ दुरन्त॥ एतद्भेदाः सप्त। तत्र (प्रथम-
तृतीयपञ्चमपादेषु चतुर्दशमात्रा कलभी १॥ द्वितीयचतुर्थयोरेकादश
सा नन्दा २॥ प्रथमतृतीयपञ्चमपादेषूनविंशतिः द्वितीयचतुर्थयोरेकादश
सा मोहिनी ३॥) विषमपादेषु पञ्चदश समयोरेकादश सा चारुसेनी। ४।
विषमेषु पञ्चदश समयो द्वादश सा भद्रा ५॥ विषमेषु पञ्चदश द्वितीये
द्वादश चतुर्थे एकादश स राजसेनः। ६। विषमेषु षोडश समयोरेकादश
द्वादश वा सा तालङ्किनीति। ७। इति नवपदप्रकरणम्। अथ पद्मावती।
द्विगुरन्तगुर्वादिगुरुः सर्वलघुरितेरतैः चतुर्मात्रौ गणौ यथासम्भवं गणा-
ष्टकघटितपादचतुष्टया पद्मावती। अत्र जगणो नायकपीडादिदोषदाता
अतश्चण्डाल इतुच्यतेऽतो न शुभः। यथा, भअभञ्जिअ वङ्गा भगगु कलिङ्गा
तेलङ्गा रण मुक्कि चले। मरहट्ठ ढिठालग्गिअ कट्ठा सोरट्ठा भअपअपाअ
पले। चम्पा रणकम्पा पव्वअ कम्पा उत्थाउत्थि जीअ हरे। कासीसरराणा
किअउपआणा विज्जाहर भण मन्तिवरे। इति पद्मावती। पूर्वोक्ताया
दोहाया यदेकमर्धमपरस्यार्धं पूर्वोक्तलक्षणकाव्येन युक्तं तदिदं चतुश्च-
त्वारिंशदधिकशतमात्राभिः शृङ्खलायमकानुप्रासवत् गुणालङ्कारवत् कु-
ण्डलिकाख्यं छन्दः। अत्र चाविरमत्र कुण्डलिकारेण पठनात् कुण्डलि-
केति संज्ञा। यन्मते दोहा द्विपदा तन्मतेनेयं षट्पदा, यन्मते दोहा
चतुष्पदा तन्मते कुण्डलीकाऽष्टापदेति। यथा, ढोल्ला मारिअ ढिल्लिमह
मुच्छिअ मेच्छसरीर। पुर जज्जल्ला मन्तिवर चलिअ वीर हम्मीर। चलिअ
वीर हम्मीर पाअभर मेइणि कम्पइ। दिग मगणह अन्धार धूलि सूरह
रह झम्पइ। दिग मगणह अन्धार आणु खुरसाणक ओल्ला। दमलि
दअसु विपक्ख माह ढिल्ली मह ढोल्ला। इति कुण्डलिका। यत्र प्रति-
पादे विंशत्यक्षराणि पञ्चविंशतिश्च मात्राः. तत्रापि प्रथमश्चतुर्मात्रिको गणः,
अन्ते एको गुरुः, मध्ये यथासुखमिश्रिता गुरुलघवो स मदनात्मकः। यथा,
भञ्जिअ मलअचोलवइ अ चलिअ गञ्जिअ गुज्जरा। मालवराअ मलय-

गिरिअ लुट्टि परिहरि कुञ्जरा । खुरसाणा खलिअ रणमह मंडिअ लङ्घिअ साअरा । हम्मीर ह चलिअ हारव पलिअ रिउगण काअरा ॥ इति मदनाम्तकः ॥ आद्यन्तयोः षट्कलो गणो मध्ये चतुष्कलाश्चत्वारः एवंविधपदद्वयरचिता द्विपदी । आदौ षट्कलस्ततः पञ्च चतुष्कलास्ततो गुरुरिति वा ॥ यथा, दाणव देउ वेविट्ठुअन्तउ गिरिवरसिहर कम्पिउ । हअगअपाअधाअ उट्ठन्तअ धूलिहि गअण झम्पिउ ॥ इति द्विपदी । नव चतुर्लघवस्ततो रगण एवं दशभि र्गणैरेकोनचत्वारिंशदक्षरैरेकचत्वारिंशन्मात्राभिरर्धं यस्याः सा खञ्जा द्वितीयमप्यर्धं तादृक् । यथा, महि ललइ अहि पलइ गिरि चलइ हर खलइ ससि घुमइ अमिअ वमइ भअ जिविअ उट्ठए । पुणु धसइ पुणु खसइ पुणु ललइ पुणु चलइ पुणु घुमइ अमिअ वमइ विविहपरि दिट्ठए । इति खञ्जा । यत्र प्रथमार्धे षट् चतुर्लघवः द्वितीयार्धे सप्त उभयोरप्यन्ते जगणो भवति सा शिखा । यथा, फुलिअमहुभमरवहु रअणिपहुकिरणवहु अवअर वसन्त । मलयगिरि कुसुमधरि पवणवहु सहव कहु सहि भण णिअ ण हु हु कन्त ॥ इति शिखा ॥ आद्यार्धे नव चतुर्लघवस्ततो रगणास्ततो द्वौ गुरू इत्येवं पञ्चचत्वारिंशन्मात्राः गाथोत्तरार्धेन द्वितीयार्धं सैषा माला ॥ यथा, वरिस जल भमइ घण गअणसिअल पवण मणहरण कणअपिजरि णिचइ विज्जुरि फुल्लिआ णीवा । पत्थरवित्थर हिअला पिअला णिअलं ण आवेइ ॥ इति माला । यदि दोहाच्छन्दसि प्रत्यर्धं लघुगुरुलघुद्वयरूपाः पञ्चकला अधिका दीयन्ते, तथा दोहाच्छन्दसो मात्राः ४८ अधिकाश्च १०, एवं अष्टपञ्चाशन्मात्रा भवन्ति तदा चूलिका नाम च्छन्दः ॥ यथा, राआ लुद्धसमाज खल वहुकलिहारिणि सेवक धुत्तउ । जीवण चाहसि सुक्ख जइ परिहर घरजणवहुरणजुत्तउ । इति चूलिका ॥ व्यस्तार्धो दोहैव सोरठा । यथा, सो माणिअ पुणमन्त, जासु भत्त पण्डिअ तनअ । जासु घरिणि गुणमन्ति सो वि पुहवि सगाहणिलअ ॥ इति सोरठा ॥ सगणभगणचतुर्लघवो गणा गुरुश्चैको यत्र प्रतिपदं एकादशाक्षरश्चतुर्दशमात्रकश्च स काहलिः ॥

यथा, उच्चउत्थणअ विमलघरा, तरुणी गेहिणि वित्तअपरा । पुत्त विचक्खण-पुरलमुद्दरा वलिसा संमअसुखहकरा ॥ इति काहलि: । यत्र जगणान्तौ चतुर्मात्रौ प्रतिपादं तन्मधुभारतम् ॥ यथा, जसु चन्द सीस पिन्धन इ दीस सो सम्भु पेउ महासुख देउ ॥ इति मधुभारतम् । यत्र पादे जगणान्ता एकादश मात्रा: स आभीर: । यथा, सुन्दरि गुज्जरणारि लोअण दीह वि-सारि । पीणउत्थनभार लुल्लइ मोतिहार ॥ इत्याभीर: । चत्वारश्चतुर्मात्रास्तत: षण्मात्रस्ततश्चतुष्कलौ गुरुश्चेति द्वात्रिंशन्मात्रा यदोइण्डकाहल: सर्वा अष्टा-त्रात्रा: १२८ । यथा,राअइ भगन्ता दिगन्तलगन्त परिहरि हअगअधररमणी, लोरहिभवसरवर पञ्ञ णिअपरिकर लोटइ पडइ तनु धरणी । पुणु उट्ठइ सम्भरि करदन्तअ्ण लिवालतणअकरकमलधरे, कासीसरराआ खेह लुकाआ कर माआ पुण यप्पि धरे ॥ इति दण्डकाहल: । आदौ गुर्वन्तश्चतुष्कलस्ततो गुर्वन्त: पञ्चकल स्तत एको लघुरित्येवं पादघटितं दीपकम् ॥ यथा, जसु हत्थ करआल विपक्खकुलकाल । सिरसे ह वरछत्त सम्पुस स सिमन्त ॥ इति दीपकम् । यत्रादौ चतुष्कलसगणौ तत: षट्कला गुरुश्चेति षोडशमात्रापाद: सिंहावलोक: । यथा, हणु उज्जरगुज्जरराअदलं दरमल्लिअ वल्लि मरहट्ठवलम् ॥ वलमोलिअ मालअराअकुला कम उज्ज कुञ्जरवि करमफुरो ॥ इत्यलम् ॥

इति श्रीमद्भट्टरामेश्वरसूरिसूनुनारायणभट्टरचितायां वृत्तरत्नाकरव्याख्यायां पञ्चमोऽध्याय: ॥

एवं समादिष्टवृत्तत्रयमभिधायेदानीं तेषामुत्पत्तिप्रदर्शनाय अनुक्ता-नां च वृत्तानां कविप्रयोगेषु दृश्यमानानां सद्भावोपपत्तये प्रस्तारादय: षट् प्र-त्यया: व्याख्यातव्या: । प्रतीयते संख्यादिकमेभिरिति प्रत्यया: । सम्भावि-तेषु वृत्तेषु विश्वासापरपर्यायप्रत्ययख्यापकत्वाद्वा । ते च प्रस्ताराद्या: षट् तदुक्तम् ।

प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया।
सङ्ख्यानमध्वयोगश्च षडेते प्रत्ययाः स्मृताः॥ १॥

तत्र नष्टोद्दिष्टादीनां प्रस्तारज्ञानाधीनत्वात्प्रस्तारं तावदाह।

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः।
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम्॥ २॥

प्रस्तारवृत्तिजातिपादस्थवर्णसंख्याकसर्वगुरौ पादे लिखिते सति तत्राद्यात् प्रथमाद्गुरोरधो लघुं स्थापयेत् तृतीयभेदाद्युपपत्तेः। तं लघुं न्यस्य यथोपरिपंक्तौ तथैवाधस्तनाधस्तनपंक्तौ शेषपादे वर्णसंख्यापूर्त्त्यवधि द्वितीयादिकं गुरुं लघुं वा लिखेत् यत्रोपरिगुरुस्तत्राधस्तादपि गुरु र्यत्रोपरिलघुस्तत्राधस्तादपि लघुरित्यर्थः। भूयः पुनरमुं पूर्वोक्तं विधिं लेखनरूपं कुर्यात् तृतीयादिपंक्तौ गुरुमध्ये आद्यगुरोरधो लघुः शेषं चोपरिवदेवेत्यर्थः। एवं सति तृतीये भेदे आद्यस्थानत्वात्, तत्र किं लेख्यमित्यत आह।

ऊने दद्याद् गुरूनेव

ऊने न्यूने स्थाने गुरूनेव दद्याल्लिखेत्। बहुवचनमुत्तरोत्तरपंक्तावपि न्यूने गुरूणां प्राप्त्यर्थम्। ततश्च भूयः शब्दोऽपि वीप्सार्थे ज्ञेयः। तेन पुनःपुन र्गुर्वपेक्षया आद्यगुरोरधो लघुं लिखित्वा शेषमुपरिवदेव संपाद्य ऊने स्थाने गुरवो देया इत्यर्थः। प्रस्तारकरणेऽवधिमाह।

यावत् सर्वलघु र्भवेत्।
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः॥ ३॥

सर्वलघुपादः प्रस्तारो वा यावद्भवति तावदेव कुर्यात्। प्रस्तार्यन्तेऽनेन छन्दसि छन्दांसि वा। छन्दोविचितिः छन्दःशास्त्रम्। तदुक्तम्। स्थापयेल्लघुमधो गुरोः पुरः स्याद् यथोपरि तथैव पूरयेत्। पश्चिमं च गुरुभिः पुनःपुनः सर्वलघ्ववधिरित्ययं विधिरिति। तदियमुक्तादौ योज्यते। तत्रोक्तायां यथा, ऽ, ।, तस्या द्विकविकल्पत्वात्। अत्युक्तायां यथा, ऽऽ, ।ऽ, ऽ।, ।। (४)। मध्यायां यथा, ऽऽऽ, ।ऽऽ, ऽ।ऽ, ।।ऽ, ऽऽ।, ।ऽ।, ऽ।।, ।।। (८) एते मगणादय एव सिध्यन्ति। चतुरक्षरायां

प्रतिष्ठायां यथा, ऽऽऽऽ, ।ऽऽऽ, ऽ।ऽऽ, ।।ऽऽ, ऽऽ।ऽ, ।ऽ।ऽ, ऽ।।ऽ ।।।ऽ, ।ऽऽ।, ऽऽऽ।, ऽ। ऽ।, ऽऽ।।, ।ऽ।।, ऽ।।।, ।।ऽ।, ।।।। (१६) एव। सर्वेषां समवृत्तानां प्रस्तारे कृते पूर्वपूर्वापेक्षया उत्तरोत्तरस्य द्विगुणा भेदा भवन्ति। अत्र मामक-संग्रहश्लोकः। पादं सर्वगुरुं लिखेत् मुखगुरोश्चाधो लघुं न्यस्य च, चार्यं मूलगुरोः पुन र्लघुमधो शेषं पुनः पूर्ववत्। ऊने न्यस्य गुरूनशेषलघुकं पादं च यावत् पुनः, कार्योऽयं विधिरित्यचीक्लृपदभूं नारायणः प्रस्तृतिम्॥ अर्धसमेषु तु अर्धेनैव पादतां प्रकल्प्य प्रस्तारः कार्यः, पाद इत्यस्योपलक्षण-त्वात्। तदुक्तम्, अर्धसमस्य प्रस्तारेऽर्धप्रस्तार कार्यं इति। तद्यथा, द्व्यक्षरपादे छन्दसि पादद्वयरूपस्यार्धस्य पादताकल्पनया चतुरक्षरपूर्वोक्तप्रस्तारवत् प्रस्तारे द्व्यक्षरच्छन्दसः षोडश भेदाः। तत्र प्रथमः ऽऽऽऽ, षष्ठः। ऽ। ऽ, एकादश ऽ।ऽ।, ।।।। षोड़शानां भेदानां समवृत्तभेदत्वेनार्धसमभेदत्वात् तान् परित्यज्य शुद्धार्धसमप्रस्तारः सिद्धो भवति। तदुक्तम्, प्रस्तुतभेदकारी विकल्पः प्रस्तरक्रमायातोऽपि वर्जनीय इति। व्याख्यायान्तु गणना कार्यैव। अन्यथा नष्टोद्दिष्टाद्यसिद्धेः। ततश्च द्वादश शुद्धार्धसमभेदाः। यथा, ।ऽऽऽ, ऽ।ऽऽ, ।। ऽऽ, ऽऽ। ऽ, ऽ।। ऽ, ।।। ऽ, ऽऽऽ।, ।ऽऽ।, ।। ऽ।, ऽऽ।।, ।ऽ।।, ऽ।।।, एवमन्यत्रापि योज्यम्। विषमाणां प्रस्तारे पादचतुष्टया-त्मकस्य छन्दसः पादस्थानीयत्वं प्रकल्प्य प्रस्तारः कार्यः। उक्तं हि विषमप्रस्तारे पादचतुष्टयस्य प्रस्तारः कार्यं इति। यथा, द्व्यक्षरस्य विषमवृत्तस्य पादकल्पनायां सर्वगुरोः ऽऽऽऽऽऽऽऽ पूर्ववदाद्यगुरोरधो लघुं विन्यस्य यथोपरीति गुरुसप्तकं लिखित्वा भूयः कुर्यादिति द्वितीयप्र-स्ताराद्यगुरोरधो लघुः परतो यथोपरीति कृत्वा ऊने गुरून् दद्यात्। एवं सर्वलघुप्रस्तारं यावत् कृते षट्पञ्चाशदधिकं शतद्वयं भेदाः। तेषां मध्ये पूर्ववत् समार्धसमरूपत्वेन प्रस्तुतविषमप्रस्तारभेदकारित्वात् प्रथमः द्वितीयाच्च सप्तदशः सप्तदशोऽन्त्यं यावद्वर्जनीयाः। ते च यथा, प्रथमः ऽऽऽऽऽऽऽऽ, अष्टादशः ।ऽऽऽ ।ऽऽऽ, पञ्चत्रिंशः ऽ।ऽऽऽ ।ऽऽ, द्वि-पञ्चाशः ।।ऽऽ ।।ऽऽ, एकोनसप्ततिः ऽऽ ।ऽऽऽ ।ऽ, षडशीतिः। ऽ। ऽ।ऽ।ऽ,

त्र्यधिकशतं S ।।SS ।।S, विंशत्यधिकशतं ।।। S।।। S, सप्तत्रिंशदधिकशतं SSS। SSS।, चतुःपञ्चाशदधिकशतं। SS ।। SS ।, एकसप्ततुत्तरशतं S। S। S। S। अष्टाशीत्यधिकशतं ।। S ।।। S ।, पञ्चोत्तरद्विशतं SS ।। SS ।।, द्वाविंशत्युत्तरद्विशतं । S ।।। S ।।, एकोनचत्वारिंशदधिकद्विशतं S ।।। S ।।।, षट्पञ्चाशदधिकद्विशतसंख्या ।।। ।। ।।।—एवं षोड़श। एषां मध्ये प्रथम SSSSSSSS, षष्ठ। S। S। S। S, एकादश S। S। S। S।, षोड़शः ।। ।। ।। ।। समभेदाः। अनेन द्वादशार्धसमभेदाः। शेषाः चत्वारिंशदधिशतद्वयं शुद्धविषमभेदाः। एवं सर्वत्र विषमेषु प्रस्तारभेदः ज्ञेयः। मात्राप्रस्तारे तु उपरिपंक्तौ यथायोग्यं मात्राद्वयद्वयस्थाने एकैकगुरुक्रमेण गुरून् लिखित्वा प्रथमगुरोरधो लघुं लिखित्वा शेषमुपरि पंक्तिवत् कुर्यात्। एवं सत्येका मात्रा न्यूना भवति सा लघोः पूर्वं लघुरूपेण देया। तृतीयपंक्तौ प्रथमगुरो र्लघुं दत्वा शेषमुपरिवल्लिखित्वा न्यूनास्तिस्रो मात्राः ता लघुगुरुरूपेण लघोः पूर्वं देयाः। एवं क्रमेणाद्यगुरोरधो लघौ दत्ते उपरिवच्छेषे लिखिते शेषा मात्रैका चेदाद्यलघोः पूर्वं लघुरूपेण देया। द्वे चेच्छेषे तदा तत एव पूर्वं गुरुरूपेणैव। एवं युग्मा गुरुरूपेणैवेति। तिस्रश्चेत्तदा एको लघुरेको गुरुश्चेति, पञ्च चेत्तदा एको लघु र्द्वौ गुरू चेतेत्यव क्रमेण सर्वलघुप्रस्तारपर्यन्तं लिखेत्। अत्रैवं लिखिते पूर्वोक्तषट्कलत्रयोदशगणप्रस्तारो यथा, SSS, ।। SS, । S । S, S ।। S, ।।।।S, ।SS ।, S । S ।, ।।। S ।, SS ।।, ।। S ।।, । S ।।।, S ।।।।, ।।।।।। (१३)। पञ्चकलस्य सर्वगुरुभेदाभावादादिलघ्वाद्या एव भेदाः। यथा, ।SS, S ।S, ।।।S, SS ।, ।।S।, ।S ।।, S ।।।, ।।।।।, एवमन्यत्रापि। विषमकलप्रस्तारेष्वादौ लघुं दत्वा प्रस्तारः कार्य इति ॥-॥

अथ प्रस्तारशोधनोपयोगि नष्टमाह ॥

नष्टस्य यो भवेदङ्कस्तस्यार्धेऽर्धे समे च लः।
विषमे चैकमाधाय स्यादर्धेऽर्धे गुरु र्भवेत् ॥ ४ ॥ इति।

अङ्क इत्यतः परं तत्रेत्यध्याहार्थम्। ततश्च नष्टस्य वृत्तस्य योऽङ्क स्तत्र समे सति लो लघु र्लेख्यः, तस्य चार्धेऽर्धे कृते अर्धाङ्के समे सति लघुः

विषमे त्वर्धं कर्णाग्रस्त्रैरेकमधिकं चिप्त्वाऽर्धयेत् नष्टस्य अङ्के विषमे सति गुरु र्भवेल्लेख्य इत्यर्थः, तदनन्तरं तस्मिन् विषमे एकमधिकमाधाय संयोज्य योऽङ्को जात स्तस्यार्धे विषमे सति गुरुः समे तु लघुः तस्मि-न्नप्यर्धे विषमे गुरुः समे लघुरित्येवं विवक्षितनष्टवृत्ताक्षरसंख्यापूरणं यावत् कुर्यात्। अर्धेऽर्धे इत्युभयत्र वीप्सया पुनः पुनः करणं सूचितम्। यथा त्र्यक्षरे प्रस्तारे पञ्चमं वृत्तं कीदृगिति प्रश्ने कृते पञ्चमाङ्कस्य विषम-त्वाद् गुरुं विन्यस्य सैकार्धे अङ्कस्य विषमत्वाद् गुरुरेव। पुनः सैकस्यार्धे अङ्कस्य समत्वाल्लघुरिति। यथा, ऽऽ।. सोऽयं पञ्चमस्तगणः। समोदाहरणं यथा, चतुरक्षरप्रस्तारे चतुर्थं वृत्तं कीदृगिति प्रश्ने समत्वाल्लघुस्तदर्धे अङ्के द्व्यङ्के पुन र्लघुः शिष्टेऽर्धितद्व्यङ्के एकस्यासमत्वाद् गुरुः शिष्टैकाङ्के सैकेऽ-र्धिते पुन र्गुरु र्यथा, ।।ऽऽ. एवं सर्वत्र प्रथमे भेदे प्रथमाङ्कस्य विषमत्वात् सै-कार्धतायामपि विषमत्वात्सर्वगुरुता॥ अर्द्धसमानान्तु नष्टे पूर्वोदाहृतद्व्यक्ष-रपादार्धं समप्रस्तारे पञ्चमो भेदः कीदृगिति प्रश्ने पञ्चानां विषमत्वाद्गुरुः सैके-ऽर्धे त्रयाणां विषमत्वात्पुनर्गुरुः सैकेऽर्धे द्वयोः समत्वाल्लघुः द्वयोरर्धे विषमत्वाद्गुरु-रिति सिद्धमर्धम् ऽऽ।ऽ. द्वितीयार्धेऽप्येवमेव। अत्र यदि समार्धसमयोः संश्लिष्टत्वं तदा पञ्चमत्वं, यदा तु युक्तार्धसमगणना तदा प्रथमस्य सर्वगुरोः समत्वात् त्यागे चतुर्थता। नष्टसिद्धिस्तु संवलितसंख्ययैवेत्युक्तं प्राक्, एवं सर्व-त्रापि। विषमाणां नष्टे तु द्व्यक्षरविषमवृत्तस्य चतुर्थो भेदः कीदृगिति प्रश्ने उक्तविधाने ।।ऽऽऽऽऽऽ अयं चतुर्थः। अत्रापि समार्धसमसम्बलनेन चतुर्थता, युक्तविषमभेदेषु तु प्रथमस्य समार्धसमतयासक्तत्वात्तृतीयता। एवं सर्वेषु हि स मविषमेषु योज्यम्। अत्र मदीयः संग्रहश्लोकः। दृष्टाङ्के विषमे समे गुरुलघू युग्मे तथैकाधिका युग्मे द्वे विषमे समे गुरुलघू भूयोऽवशिष्टेऽर्धिते। तद्वत्प्रश्न-विवक्षितान् गुरुलघून् यावद्विदध्यादिदं श्रीरामेश्वरभट्टसूनुरकरोन्नष्टे विधा-नीदृशीम्। अथ मात्रावृत्ते नष्टम्। तत्र लाघवार्थं षष्ठमात्रप्रस्तारे उदाहरणमुच्यते। षण्मात्रप्रस्तारेषु सप्तमस्थाने कीदृशो [गणोऽस्तीति प्रश्ने षडपि कलास्तावत् पृथक् स्थापनीयाः। तत्र प्रथमकलोपर्येकाङ्को देयः, द्वितीय-

कलाया द्व्यङ्क एव, एकाङ्कात् पूर्वं कस्यचिदङ्कस्याभावेनैकीकरणासम्भवात् एककलोपर्यङ्कं द्वितीयकलोपर्यङ्कं चैकीकृत्य त्र्यङ्कं तृतीयकलोपरि, द्व्यङ्क-त्र्यङ्कावेकीकृत्य पञ्चाङ्कं चतुर्थोपरि, त्र्यङ्कपञ्चाङ्कावेकीकृत्याष्टाङ्कं पञ्च-मोपरि, पञ्चाष्टौ चैकीकृत्य त्रयोदशाङ्कं षष्ठोपरि विन्यसेत्। यथा ॥ १ ॥ २ ॥ ३ ॥ ५ ॥ ८ ॥ १३ ॥॥। एवं सर्वत्र पूर्वपूर्वकलाद्वयोपरिस्थाङ्कमेकीकृत्य परस्परं कलासु न्यसेत्। एवं कृते दृष्टाङ्कमन्तिमकलोपर्यङ्के लोपयेत्। अवशिष्टाङ्केऽव्यवहितपूर्वं पूर्वतरं पूर्वतरमेवाङ्कं यथासम्भवं लुम्पेत्। तत्र यस्य यस्याङ्कस्य लोपो भवति तत्तदधस्तनकलास्वग्रिमकलामादाय गुरु-तामेति। एवं यावत् सम्भवं कुर्यात्। प्रस्तुते ष८ सप्ताङ्कं त्रयोदशाङ्के विलोप्या-वशिष्टषडङ्केऽष्टौ न लुप्यन्त इति पञ्च लोपयेत्, अवशिष्टे एकाङ्के त्रयो द्वौ वा न लुप्येरन् इति एकाङ्कस्य लोपे शून्यता। एवं कृते पञ्चैकाङ्कलुप्तत्वात्तद-धस्तने मात्रे चतुर्थप्रथमे पञ्चमद्वितीयमात्रे आदाय गुरुतां गच्छतः। एवं कृते सिद्धः षट्कलः सप्तमप्रस्तारः ऽ।ऽ।. एवं मात्रावृत्तेषु सर्वेषु ज्ञेयम्। बहुग्रन्थवृद्धिप्रसङ्गात् नोदाहृतमस्माभिः। यदाहुः "नष्टे सर्वाः कलाः कार्या अङ्कन्यासस्तु पूर्ववत्। दृष्टोऽङ्कः शेषके लोप्यः परोऽप्यङ्कोऽत्र लुप्यते। यस्य यस्य भवेल्लोपो व्युत्क्रमेण पुनः पुनः। तदधो गुरुता-मेति परया कलया सह" इति। उद्दिष्टस्य रीतेः पूर्वमुक्तत्वात् पूर्ववदिति उद्दिष्टवदित्यर्थः। आर्याया मात्रावृत्तत्वादनया रीत्या नष्टसिद्धावपि तन्मात्रविषयो लघुरूपाय आर्याप्रकरणे प्रसङ्गादस्माभिरुक्तः॥ अथ प्रस्तार-शोधनायोपयुक्तमुद्दिशति।

उद्दिष्टं द्विगुणानाद्यादुपर्यङ्कान् समालिखेत्।
लघुस्था ये च तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत्॥ ५ ॥ इति।

आद्यादक्षरादारभ्योपरि आद्यादेकाङ्कादारभ्य द्विगुणान् द्विगुणानङ्कानु-त्तरोत्तरं लिखेत्। तत्र लेखने कृते सति लघुलेखोपरिस्था येऽङ्कास्तैर्मिश्रितै-र्यथास्थानं योजितैरेकाधिकेन सहितैरुद्दिष्टं भवेदिति। आद्यद्विगुणशब्दयोरा-वृत्त्या व्यवहितान्वयेन च व्याख्येयम्। उपरीत्युपलक्षणमधो लिखनेऽप्यक्षतेः,

१ २ ४
यथा, त्र्यक्षरे प्रस्तारेऽन्त्यगुरु र्भेदः कतिपय इति प्रश्ने न्यासः । । ऽ. अत्र
लघुस्थैकाङ्कद्व्यङ्कमेलने त्रय एकसहितांश्चत्वारो भवन्ति ततश्चतुर्थभेदं कथयेत्।

१ २ ४ ८
एवं चतुरक्षरे आद्यन्तगुरुः कतिपय इति प्रश्नेन्यासः ऽ।।ऽ. अत्र लघु-
स्थाभ्यां द्व्यङ्कचतुरङ्काभ्यां सैकाभ्यां सप्त भवन्ति, ततः सप्तमोऽयं भेदः।
एवं सर्वत्र। अर्धसमेऽपि चतुरक्षरार्धे ऽऽ।ऽ अयं प्रस्तारः किंसङ्ख्याक इति

१ २ ४ ८
प्रश्ने न्यासः, ऽऽ।ऽ लघुस्थे चतुरङ्के सैके पञ्चमो भेदः समार्धसमसंख्यातायां,
युग्मार्धसमेषु पूर्वन्यायेन चतुर्थः। एवं सर्वत्र। विषमेष्वपि द्व्यक्षरपादकविषमवृत्ते

१ २ ४ ८ १६ ३२ ६४ १२८
॥ऽऽऽऽऽऽ अयं भेदः कतम इति प्रश्ने न्यासः यथा, ।।ऽऽऽऽऽऽ अत्र
लघुस्थानैकद्व्यङ्कौ सैकौ चत्वारस्तावत्सङ्ख्याकं समार्धसममेलनेन जानी-
यात्, युग्मविषमे तृतीयम्। एवं सर्वेषु विषमेषु ज्ञेयम्॥ अत्र संग्रहश्लोकः॥
प्रथमात् द्विगुणानङ्कान् प्रस्ताराद्यादुपर्यधो वाऽस्येत्। लघुगैरङ्कैः सैकै
र्मिलितैरुद्दिष्टमुद्दिष्टम्॥ इत्युद्दिष्टे प्रकारान्तरमुक्तम्॥ यद् वृत्तं
जिज्ञासेत्तत्क्रमौ प्रस्तार्य तन्मध्यस्थलघुषु योऽन्त्यो लघुस्तदुपर्यधो वा एकाङ्कं
लिखित्वा तत्रैव तं द्विगुणयेत्। ततस्तत्पूर्वस्मिन् गुरौ लघौ वा तमङ्कं
द्विगुणितं कृत्वा पूर्ववत् न्यसेत्। यदा त्वेवंप्रकारे क्रियमाणे गुरुमापद्यते
सङ्ख्या तदा तन्मध्ये एकं त्यक्त्वा पुनरुत्तरोत्तरं द्विगुणितं कृत्वा गुरुस्थाने एकं
त्यक्त्वा पुनर्द्विगुणनादिक्रमेण यावत् प्रस्तारपूर्तिं कुर्यात् एवं कृते या संख्या
सम्पद्यते तावतिथं तद्वृत्तं जानीयात्। यथा चतुरक्षरे गुरुलघू द्वौ गुरू चेति
वृत्तं कतिथमिति प्रश्ने न्यासः ऽ।ऽऽ अत्र लघुषः संख्याङ्कं द्विगुणयेत् तस्य
पूर्वस्माद्गुरोरधो द्विगुणितं चतुरङ्कं विलिख्य गुरुस्थसंख्यात्वादेकं जह्यात्।
अवशिष्टत्र्यकस्तावतिथं वृत्तमिति। अत्र मात्रावृत्ते उद्दिष्टम्। उद्दिष्टवृत्त-
प्रस्तारं कृत्वा प्रथमकलायां प्रथमाङ्कं दद्यात्, द्वितीयकलायां नष्टन्यायेन
द्व्यङ्कं, ततस्तृतीयकलायां एकद्व्यङ्कौ मेलयित्वा त्र्यङ्कं, चतुर्थ्यां द्वित्र्यङ्कं

मेलयित्वा पञ्चाङ्कमित्येवं पूर्वपूर्वाङ्कद्वयमेलनं कृत्वोत्तरोत्तरकलायां न्यसेत् नष्टवत् । गुरौ तु मात्राद्वयस्य वर्तमानत्वाद्ङ्कासङ्करार्थमेकोऽङ्क उपरि देयो द्वितीयस्त्वध इति विशेषः । एवमङ्केषु स्थापितेषु अन्त्यकलायां योऽङ्कस्तन्मध्ये गुरुशिरसि स्थिता येऽङ्कास्तानेकीकृत्य पातयेत्, अवशिष्टाङ्कसंख्यां पृष्टवृत्तस्य जानीयात् । यथा, आद्यन्तगुरुः षट्कलप्रस्तारः कतिपय इति पृष्टे न्यासः

१ २ ५ ८
ऽ । । ऽ अत्र गुरुशिरसि एकाष्टाङ्कौ मिलितौ नव तेऽन्त्यकलास्थ-
२ १३

त्रयोदशस्वपनेयाः, अवशिष्टश्चत्वारः । स संख्योद्दिष्टप्रस्तारस्य । एवं मात्राष्टमेष्वपि ज्ञेयम् । तदुक्तं "मात्रायां प्रथमं समोऽङ्क उपरि स्थाप्यो युगायां द्वयं संयुक्तैरेकयुगौ त्रयं च त्रिकलामूर्ध्नि द्वयेन त्रयम् ॥ एकीकृत्य च पञ्चकं जलनिधावेवं कृते लुप्यते शिष्टे तद्गुरुमूर्धकाङ्क इह चेद् उद्दिष्टबोधस्तदा ॥" इति । आर्यासु तु तत्प्रकारान्तरमपि तत्प्रकरण एवाभ्यधायि । अथोक्तादिषु सर्वगुर्वेकलघुद्विलघुत्रिलघ्वादिपादकवृत्तकथनद्वारा प्रस्तारबोधनायैकद्व्यादिलगक्रियामाह ।

वर्णान् वृत्तभवान् सैकानौत्तराधर्यतः स्थितान् ।
एकादिक्रमतश्चैतानुपर्युपरि निक्षिपेत् ॥ ६ ॥
उपान्त्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः ।
उपर्याद्याद् गुरोरेकमेकद्व्यादिलगक्रिया ॥ ७ ॥

उक्तादिवृत्तनिष्ठान् वर्णान् वर्णसंख्याकानङ्कान् सैकानेकेनाधिकेन सहितानौत्तराधर्यत उत्तराधरभावेन स्थितान् कुर्यादित्यध्याहारः । औत्तराधर्यत इति गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ब्राह्मणादित्वाद्भावे ष्यञ् ततस्तसिः । एतान् पूर्वस्थापितानङ्कानेकद्वित्र्यादिक्रमेणोपर्युपर्यङ्के निक्षिपेत् मेलयेत् । मेल्यमानाङ्कसमसंख्याया उपरि क्षेपो मेलनं न तु तस्यैव स्वरूपतः तत्स्थाने शून्यताप्रसक्त्या द्वितीयादिमेलनाद्यन्त्रभावापत्तेः । अधस्तनमेकाङ्कं तदुपर्यङ्के मेलयित्वा द्व्यङ्कं कुर्यात्, तं तृतीयेकाङ्के संयोज्य त्र्यङ्कं कुर्यादित्येवमुत्तरोत्तरं कुर्यादित्यर्थः,

उपान्त्यस्याद्यन्तमेलने प्रसक्तेऽपवादमाह उपान्त्यत इति। उपान्त्यपर्यन्त-मेलनं कृत्वा तमन्त्येऽमेलयित्वोर्ध्वप्रत्याहत्तैकैकं त्यजन् निवर्त्तेत। विरमेत्। अन्त्यश्च प्रथममेलने सर्वोपरितनः, द्वितीयमेलनावृत्तौ तदधोभावी द्वितीयः तृतीयावृत्तौ तदधोभावी तृतीय इत्येवमुत्तरोत्तरो ज्ञेयः। उपान्त्यश्चान्त्या-धोभावी प्रतिमेलनावृत्तकमेकं त्यक्ताऽधस्तनान् मेलयेदिति भावार्थः। एकैकमिति वीप्सया सर्वाधस्तनाङ्कपर्यन्तं पुनः पुनर्मेलनावृत्तिः कार्येत्य-सूसुचत्। सिद्धमाह उपरीति। एवं कृते आद्यात् प्रथमाद्गुरोः सर्वगुरोर्भेदादुपर्यनन्तरमेकद्वित्र्यादीनां लघूनां क्रिया ज्ञेयेति शेषः। प्रथममेकः सर्वगुरुः तदधस्तनाङ्कसंख्य एकलघुस्तदधोऽङ्कसंख्या द्विलघव-चतुर्थाङ्कसंख्यास्त्रिलघवः एवमधोभाव्यङ्कसंख्याश्चतुर्लघ्वादिभेदा ज्ञेया इत्यर्थः। एवं प्रथमः सर्वगुरुः, द्वितीयाङ्के एकगुरवः, तृतीयाङ्के द्विगुरवः, चतु-र्थाङ्के त्रिगुरव इत्यादिप्रकारेण गुरुक्रिया। अत्र त्र्यक्षरे उदाहरणं १. १. १.१. एवं सैकान् वृत्तवर्णसंख्यानेकाङ्कान् न्यसेत् चतुरक्षरे च यथा, १.१.१.१.१. ततोऽधस्तनमेकाङ्कं तदुपरिस्थैकाङ्के संयोज्य द्व्यङ्कं कुर्यात्। यथा त्र्यक्षरे १.१.२.१. चतुरक्षरे च यथा, १.१.१.२.१ द्वितीयं तृतीये मेलयेत्, आद्ये यथा, १.३.२.१. द्वितीये यथा, १.१.३.२.१। तृतीयं चतुर्थे मेलयेत् चतुर-क्षरोदाहरणे १.४.३.२.१। त्र्यक्षरे तु न मेलयेत् उपान्त्यतो निवर्त्ततेत्युक्तेः। पुनस्त्र्यक्षरेऽधस्तनं द्वितीये मेलयेत् यथा, १.३.३.१. त्र्यक्षरे एतावतैव सिद्धिः, चतुरक्षरे तु अधस्तनं द्वितीये मेलयेत् यथा, १.३.३.४.१. द्वितीयं तृतीये यथा, १.४.६.४.१. ततो मेलनं नास्ति, एवं त्र्यक्षरे एकः सर्वगुरुर्भेदः त्रय एकलघवस्त्रयो द्विलघवः एकः सर्वलघु-रिति गुरुक्रियायां तु एकः सर्वगुरुस्त्रय एकगुरवः त्रयो द्विगुरवः एकः सर्वल-घुरिति सिद्धम्। चतुरक्षरे एकः सर्वगुरुः ऽऽऽऽ, चत्वार एकलघवः- ।ऽऽऽ (१) ऽ।ऽऽ (२) ऽऽ।ऽ (३) ऽऽऽ। (४) षट् द्विलघवः ।।ऽऽ, (१) ।ऽ।ऽ (२) ऽ।।ऽ (३) ।ऽऽ।, (४) ऽ।ऽ। (५) ऽऽ।। (६) चत्वारस्त्रि-लघवः, ।।।ऽ (१) ऽ।।। (२) ।ऽ।।, (३) ।।ऽ।, (४) एकः सर्वलघु ।।।। भेदः॥

एवं गुरुभेदा अपि। एवं सर्वत्र। अर्धसमे तु विशेषः। द्व्यक्षरार्धसमानां षोडश भेदाः पूर्वोक्तरीत्या तन्मध्ये प्रथमषष्ठैकादशषोडशांश्चतुरो भेदान् त्याजयेत्। यथा, चतुरक्षरप्रस्तारे एकद्व्यादिलगक्रियायां कृतायां प्रथमान्त्यौ त्याज्यौ समत्वात्, षष्ठैकादशौ द्विलघुत्ववृत्तसंख्याबोधके षडङ्के त्याज्यौ। एवं कृते न्यासः ४ ४ ४ ततश्चत्वार्येकलघूनि, चत्वारि द्विलघूनि, चत्वारि त्रिलघूनि वृत्तानि इति द्व्यक्षरार्धसमभेदा द्वादश। एवमन्यत्रापि एकद्व्यादिलघुकान् समभेदान् एकद्व्यादिलघुकवृत्तसंख्याबोधकाङ्के पातयित्वा आद्यान्त्यौ च भेदौ त्यक्त्वाऽवशिष्टाङ्कैः एकद्व्यादिलगक्रियार्धसमेषूह्या। विषमेषु तु द्व्यक्षरपादस्य कथ्यते। अष्टाक्षरजातेस्तावदेव लगक्रियायां पूर्वोक्तरीत्या वृत्तायां न्यासः। १। ८। २८। ५६। ७०। ५६। २८। ८। १। अत्र समार्धसमरूपत्वात्प्रस्तारकरणोक्तप्रकारेण षोडश भेदाः यथास्थानं पात्याः। यथा एकलघवो ज्ञेयेषु न सन्ति, द्विलघवश्चत्वारस्तदीयेऽष्टा विंशत्यङ्के ज्ञेयाः, त्रिलघवो ज्ञेयेषु न सन्त्येव चतुर्लघवः षट्कं सप्तत्यङ्केषु ज्ञेयाः, पञ्चलघवस्तु न सन्त्येव, षट्लघवश्चत्वारोऽष्टाविंशत्यङ्के ज्ञेयाः सप्तलघवो न सन्तीति। आद्यन्तौ चैकाङ्कौ त्याज्यौ। एवं कृते द्व्यक्षरविषमस्य एकद्व्यादिलगक्रियाङ्कन्यासः ८।२४।५६।६४।५६।२४।८। अत्राष्टावेकलघवश्चतुर्विंशतिः द्विलघव इत्यादि पूर्ववत् कथनीयम्। एवमन्येष्वपि विषमेष्वपि ज्ञेयम्। संग्रहश्लोकः "छन्दोवर्णमितानुपर्यधरगान् सैकान् मुखाङ्कास्त्विवेदैकैकं शिरसि त्यजन्नधरगानूर्ध्वेषु संयोजयेत्। भेदः सर्वगुरुर्मुखे तदनु चैकद्व्यादिलघ्वन्विता चान्ते सर्वलघुक्रिया लघुगतैवं स्याद् गुरूणामपि॥" भास्कराचार्यैस्तु लीलावत्यां लघुगुरुक्रियायां प्रकारान्तरमभ्यधायि॥ तदुच्यते।—वृत्तपादाक्षरसंख्याकानेकाद्यङ्कानुपरि व्युत्क्रमेण विन्यस्य तदधस्तानेव क्रमेण न्यसेत्। ततोऽधस्तनेन स्वोपरिस्थो भाज्यः, भागेन लब्धेन तदग्रिमो गुण्यः तदधस्तनेन भाज्यः, लब्धेनाग्रिमं गुणयेत् तदधस्तेन भागं हरेत्, इत्येवं यावदङ्कसमाप्ति कार्यं। लब्धाङ्काश्च क्रमेण स्थाप्याः। एवं कृते लब्धाङ्केषु प्रथमेनैकगुरवो ज्ञेयाः, द्वितीयेन द्विगुरव

६.५.४.३.२.१.
इतयादि ज्ञेयम् । इदं षड़क्षरपादे गायत्रीछन्दसि योज्यते न्यासः । १.२.३.४.५.६.
अन्त्येकेन षस्यां भागे लब्धाः षट, षड्भिः पञ्चसु गुणितेषु ३० द्वाभ्यां भक्ते लब्धः १५, एतैश्चतुर्षु गुणितेषु ६० त्रिभि र्भागे लब्धं २०, एभिस्त्रिषु गुणितेषु ६० चतुर्भि र्भागे लब्धं १५, एतैर्द्वयो र्गुणनेन ३० पञ्चभि र्भागे लब्धं ६, एतैरेकस्मिन् गुणितं षड़ेव षड्भि र्भागे लब्धं १, एतेषां क्रमेण विभक्तानां न्यासः ६।१५।२०। १५।६।१॥ एकगुरवः ६, द्विगुरवः १५, त्रिगुरवः २०, चतुर्गुरवः १५, पञ्चगुरव ६, षट् सर्वगुरुः सर्वलघुरेकः स्वतः सिद्ध एव । एवमन्यत्रापि योज्यम् । तदाह लीलावतीकाराः “ एकाद्येकोत्तरा अङ्का व्यस्ता भाज्याः क्रमस्थितैः । परः पूर्वेण संगुण्यस्तत्परस्तत्परेण च ॥ एकद्वित्र्यादिभेदा स्युरिदं साधारणं स्मृतम् । छन्दश्चित्युत्तरे छन्दस्युपयोगोऽस्ति तद्विदाम् ॥” इति । अथैकद्व्यादिलघुगुरुक्रियासिद्ध्यर्थमेव सूत्रकारोक्तो मेरुप्रस्तारः ।

तत्र प्रथममेकं चतुरस्रं कोष्ठं　१　लिखेत् । तदध उभयतोऽर्धनिष्क्रान्तं
कोष्ठद्वयम् । तदधस्तथैव त्रयम्,　१ १　तदधस्तथैव चतुष्टयमित्येवं षड़्-
विंशतिकोष्ठलेखनं यावत् का-　१ २ १　र्यम् । उपरि कोष्ठे एकाङ्को देयः ।
तथा प्रतिपंक्ति आद्यन्त-　१ ३ ३ १　कोष्ठेषु एकाङ्क एव, तृतीय-
पंक्तौ मध्यमकोष्ठे शून्ये　१ ४ ६ ४ १　तदुपरिगतकोष्ठद्वयगतौ एका-
ङ्कौ एकीकृत्य द्व्यङ्कं　१ ५ १० १० ५ १　न्यसेत्, एवं चतुर्थपंक्तौ
मध्यकोष्ठयो रुपरि-　१ ६ १५ २० १५ ६ १　गतकोष्ठद्वयाङ्कम् एकी
कृत्य त्र्यङ्कौ, एवं　१ ७ २१ ३५ ३५ २१ ७ १　सर्वत्रोपरितनकोष्ठद्व-
याङ्कमेकीकृत्वा-　१ ८ २८ ५६ ७० ५६ २८ ८ १　धस्तनकोष्ठे दद्यात् ।
एवं षड़्विंश　१ ९ ३६ ८४ १२६ १२६ ८४ ३६ ९ १　तिकोष्ठकपंक्ति
यावत्　१ १० ४५ १२० २१० २५२ २१० १२० ४५ १० १　कार्यम् ।
१ ११ ५५ १६५ ३३० ४६२ ४६२ ३३० १६५ ५५ ११ १
१ १२ ६६ २२० ४९५ ७९२ ९२४ ७९२ ४९५ २२० ६६ १२ १

(एवम् यावत् २६ पङ्क्ति पूरणीयम् ।)

तदुक्तम् "आदावेकं लिखेत् कोष्ठं तदधो द्वे च संलिखेत्। तदधस्त्रीणि कोष्ठानि एवं रूपेण वर्धयेत्॥ आदावेकं लिखेत् कोष्ठमेकं मध्यं च पूरयेत्। लेख्यकोष्ठोपरिप्राप्तै रग्रिमाङ्केन संयुतैः॥" इति। अत्रोद्धारप्रकारोऽयं मेरोः। अत्र द्विकोष्ठायां द्वितीयपंक्तौ एकाक्षरपादाया उक्ताया लगक्रिया। तृतीयायां द्वितीयपंक्तौ अत्युक्ताया एव। इत्येवं क्रमेण षड्विंशति-जातीनां विशेषनिवेशः। स चैकाङ्कोपरिगतप्रतिपंक्तिगद्वितीयकोष्ठस्था-ङ्केन ज्ञेयः। तत्र द्वितीयपंक्तौ एकं सर्वलघु एकं सर्वगुर्वुक्तायाम्। तृतीयपंक्ता-वेकं सर्वगुरु द्वे एकलघुनी एकं सर्वलघ्वित्यत्युक्तायाम्। चतुर्थ-पंक्तावेकं सर्वगुरु त्रीण्येकलघूनि त्रीणि द्विलघूनि एकं सर्वलघ्विति-प्रकारेण एकद्वित्र्यादिलघुगुरुक्रिया सर्वेषु ज्ञेयेति सूचिमेरुप्रस्तारः। गुरुलघुसंख्यासूचकत्वात् सूचिः, मेरुसंस्थानत्वाच्च मेरुरिति। अथ प्रस्तारे कृते सर्वगुरुः कुत्र स्थानेऽस्ति तदपेक्षयैकन्यूनगुरुः कुत्रास्ति ततोऽप्येकन्यूनगुरुः कुत्रास्ति इत्येवं प्रकारे प्रश्ने तत्स्थानज्ञानार्थं पताकाप्रस्ताराः कथ्यन्ते, यत्संख्याक्षरप्रस्तारे प्रश्नस्तदक्षरसंख्याकान् कोष्ठानेकाधिकान् लिखित्वान्तेषु द्विष्ठवदेकाङ्कादारभ्योत्तरोत्तरद्विगुणा अङ्का देयाः। ततः प्रथमाङ्केन द्व्यादीनां संयोजनं कृत्वा द्व्यङ्कादधः कोष्ठ-कान् कृत्वा तेषु संयुक्ताङ्कान् लिखेत्। अन्तिकेन प्रथमाङ्को न योज्यः, तावत्संख्यस्य तस्य वृत्तस्याभावात्। ततो द्वितीयाङ्कं तृतीयकोष्ठाङ्के-षपान्त्यपर्यन्तैः संयोज्य तृतीयकोष्ठाधः कोष्ठकान् कृत्वा तेषु लिखेत्। द्वितीयाङ्ककोष्ठाधःस्थैरप्यङ्कैस्तृतीयकोष्ठस्थितचतुरङ्कं संयोज्य तस्यामेव पंक्तावधो लिखेत्, एवं चतुरङ्कमष्टादिभिः संयोज्याष्टमाङ्कोऽधो लिखेत्, तदधोऽपि चतुरङ्काधः पंक्तिस्थैरष्टमाङ्कं संयोज्य लिखेत्, एवं सर्वत्र यावद-ङ्कसमाप्ति लेख्यम्। एवं क्रियमाणे यत्र प्रस्तारसंख्याधिकसंख्यापद्यते सा न लेख्या॥ एकत्र लिखिता चापरत्र न लिखितव्या किन्तु तदग्रिम-संख्यायोगस्तदधः संख्यायोगो वा कार्यः। एवं सर्वत्र। तथा च प्रथमस्थाने सर्वगुरुः द्वितीयपंक्तिस्थेषु द्वितीयादिस्थानेषु विवक्षितसर्वगुरुमध्ये एकं

नूयनं कृत्वा तावद्गुरुकभेदस्थानानि। एवं तृतीयादिपंक्तिषु एकैक-
गुरुनूयनप्रस्तारस्थानानि। यद्वा प्रथमः सर्वगुरुः द्वितीयपंक्तावेकलघु-
स्थानानि, तृतीयपंक्तौ द्विलघुस्थानानीत्यादि ज्ञेयम्। तदुक्तं "एको द्वावथ
चत्वारस्ततोऽष्टाविति वर्धनम्। पूर्वं परेण संयोज्य तदधो लेखयेद् बुधः॥
अन्तिमाङ्कावधिं नैव लङ्घयेदत्र कुत्रचित्। एकत्र लिखितं प्राज्ञः पुन-
रन्यत्र नो लिखेत्॥" अत्रोदाहरणमेकाक्षरे १। २ अस्य द्विविकल्पत्वादेक-
स्थानस्य एकगुरुः द्वितीयस्य एकलघुरिति। एतावतैव सिद्धिः। द्व्यक्षरे
यथा, १.२.४. अत्रैकाङ्कद्व्यङ्कयोः संयोजने त्र्यङ्को द्व्यङ्काधो लेख्यः, तस्य
चतुर्विकल्पत्वात् तावतैव सिद्धिः। प्रथमस्थानस्य एकः सर्वगुरुः, द्वितीय-
तृतीयस्थानस्थौ एकगुरु एकलघु वा, चतुर्थस्थानस्थः सर्वलघुरिति त्र्यक्षरे
यथा, १. २. ४. ८. अत्र पञ्चाङ्कस्य चतुरङ्कयो-
जनं न कार्यं, ३. ६. नवमभेदाभावात्। तेन त्र्यङ्कस्य चतु-
रङ्कस्य संबन्धे ५. ७. सप्त षडधो निवेश्या इति।

चतुरक्षरे पताका यथा।

अत्रैकं द्वाभ्यां १ २ ४ ८ १६ सह त्रयं
द्व्यङ्काधः, एकं चतु- ३ ६ १२ र्भिः सह पञ्च
त्र्यङ्काधः, एकाष्टयोगे नव ५ १० १४ पञ्चाधः, द्विचतुर्योगे
षट् चतुरधः, द्व्यष्टयोगे दश ९ ७ १५ षडधः, द्विषोडशयोगो
न कार्यः। त्रिचतुर्योगे सप्त दशाधः ११ पञ्चचतुर्योगे नव एकत्र लि-
खितत्वान्न लेख्याः, त्र्यष्टयोगे १३ एकादश सप्ताधः, त्रिषो-
डशयोगो न कार्यः। पञ्चाष्टयोगे त्रयोदश एका-दशाधः, चतुरष्टयोगे
द्वादशाष्टाधः, चतःषोडशयोगो न कार्यः, षडष्टयोगे चतुर्दश द्वादशाधः,
दशाष्टयोगो न, सप्ताष्टयोगे पञ्चदश चतुर्दशाधः। अत्र प्रथमस्थाने सर्वगुरुः,
द्वित्रिपञ्चनवस्थाने त्रिगुरवः एकलघवो वा, चतुःषड्दशसप्तैकादशत्रयोदशसु
स्थानेषु द्विगुरवो द्विलघवो वा, अष्टद्वादशचतुर्दशपञ्चदशस्थानेषु एकगुरुस्त्रिल-
घवो वा षोडशस्थाने सर्वलघुरिति योजना।

पञ्चाक्षरपताका यथा,—

१	२	४	८	१६	३२
	३	६	१२	२४	
	५	१०	२०	२८	
	९	१८	१४	३०	
	१७	७	२२	३१	
		११	२६		
		१९	१५		
		१३	२३		
		२१	२७		
		२५	२९		

षडक्षरपताका यथा,—

१	२	४	८	१६	३२	६४
	३	६	१२	२४	४८	
	५	१०	२०	४०	५६	
	९	१८	३६	२८	६०	
	१७	३४	१४	४४	६२	
	३३	७	२२	५२	६३	
		११	३८	३०		
		१९	२६	४६		
		३५	४२	५४		
		१३	५०	५८		
		२१	१५	३१		
		३७	२३	४७		
		२५	३९	५५		
		४१	२७	५९		
		४९	४३	६१		
			५१			
			२९			
			५३			
			४५			
			५७			

अनयोरेकद्व्यादिगुरुस्थानं पूर्ववदेव वक्तव्यम् इति पताकोदावनिका ।

अथ मात्रामेरुप्रस्तारः।

तत्रैककलद्विकलत्रिकलादि- १ षु कति सर्वगुरवः कति चैक-
गुर्वादय इति बुभुत्सायां १ १ तद्बोधार्थं तत् प्रस्तावः
यथा, उपर्येककोष्ठं लिखि- २ १ त्वा तदधः कोष्ठद्वययुक्ति-
द्वयं तदधः कोष्ठत्रय- १ ३ १ युतं पंक्तिद्वयं ततः
कोष्ठचतुष्टययुतं पंक्ति- ३ ४ १ द्वयं इत्येवं रूपेण
यावदिच्छयैकैकं को- १ ६ ५ १ ष्ठं वर्धयित्वा पं-
क्तिद्वयं लेख्यम्। ४ १० ६ १ एवं कृते उपरि
कोष्ठके द्वयं एका- १ १० १५ ७ १ ङ्को देयः, स-
र्वपंक्त्यन्त्यको- ५ २० २१ ८ १ ष्ठे च स एव
देयः, पं- १ १५ ३५ २८ ९ १ क्त्यादि
कोष्ठेषु ६ ३५ ५६ ३६ १० १ एकान्तरेण
द्व्या १ २१ ७० ८४ ४५ ११ १ द-
यो- ७ ५६ १२६ १२० ५५ १२ १ ऽङ्का
१ २८ १२६ २१० १६५ ६६ १३ १
८ ८४ २५२ ३३० २२० ७८ १४ १

त्र्यङ्का देयाः यथा प्रथमपंक्तिप्रथमकोष्ठे प्रथमाङ्कः द्वितीयपंक्त्याद्यकोष्ठे द्वितीयाङ्कः तृतीयपंक्त्यादेत्र एकाङ्कः चतुर्थपंक्त्यादेत्र त्र्यङ्कः तत एकः ततश्चतुष्टयमिति क्रमेणाद्यकोष्ठपूरणे सतीति, एवमाद्यन्तकोष्ठपूरणे कृते समानकोष्ठद्वयमध्ये उपरि पंक्तिमध्यस्थितशून्यकोष्ठेषु पूरणीयकोष्ठोपरिस्थकोष्ठद्वयाद्यकोष्ठाङ्केन तदुपरिस्थितकोष्ठाग्रिमकोष्ठाङ्कमेकीकृत्य योऽङ्कस्तं दद्यात्। द्वितीयपंक्तिमध्यस्थकोष्ठे तु पूरणीयकोष्ठोपरिस्थकोष्ठाङ्केन तदुपरिस्थितकोष्ठद्वयमध्येऽन्त्यकोष्ठाङ्कमेकीकृत्य दद्यात्। एवं कोष्ठपूरणे कृते प्रथमकोष्ठे एककलस्य न्यासः, द्वितीयपंक्तौ द्विकलस्य, तृतीयपंक्तौ त्रिकलस्य, चतुर्थ्यां चतुष्कलस्य, पञ्चम्यां पञ्चकलस्येत्येवं न्यासः। तत्रैककले एक एव सर्वलघुरेकलघुरूपः, द्विकले एकः सर्वगुरुरेकगुरुरूपः एकः सर्व-

लघु द्विलघुरूपः, त्रिकले सर्वगुर्वभावात् द्वौ लघू एकगुरुः एकः सर्वलघुः, चतुष्कले सर्वगुर्वात्मक एकः एकगुर्वात्मकं त्रयं सर्वलघुरेकः, पञ्चकले सर्व-गुर्वभावात् द्विगुर्वात्मकं त्रयं एकगुर्वात्मकं चतुष्कं सर्वलघुरेकः, षष्ठ्यां षट्कलेषु एकः सर्वगुरुः षट् द्विगुरवः पञ्चैकगुरवः, एकः सर्वलघुरि-त्येवं ज्ञेयम्। तत्तत्पंक्त्यङ्कानेकीकृत्य तत्तत्संख्या च ज्ञेया, यथा, षट्कले एक-षट्-पञ्चैकाङ्कानां मेलने त्रयोदश प्रागुक्ता भेदा भवन्ति, एव-मन्यत्र॥ इति मात्रामेरुप्रस्तारः।

खण्डमेरुः।

यद्वा मात्रावृत्तेषु कत्येकगुरवः कति द्विगुरव इत्यादिज्ञानार्थं खण्ड-मात्रामेरुः कार्यः। यथा, उपर्येकः कोष्ठो लेख्यः, तदधो दक्षिणतो वामतो वातिक्रान्तैककोष्ठं कोष्ठद्वयवत् पंक्तिद्वयं, तदधस्तथैव कोष्ठत्रयवत् पंक्तिद्वितयं,

							१	१
						१	१	२
						२	१	३
					१	३	१	५
					३	४	१	८
				१	६	५	१	१३
				४	१०	६	१	२१
			१	१०	१५	७	१	३४
			५	२०	२१	८	१	५५
		१	१५	३५	२८	९	१	८९
		६	३५	५६	३६	१०	१	१४४
	१	२१	७०	८४	४५	११	१	२३३
	७	५६	१२६	१२०	५५	१२	१	३७७
१	२८	१२६	२१०	१६५	६६	१३	१	६१०
८	८४	२५२	३३०	२२०	७८	१४	१	९८७

तदधस्तथैव कोष्ठचतुष्टयवत् पंक्तिद्वयं तदधः कोष्ठपञ्चकोपेतपंक्तिद्वय मित्येवंप्रकारेण यावदिच्छं कुर्यात्। एवं कोष्ठेषु लिखितेषु कोष्ठवहि-र्निगमप्रदेशेऽन्त्यकोष्ठेषु एकद्वि-एकत्र्येकचतुरादिक्रमेणैकान्तरेणैकोत्तरवृ-द्ध्याङ्का देयाः, द्वितीयप्रदेशेऽन्त्यकोष्ठेषु सर्वत्रैकाङ्का देयाः। मध्यकोष्ठे तु स्वोपरि कोष्ठाङ्केन तदुपरि कोष्ठपुरःस्थितकोष्ठाङ्कमेकीकृत्य पूर्ववल्लिखेत्। यथा, अत्र प्रथमपंक्तावेकमात्रस्य न्यासः। द्वितीयपंक्तौ द्विकलस्य, तृती-यायां त्रिकलस्येत्येवं पूर्ववत् न्यासः। सर्वगुर्वेकगुर्वादिकथनं च पूर्व-वदेव कार्यम्। प्रतिपंक्तिप्रस्तारसंख्याज्ञानार्थं तत्तत्पंक्तिस्थान् सर्वानङ्का-नेकीकृत्य सिद्धमङ्कमेकाङ्कात् परतो वहिर्लिखेत्। मात्रामेरौ मात्राखण्डमेरौ च सम्मतिः। आद्यावेकं न्यसेत् कोष्ठं तदधः पंक्तियुग्मके। द्वौ द्वौ च तद-धस्त्रीं स्त्रीनेवंरूपेण वर्धनम्॥ १॥ अन्त्यकोष्ठेषु सर्वेषु प्रथमाङ्कं न्यसेत् सुधीः। आदौ चैकं ततो द्वौ च पुनः चैकं ततस्त्रयम्॥ २॥ एकान्तरं च वृद्ध्याङ्कमेवं रूपेण पूरणम्। मध्यकोष्ठं ततः प्राज्ञः पूरणीयं शिरः-स्थितैः॥ ३॥ शिरःस्थितोर्ध्वकाग्राङ्कमेकीकृत्य प्रपूरयेत्। एवं क्रमेण सिद्धः स्यान्मात्रामेरुर्न संशयः॥ ४॥ इति खण्डमात्रामेरुः। अथ क्रमप्राप्तां संख्यामाख्याति।

लगक्रियाङ्कसंदोहे भवेत् संख्या विमिश्रिते। इति

लगक्रियायां पूर्वोक्तायां येऽङ्काः सिद्धास्तेषां समूहे मिलिते योजिते सति योऽङ्कः सा संख्या भवेत्, त्र्यक्षरे यथा, १.३.३.१. एतेषामेकत्रित्र्येकाङ्कानां मेलनेऽष्टौ प्रस्ताराः, चतुरक्षरे च १.४.६.४.१. एषामेकचतुः षट् चतुरे-काङ्कानां मेलने षोडश। प्रकारान्तरेण सङ्ख्यामाह।

उद्दिष्टाङ्कसमाहारः सैको वा जनयेदिमाम्॥ ८॥ इति।

पूर्वोक्तानां उद्दिष्टानामङ्कानां सैक एकसहितः समाहारो मेलनं वा अथवा इमां सङ्ख्यां जनयेत् उत्पादयेत् तद्यथा त्र्यक्षरे एकद्विचतूरूपा उद्दिष्टाङ्काः सप्तमेलनेऽष्टौ सा तस्य सङ्ख्या, चतुरक्षरे च एकद्विचतुरष्टा-ङ्कमेलने १५ सैका षोडश सा तस्य सङ्ख्या। एवं प्रकारद्वयमन्यत्रावधेयम्।

वृद्धोपलक्षणं प्रस्तारगणनयापि संख्याज्ञानसिद्धेः, प्रथमवृत्तसंख्या-
द्विगुणोत्तरोत्तरवृत्तसंख्येति सिद्धेश्च। अर्धसमविषमयोरपि पूर्वोक्तरीतया
वर्गक्रियोद्दिष्टाङ्कमेलनेन संख्या ज्ञेयेति। संग्रहपद्यन्तु संख्याध्वनो-
रेकमेव वक्ष्यते। सूत्रे तु संख्यानयनेऽन्यः प्रकार उक्तः। यथा, यत्संख्यां
जिज्ञासेत तज्जातिनिष्ठाक्षरसंख्याङ्कं भूमौ स्थापिते अर्धमपनयते, अर्ध-
करणे भागद्वयस्य कृतत्वात् तन्नि संख्या लब्धा तान् पृथक्कृत्य भूमौ स्थाप-
येत्। अवशिष्टार्धसङ्ख्या यदि समा ततस्तस्यामर्धितायां द्व्यङ्कस्य लब्धस्य पूर्व-
लब्धाङ्काधस्तात् न्यासः कार्यः एवमुत्तरत्र, यदा त्वर्धसंख्याहृताक्षरसंख्यैव
विषमा तदा द्वीकरणाशक्तेरेकं रूपमपनीय शून्यं पूर्वलब्धाङ्कादधः
स्थापयेत्। एवमेकपर्यन्तकरणे अधःस्थितशून्यस्थाने एकाङ्कं निधाय
द्विगुणयेत्। तौ द्वौ तस्योपरिष्टादर्धस्थाने निधाय तया संख्यया सैव
गुणनीया, ततो गुणिताङ्कमुपरि स्थाने त्रिः क्षिपेत्, तत्स्थानं यदि शून्यस्य
तत्तदा न्यस्तमङ्कं द्विगुणयेत्, यदि त्वर्धस्थानं तदा तयैव संख्यया गुणयेत्,
एवमुपरिस्थानपर्यन्ते कृते योऽङ्को जातः स वृत्तसंख्या ज्ञेयेति।
अत्रोदाहरणं षडक्षरे गायत्रे षट्संख्याभ्यामर्धेऽपनीते द्व्यङ्के स्थापिते
अवशिष्टास्त्रयस्तेषु रूपमपनीय द्व्यङ्काधः शून्यं स्थाप्यं यथा २।० अव-
शिष्टद्विसंख्यातोऽर्धे ऽपनीते शून्याधो द्विसंख्या लेख्या यथा २।०।२। ततो-
ऽवशिष्टं रूपं तदपनीय द्व्यङ्काधः शून्यं स्थाप्यं यथा २।०।२।० अधः शून्ये
एकाङ्कं द्विगुणं न्यस्य तं द्व्यङ्कमर्धस्थाने स्थितमपनीय तत्स्थाने निधाय तं
तावद्गुणं कुर्यात्, ततो द्वौ द्वाभ्यां गुणितौ चत्वारो भवन्ति तेषामुपरि-
ष्टाच्छून्यस्थाने तं निधाय शून्यस्थानाङ्कत्वाद् द्विगुणयेत् ततोऽष्टौ
भवन्ति तानप्यर्धस्थाने निधाय तावद्गुणान् कुर्यात्, तेनाष्टावष्टभिर्गु-
णिताश्चतुःषष्टिर्भवन्ति गायत्र्यां समवृत्तानि। एवं सर्वत्र समवृत्तसंख्या
ज्ञेया, सा च तत्र तत्र दर्शितैव। यदा तु शुद्धार्धसमवृत्तसंख्यां जिज्ञा-
सेत तदा समसंख्या तथैव गुणनीया सिद्धेऽङ्के समसंख्यां पातयेत्
अवशिष्टा शुद्धार्धसमसंख्या भवति। यथा त्र्यक्षरे समसंख्या ८ तै तैरेव

गुणिताश्चतुःषष्टिस्तन्मध्येऽष्टस्वपनीतेषु षट्पञ्चाशच्छन्दांस्यर्धसमानि। एवं सर्वत्र। यदा तु तत्तज्जातिषु शुद्धविषमे संख्या जिज्ञासिता तदा संख्यायां तथैव गुणितायां या सञ्जाता तां पुनस्तथैव गुणयेत्, सिद्धेऽङ्के समार्धं समे अपनीय शिष्टा संख्या शुद्धविषमस्य। यथा, त्र्यक्षरे समानि (८) तैरेव गुणने चतुःषष्टिः ६८ पुनरेतयैवैतद्गुणने चत्वारि सहस्राणि षण्णवतिः अङ्कतोऽपि ४०९६। समार्द्धसममेलने ६४ एतेष्वपनीतेषु अवशिष्टं ४०३२ इयं शुद्धविषमसंख्या। यदा तु समार्द्धविषमाणि समुदितानि जिज्ञासितानि, तदा समार्धसमे नापनेये पूर्वैव तत्संख्या। एवमन्यत्रापि ज्ञेयम्। यदेतज्जात्यन्तानि कति समवृत्तानि इति संख्याजिज्ञासा तदा विवक्षितप्रान्तच्छन्दः समवृत्तसंख्यां द्विगुणयेत् तन्मध्ये द्वावपनयेत् शिष्टा विवक्षितजातिपर्यन्तानां समवृत्तसंख्या यथा चतुरक्षरे षोडश समवृत्तानि तेषां द्वैगुण्ये द्वात्रिंशत् द्वयोरपनये तदन्तानां संख्या ३०। एवमुत्कृते भेदाः षट्कोट्य एकसप्ततिर्लक्षाणि अष्टौ सहस्राणि अष्टौ शतानि चतुःषष्टिश्चेति अङ्कतोऽपि ६७१०८८६४ एतद्द्वैगुण्ये द्वयो र्हानिः त्रयोदश कोट्यो द्वाचत्वारिंशल्लक्षाः सप्तदश सहस्राणि सप्त शतानि षड्विंशत्यधिकानि अङ्कतोऽपि १३४२१७७२६। एतावन्ति सर्वाणि समवृत्तानि। तदुक्तम् "विवक्षितान्तजातेस्तु भेदा द्विगुणितास्ततः। द्विहीनाः सर्वसंख्यायां ते स्युरुक्तादिजा इति"। अथाध्वयोगमाह॥

संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः। इति।

या समादिवृत्तानां तत्तज्जातिषु संख्या पूर्वमुक्ता सा द्विगुणा एकोनेति स सद्भिः प्रस्तारादिज्ञैरध्वा वृत्तप्रस्ताराख्याप्यः प्रदेशस्तत्तज्जातिषूक्तः स्वस्वग्रन्थेषु। त्र्यक्षरे यथा संख्याष्टरूपा द्विगुणा षोडश एकोना पञ्चदश भवन्ति सोऽयं तस्य अध्वा पञ्चदशाङ्गुलायां भुवि तद्वृत्तं प्रस्तार्यं इति भावः। चतुरक्षरेऽपि तथाकरणे एकत्रिंशत् स तस्य। एवमर्द्धसमविषमयोः उक्तोऽर्थे उपपत्तिमाह।

वृत्तस्याङ्गुलिकी व्याप्तिरधः कुर्यात्तथाङ्गुलिम्॥ ९॥ इति।

वृत्तस्य वृत्तप्रस्तारस्य व्यासतो व्याप्तिरङ्गुलिमिता, वृत्ताधस्त्वाङ्गुलिं कुर्यात् स्वकामिति शेषः अङ्गुलायामा गुरुलघवः कार्याः प्रस्तारान्तरालस्याङ्गुलिमितमेव कार्यमित्यर्थः। अत्र चोद्दिष्टाङ्कलेखनाय मध्येऽङ्गुलावस्थापनं अङ्गुलन्यूनाधिकपरिमाणानां गुरुलघूनामुद्दिष्टाङ्कानां च लेखनं सम्भवेऽपि अननुगतस्याशास्त्रार्थत्वादगुणमिति सिद्धार्थमङ्गुलिनियमनं कृतं नतु व्यसनिमात्रतया। न च प्रथमप्रस्तारेऽप्युद्दिष्टकरणायोपर्यङ्गुलमितभूमिग्रहे पूर्णैव द्विगुणा संख्याध्वा स्यात् नत्वेकोनेति वाच्यम्। प्रथमस्य सर्वत्र सर्वत्र स्वसर्वे गुरुत्वेनैव नियमादुद्दिष्टकरणानपेक्षणात्। न चैवमन्तिमस्यापि सर्वलघुत्वेन ज्ञातत्वादूना द्विगुणा संख्या अध्वा स्यादिति वाच्यम्। कोऽत्रवधिकलघुप्रस्तारेषु सर्वलघोः सामान्यत अन्त्यत्वज्ञानेऽपि कतियोऽयमिति विशेषाज्ञाने गणनाव्यतिरेकेणापि तावत्सङ्ख्याक इति ज्ञानार्थमुद्दिष्टकरणापेक्षणात्। एतेनैतदपास्तं यत् केचिदाहुः 'षष्ठः प्रत्ययोऽध्वयोगपरिच्छित्तिरितेयके' सोऽल्पफलत्वात् पुरुषेच्छानुविधायित्वेनानियतत्वाच्च नोक्त इति। सङ्ख्याध्वनोः संग्रहपद्यम् :—"सैकोद्दिष्टाङ्ककूटाल्लगकरणगताङ्कैर्विमिश्रैः परेषां पूर्वैर्द्विगुण्यतो वा भवति गणनया प्रस्तृतीनां च सङ्ख्या। वृत्ते वृत्तान्तरे चाङ्गुलिपरिमितता स्यात्तदेकेन हीना संख्यैव द्विः कृताध्वा विधिरयमुदितो भट्टनारायणेन।" इदानीं निर्व्यूढप्रतिज्ञाभारो ग्रन्थकारः स्वग्रन्थे श्रोतृभिः प्रवृत्तिविशेषः कार्य इति सूचनार्थं स्वपितादिगुणप्रतिपादनपूर्वकं ग्रन्थसमाप्तिमुपसंहरति ॥

> वंशेऽभूत् काश्यपस्य प्रकटगुणगणः शैवसिद्धान्तवेत्ता
> विप्रः पव्वेकनामा विमलतरमतिर्वेदतत्त्वार्थबोधे।
> केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्त-
> श्छन्दस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम्॥ १०॥ इति।

काश्यपस्य महर्षेर्वंशेऽन्वये गोत्रे प्रकटः प्रसिद्धो गुणसमुदायो यस्य स ताहृशः पव्वेकाख्यो विप्रो ब्राह्मणोऽभूत्, कीदृक् शिवो देवता येषां ते शिवपूजकाः शैवास्तत्सिद्धान्तस्य वेत्ता ज्ञाता शैवागमवेत्तेत्यर्थः। तथा वेदानां

तत्वार्थस्याबोधितस्यार्थस्य बोधे ज्ञाने निर्मलतरबुद्धिस्तस्य पव्येकस्य पुत्रः केदारनामा कीदृक् शिवचरणयुगलसेवामात्रैकाग्रचेतास्तेन केदारेणाभिरामं मनोज्ञं संक्षेपेणैव लक्ष्यलक्षणयोरभिधानात् ग्रन्थान्तरेभ्योऽतिशयवत्, वृत्तरत्नाकरनामकं छन्दः छन्दःशास्त्रप्रकरणं प्रविरचितं कृतं। यद्यपि कर्त्तरि चेति कर्त्रर्थतृजन्तस्य षष्ठ्या सह समासो निषिद्धस्तथापि जनिकर्त्तुः प्रकृतिरिति ज्ञापकेन निषेधस्यानित्यताज्ञापनात्। शैवसिद्धान्तवेत्तेति षष्ठीसमासः। केचित्तु तृनन्तेन समास इति। तन्न तृनो योगे न लोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीनिषेधात्॥ इति सर्वं मनोहरम्॥

भट्टश्रीनागनाथात् समजनि विबुधश्चाङ्कदेवाख्यभट्टः प्रासोष्टासौ तनूजं रघुपतिनिरतं भट्टगोविन्दसंज्ञम्। विश्वामित्रान्ववायाम्बुधिविधुरधिकं वर्धते तत्तनूजो विद्याब्धौ लब्धपारः प्रथितपृथुयशा भट्टरामेश्वराख्यः॥ १॥ नारायणेन सुधिया काश्यां निवसता सता। वृत्तरत्नाकरे टीका तद्भुवा रचिता चिता॥२॥ ग्रन्थेऽस्मिन् गुणगणवत्त्वमुच्यते चेत् स्वं कार्यं गुणगणवन्न मन्यते कः। तत् सन्तः शिरसि कृताञ्जलिस्तु याचे शोधन्तत् सदसद्दिष्टोदितं मया यत्॥ २॥ याति विक्रमशके द्विखषड्भू १६०२ संमिते सितगकार्त्तिकचक्रे। ग्रन्थमूर्तिसुकृतं किल कुर्मो रामचन्द्रपदपूजनपुष्पम्॥

इति श्रीविद्वन्मुकुटमाणिक्यश्रीभट्टरामेश्वरसूरिसूनुनारायणभट्टविरचितायां वृत्तरत्नाकरटीकायां प्रस्ताराध्यायः षष्ठः समाप्तः॥

२०।१२। यथा स्नातुमवतीर्णं उदुभ्रान्तसुखसितम मुक्ताकान्तम्।
तथा च स्नाता ता अपि त्वं स्वच्छे गोदावरीतोये॥

—२१ "इह्यारा विन्दुजुआ एओ हुआ वसमिलिआवि।
रह वस्त्रस जोए परे असेस वि सावहास।" प्रा॰. पि॰. ५।

—२२। प्रा॰. पि॰. ६। मानिनि मानैः किं फलमेष यच्चरणपतितः कान्तः। सहजेन भुजङ्गमो यदि नमति तत्र किं क्रियते मणिमन्त्रैः॥ "एओ" इत्यत्र एअ इति "मिलु," इत्यत्र पड़ु इति, "तइ किं करिअ" इत्यत्र कि करिअए इति च मूलसम्मताः पाठाः। तत्रैवं व्याख्या "एष यदि" "पतितः" "किं कुरुतः"। अयं वारेन्द्री भाषा इति रविकरः।

३१।२। "जहि दीहोवि वण्णो लहु जिह्वा पठइ होइ सोवि लहु।
वण्णोवि तुरिअपठिओ दोत्तिण्णि वि एक्क जाणेहु॥" प्रा॰. पि॰. ८।

८०।१५। सकलस्य हसगानस्यापि गुणरसपाम्बरे उदितः।
स्मिलितापरप्रबोध धिधिका वा भवतु प्रार्थना एषा॥

—१७। प्र॰ ५। २६।

८१।२। हरनयनसमुत्थज्वालो वह्निः (मदनं) ज्वालयामास, रतिनयनजलौघैः भस्मापि पश्चात् जहे। तथापि दहति चेतो मामकं किं करोमि मदनशिरसि भूयः अग्नि सम्म इति किं वरीयः॥

—१६। होहि गाहु मत्तघउअण तथा गाहाइ सत्ताइवणा। तह विगाह पलहि किज्जइ उगाहउ सहिअस॥ गाहिणिअ वासहि हिज्जइ तह विपलइ सीहिणी॥ वेअ गाहो (वा) सहि मत्ते हओ अण्णोणगण खन्दमत्त चोसहि। (प्रा॰ पि॰ ५१)

—२१। चन्द्रचन्दनहारः तावद्रूपं प्रकाशयतः।
चक्रेश्वरस्य कीर्त्तिं यावदात्मानं न दर्शयति॥ प्रा॰ पि॰ ५२।

—२४। प्रथमं द्वादशमात्राः विरामः अष्टादशभिः संयुक्ता।
यथा प्रथमं तथा तृतीयं दशपञ्चविभूषिता गाथा॥ प्रा॰ पि॰ ५४।

८२।५। पूर्वोत्तत्र चूर्णा प्रा॰. पि॰.।

—७। तेरहलहुआ विप्पा एआइसेहि खत्तिणी भणिआ।
सत्ताइसा वेसी सेसा सा सुद्दिनी होइ। प्रा॰ पि॰ ६४।

—८। एक्के जे कुलवन्ति वेआअक्केहि होइ सङ्खिणी। णाअकहीणा रच्छा वेसा वहुणाअका होइ। प्रा॰ पि॰ ६२। जा पढमतीअपञ्चमस समठाणेहि होइ गुरुमज्झा। गुव्विणी गुणरहिआ गाहदोसं पआसेइ॥ प्रा॰ पि॰ ६५।

—१५। परिहर मानिनि मानं प्रेक्षस्व कुसुमानि नीपस्य।
तव कृते खरहृदयो व्यञ्जाति गुलिका धनुषि किल कामः॥ प्रा॰. पि॰. ६७।

—१८। स्मृत्वा यस्य नाम अश्रुनयने सम्मुखं रचय धि।
भव वीर चेदिपते नो प्रेषेत्र सुखं कथं यथेच्छं तस्य। प्रा॰ पि॰ ६८।

—२२। सुभ्रु सुन्दरि पादम् अर्पय हसित्वा सुमुखि खड्गं मे।
कल्पयित्वा म्लेच्छशरीरं प्रेक्षिष्ये वदनं तव भुवनहं वीरः॥ प्रा॰ पि॰ ७१।
—२४। वर्षति कनकस्य वृष्टिं तपति भुवने दिवानिशं आयत्।
निःशङ्कं साहसाङ्को निन्दति इन्द्रं च सूर्यबिम्बं च। प्रा॰ पि॰ ७२।
८३। १। यं वमानयति गिरिं रविरथचक्रपरिघट्टनसहं हनुमान्।
तं तं लीलया नलो वामकरोत्तोलितं रचयति समुद्रे॥ प्रा॰ पि॰ ७४।
—५। चन्द्र भङ्गउ सेव वारह सिव वमुह चारच वदच।
नील मउच्च तालह्न सेहर सव गत्रघ्न सरङ्ग विमद।
खीर चअह चरु थिह्न घेहण मअनय भोलह।
सुह्न घरि कुम्भ कलस सविहर सुणक्कु अट्ठारह चन्दाच॥ प्रा॰ पि॰७५।
—८। चन्द्रः कुन्दः काशो हारः हंसाक्षिलोचनः कैलासः।
यावद् यावत् शुक्लं तावत् काशीश जितं ते कीर्त्या॥ प्रा॰ पि॰ ७७।
—१४। सुरतरुः सुरभिः स्पर्शमणिः न हि वीरेशसमानः।
एते वल्कलो कठिनतनुः पशुः पाषाणः॥ प्रा॰ पि॰ ७९.
—१७। प्रा॰ पि॰ ८०।
—२०। यस्य अर्द्धाङ्गे पार्वती शीर्षे गङ्गा वसति। यो लोकानां वल्लभः वन्दे पादं तस्य॥ प्रा॰ पि॰ ८२
—२२। प्रा॰ पि॰ ८३.
८४। २। प्रा॰ पि॰ ८६ (उल्लच्का)
—७। विमुखचलितो रणे अचलः परिहृत्य हयगजघटाः।
हलहलायमानः मलयन्नृपतिः यस्य यशस्त्रिभुवनं पिबति।
वाराणसीनरपते गुंजितं सकलसुवरि यशः स्फुरितम्॥ प्रा॰ पि॰ ८७.
—११। पदभरदर्मरिता (चुसा) धरणी, तरणि धूलि भि झम्पः।
कमठपीठं (धडपडितं) मेरुमन्दरशिरः कम्पितम्।
क्रोधेन चलितः हम्मीरवीरो गजयूथयुक्तः।
कष्टेन कृत आक्रन्दो मूर्च्छितो म्लेच्छपुत्रः॥ प्रा॰ पि॰ ६२।
—१५। प्रा॰ पि॰ ६३।
८४। १८। कस्य चलने कूर्मश्चलति पृथिव्याः शरणं कूर्मं चलति मही चलति भुवनभयकरणा।
महत्या चलन्त्या महीधराः तथा च सुरगणाः चक्रवर्त्तिचलने चलति चक्रं यथा त्रिभुवनम्।
प्रा॰ पि॰ ६६।
—२१। प्रा॰, पि॰ ६७।
—२५। यस्य शीर्षे गङ्गा गौरी अर्धाङ्गे ग्रीवायां पिनद्धः फणिहारः,
कण्ठे स्थितं विषं परिधानं दिशः सन्तारयति संसारात्, चिरध्यावलिकन्दः बद्धचन्द्रो
नयनेऽनलः स्फुरति स मङ्गलं ददातु बहु सुखं करोतु तव भवानीकान्तः। प्रा॰ पि॰ ६८।
८५। ४। घात इति रविकरः। प्रा॰ पि॰ १००।

—६। रणे दक्षो दक्षो हतः जितः कुसुमधनुः अन्धकगन्धमपि नाशं चकार।
स रक्षतु शङ्करः असुरभयङ्करः गौरीनारीमर्धाङ्गधरः। प्रा० पि० १०१।

—८। प्रा० पि० १०२।

—१०। येन बद्धा शिरसि गङ्गा हतोऽनङ्गः अर्धाङ्गे परिकरं (भार्यां) धरति।
स योगिजनमित्रं हरतु दुरितं शङ्काहरः शङ्करचरणः॥ प्रा० पि० १०३।

—१२। प्रा० पि० १०४।

—१७। परिधाय दृढसन्नाहं वाहोपरि पक्खरं (कवचं) दत्त्वा बन्धून् संमत्य रणं धन्यं यामि स्वामिहम्मीरवचनं स्वीकृत्य। उड्डयामि नभः पन्थानं भ्रमामि खड्गं रिपुशिरसि भ्राटयामि- पक्खरे पक्खरे पातयित्वा पर्वतान् उत्फालयामि हम्मीरकार्ये जज्जलः (तन्नामा सेनापतिः) भणति क्रोधानलो मुखमध्ये ज्वलति, सुलतानशिरसि करवालं दत्त्वा त्यक्त्वा कलेवरं दिवं चलति। प्रा० पि० १०५।

—२५। यथा शारदशशिबिम्बं यथा हरहारहंसाः स्थिताः। यथा फुल्लसितकमलं यथा श्रीखण्डखण्डो दृश्यते यथा गङ्गाकल्लोलः यथा रमणीयं रूप्यम्। यथा दुग्धवरशुभ्रफेनं स्फुरितं लुप्यते, प्रियपातप्रसादवृष्टिपतितः निभृतं हसति यथा तरुणीजनः, वरमन्त्रिन् चण्डेश्वर तथा तव कीर्त्तिः दृश्यते हरिब्रह्मा भणति॥ प्रा० पि० १०७।

९६। ९। प्रा० पि० ११२,११३।

—१४। यस्य करे फणिपतिर्वलयः तरुणीवरा तनुमध्ये विलसति।
नयने अनलः गले गरलं विमलः शशधरः शिरसि निवसति।
सुरसरित् शिरोमध्ये वहति सकलजनोद्दुरितदलनकरः।
हसित्वा शशधरधरो हरो हरतु दुरितं तव दिशतु अभयवरम्॥ प्रा० पि० ११०।

—१७। प्रा० पि० १५।

—१८। प्रा० पि० ११६।

—२०। प्रा० पि० ११७।

—२२। जाया जाता अर्धाङ्गे शीर्षे गङ्गा लोलन्ती। सर्वाशां या पूरयन्ती सर्वं दुःखान्तं नेत्री। अस्ये ताराधारो दिव्यो भावो भासयन्। वेताला यस्य सङ्गे नृत्ये दृष्टं नृत्यन्ति। गायन्ति कान्ता अङ्गैस्तालैः भूमिकम्पनम्। यद्दृष्टे मोक्षः प्राप्यते स युष्माकं सौख्यं ददातु। प्रा० पि० ११८।

९७ २। प्रा० पि० १२२।१२३। इह शालधरभसकलजगमन्दकलकलजतावेलल क्रमेण शाल-भ्रमरमकरमन्दकरजलमलयपाठाः।

—१२। यदा यदा गर्जित्वा गरुडो वल्हिरिति उद्भटवीरजाः सभयाः पलायन्ते।
उरविक्रमविक्रमजनितरुः (क्रोधः) तस्य तत्क्षणपराक्रमं को न बुध्यते॥ प्रा० पि०। १२५।

—१६। अलिङ्गो अप्रयोजकवाचकात् अलघ्वात् रङ्गप्रत्ययः अप्रत्ययश्चेति रविकरः॥

—१६। अपि आशामन्दिरे हल्लिज्ञानि खुरसाणराज्ये जित्वा स्थाप्य।

कालिञ्जरं जित्वा कीर्त्तिं स्थापय धनमर्जयित्वा धर्मं अर्पय ॥ प्रा० पि० १२७।

—२५। भ्रमति मधुकरः फुल्लारविन्दे नवकिंशुककाननपूरिताः सर्वदेशाः। पिक एव कूजते, शीतलपवनो लघु वहति। मलयकुहरे नववल्लीं क्षिप्त्वा चित्तं मनोभूःशरैर्हन्ति दूरदिगन्तरे कान्तः केन प्रकारेण आत्मानं धारयामि एवं परिमोहितो दुरन्तः (कालः) ॥ प्रा० पि० १२२।

९८।११। भयभग्ना वङ्गा भग्नाःकलिङ्गाः तैलङ्गा रणं मुक्त्वा चलिताः। महाराष्ट्राःस्थिमिता लग्ना काष्ठाः सौराष्ट्राः भयेन पदे पदे पलायिताः। चम्पा रणकम्पा पर्वताः कम्पिता उत्थाय उत्थाय जीवं हरति। काशीश्वरो राजा कृतप्रयाणो विद्याधरो भणति मन्त्रिवरः। प्रा० पि० १२६।

—१९। ढोलं ताडयित्वा दिल्लीमध्ये मूर्च्छयित्वा म्लेच्छशरीराणि पुरो अञ्जलो मल्लवरश्चलति वीरो हम्मीरः। चलिते वीरे हम्मीरे पादभरेण मेदिनी कम्पते दिशो मग्ना अन्धकारे धूली सूर्यरथं आच्छादयति (छादयति) दिशो मग्ना अन्धकारे अनन्तरं खुरसानकाः उत्थिताः, प्रमथितो विपक्षः ताड्यते दिल्लीमध्ये ढोलः। प्रा० पि० १२९।

—२६। भग्ना मलयचोलपतयः चलिता गर्जित्वा गुर्जराः।
मालवराजो मलयगिरौ लुक्कायितः परिहृत्य कुञ्जरान्।
खुरसानाः स्खलिताः रणमध्ये मर्दिताः लङ्घिताः सागराः।
हम्मीरे च चलिते हृताः (भग्नाः) पलायिताः रिपुगणाः कातराः ॥ प्रा० पि० १४२।

९९।५। दानवा देवा विस्मयाक्रान्ताः गिरिवरशिखराणि कम्पितानि।
हयगजपादघातोत्थितधूलिभि गंगनं लुप्यते। प्रा० पि० १४६।

—८. मही चलति अहिः पलायते गिरिश्चलति हरः स्खलति शशी निद्राति अमृतं वमति भग्नो जीवित्वा उत्थितः। पुन र्धर्षति, पुनः स्खलति पुन र्लुठति पुनश्चलति पुन र्निद्राति अमृतं वमति विविधपरिहृष्टैः। प्रा०, पि०, १४९।

—१२। फुल्लितमधुभ्रमरवधूः रजनि र्यत्र किरणबद्धः अवतरति वसन्तः।
मलयगिरिकुसुमधरपवनवहः सहे कति भण सखि निजो नास्ति कान्तः ॥ प्रा०, पि०, १५२।

—१६। वर्षति जलं भ्रमति घनः मलयशीतलः पवनो मनोहरणः कनकपिञ्जरनिचिता विद्युत् फुल्ला नीपाः प्रस्तरविस्तरो हेलति खेलति नभस्तलं न आवेद्यते। प्रा० पि० १५५।

—२१ राजा लुब्धसमाजः खलः, बहुकलहकारिणः सेवकाः धूर्ताः।
जीवनं वाञ्छसि सुखे यदि परिहर स्फुटजनं बहुरणयुक्तम्। प्रा० पि० १५८।

—१४। स मानी पुण्यवान् यस्य भक्तः पण्डित स्तनयः।
यस्य स्फुहिणी गुणवती सोऽपि पृथिव्यां स्वर्गनिलयः। प्रा० पि० १६०।

१०० १। उच्चोत्थानकं विमलस्फुटं तरुणी स्फुहिणी विनयपरा। पुन र्विदग्धपूर्णा सुदारा वर्षासंमदसौख्यकराः। प्रा० पि० १६२।

—२। यस्य चन्द्रः शीर्षे परिधानं च दिशः। स शम्भुः पातु महासुखं ददातु ॥ प्रा० पि० १६५।

५। सुन्दरी गुर्ज्जरनारी लोचनं दीर्घं विसारि। पीने स्तनभारे लोलते मतिहारः। प्रा० पि० १६७।

—८। राजानो भग्नाः दिगन्तरलग्नाः परिहृत्य हयगजस्यन्दनमणीः।

रुदितभरसरोवराः पतितनिजपरिकरा लोटन्ते पतिततनवो धरण्याम्।

पुनरुत्तिष्ठन्ति समुत्थाय करदत्ताङ्गुलिबालतनयकरकमलधराः।

काशीश्वरो राजा नेह लुक्कायितो भव, कुरु मायां पुनराक्रमन्न भविष्यति॥ प्रा० पि० १६८।

—१२। यस्य हस्ते करवालः विपक्षकुलकालः। शिरसि च वरच्छत्रं संपूर्णं शशीभानु॥ प्रा० पि० १७१।

—१५। जहि अर्ज्जरगुर्ज्जरराजदलं दलदर्पितवञ्चितम् महाराष्ट्रबलम्।

बलमौलितमालवराजकुलं कुरु भद्रां कुलच्छवि कर्णपूरैः॥ प्रा० पि० १७४।

Corrections.

५।७ त्रिमत (मत). ७।१४. सतोह (सतो ह). ८।७ मध्येजत्रो (मध्ये जेत्रा). १०।४ भवेत् (भवेत्). ११।१२ त्रिमत (मत). १२।९ चतुरूर्ध्वं (चतुरर्धं). १३।६ पुराणे(पुराणेत्र)। २४ छन्दः (छन्द). १५।९ ननना: (ननना:). २४।११ मवादि (मवादि). ३०।१२ हस्व (स्व) ; १३ अ प्राह्मा. ३१।२५ पद (पाद). ३२।८ रामावमा (रामा वामा) १० मञ्जरी—पि(मञ्जरी पि)। ११ पादा (पदा) १८ तुरते (तुरते।). ३३।४ सङ्गमेवा—(सङ्गमे वा)। ५ वञ्चित (वञ्चित) ८ वक्त्रं-(वक्त्रं) पूर्णेन्दु (पूर्णेन्दु) १० पूर्वादि (पवादि) १४ वी। (वी). ३५।४ समविषमात्मकं (समात्मकं). ३६।२३ दयुक्ते (द्रुयुक्ते). ४२।२३ त्रिगणान्त (त्रिगणानान्त). ४३।२ तृतीया मू(तृतीयामू) १३ ५।१२। (५।१२). ४४।२५ विकल्पा:। (विकल्पा:). ४५।१७ मार्यागीतिः (मार्या गीतिः) १८ द्रुतरत् (द्रुतर). ४६।२६ पीनोन्नत (पीतोन्नत). ४७।२० समेऽष्टौ (समेऽष्ठौ). ४८।४ to १० त्रयोदश विकल्पा: SSSS, SSS II, SSIIS, SIISS, IISSS, SSII II, SIISII, SIIIIS, IIIISS, IISSII, IISIIS, IISIIII, IIIISII. एते अर्थाभिवर्णक्रमेण निबद्धाः केचित्। मीनाङ्का: १ सुरसर्त्रैः २ पङ्कजसौ ३ रभितजला: ४ ततृसारस ५ खगसंभ्रत ६ सज्जनमुदि ७ तवनकुकभि ८ एते विषमे पादे। हंसस्वरा १ अलिके नद्यो २ नीरजवक्त्रा: ३ कुवलयनेत्रा: ४ सुस्वच्छजला: ५ सुतरङ्गभुजा: ६ केशरदशना ७ राजन्ते कृत ८ जनहर्षा भुवि ९ शारदरात्रिषु १० विमलनिशाकर—५।११।८ सत्राद् (स्राद) १९ व्याख्येयं

(व्याख्येत्रय). ५१।२४ नैव (नैव।) ५६।२ षोड़शलघु (षोड़श लघु) २१ ॥
ऽ, (॥,) २३ समचिन्ता (सम चिन्ता). द्वयं ॥ऽ, (द्वयं). ५७।६ द्वितीये
(॥ द्वितीये). ५८।२ प्रथमपादे (प्रथम पादे) ९ वृत्तिकृत् (वृत्तिकृत्). ६१।१
वत्पादद्वयघटितार्धद्वय (वत् पादद्वयघटितार्धं द्वय) ६७।११ कथिता म्भौ
(कथिताम्भौ). ६८।१३। जै र (जैर). ७०।१३ भाषिणो (भाविणो). ७१।१५
च्छित् (च्छदित्) २२ गिति भर (गितिभर). ७२।२ नननननसै ७३।११
जसयला (उसयला). ७४।१२ सुधा तर्कैं (सुधातर्कैं). ७५।५. ख्वषड्भि (ख्व
षड्भि) १७ मेतत्॥ (मेतत्). ७६।७ द्वादश॥ (द्वादश) ।९ *अभि-
ख्तिः, P. ७९।२१ ज्गौ ग् (ज्गौ). ८०।१९ जरगाश्च (रगाश्च).
८१।९ ननभभाः समकेऽपि (नन रभाः समेकेऽपि). ८५।९ कः। (कः) १२
द्वितीयेनैकं (द्वितियेनैं). ८६।१२ नसत्रुतौ (नसंत्रुतौ). ८७।११ तादृशाः
(तादृशाः) १३ दृश धर्मं (दृशधर्मं). ८८।२२ मनः (मन). ८९।२५ का-
श्मीर, M. (काश्मीर. P.) ९०।२ रौपेन्द्रं (रैपेन्द्रं) ७ यतिः। (यतिः)
१८ अ (ए) २० मौ मूढ़ (मौमूढ़) २१ मा ा (माजा) २२ आपवूं।
(आपवूं). ९१।२४ रद्दैद्व संयुक्ता (राद्दैद्व संयुक्ता) ९२।२३ घु ऋष्ट
(घु ऋष्ट). ९३।३ आर्यागीतिः (आर्या गीतिः) ४ द्विषष्टिलघु (षष्टिलघु)
१९ उन्द्र र (उन्द्रर). ९४।१६ दून्द्र (दून्द्र) दूति रोला (दूतिरोला). ९५
।९ घाता—(घातो). ९६।२२ लोलन्तौ (लोलन्तौया). १००।६ त्वषश्च (त्वनश्च)
१०२।१३ प्रस्तार (प्रस्तर). १०४।१३ पादार्धसम (पादार्धं सम). १०६।१७
पूर्ति (पूति). १०८।२ निवर्तेत (निवर्तेत।) ११०।५ भंगे लब्धं (भंगे लब्धं)
६ गुरवः (गुरव ६, षट्) ११२।१६. १२ (२१) २२ चतुःषोड़श (चतुःषो ड़श)
११७।२ द्विगुणो (दिगुणो).

A. Distinguishing poetry from prose.

Seperate poetry from prose in the following passages.

(1) इषे त्वोर्जे त्वा वायव स्थोपायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठ-
तमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावती-
रनमीवा अयक्ष्मा मा व स्तेन ईशत माघशंसो रुद्रस्य हेतिः परि वो वृणक्तु
ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि ॥, t. I.1.1.

(2) ततः प्रविशतो रामलक्ष्मणौ ।
रामः । सौमित्रे ! ननु सेव्यतां तरुतलं चण्डांशुरुज्जृम्भते ।
लक्ष्मणः । चण्डांशो र्निशि का कथा रघुपते ! चन्द्रोऽयमुन्मीलति ।
रामः । वत्सैतद्विदितं कथन्नु भवता ।
लक्ष्मणः । धत्ते कुरङ्गं यतः ।
रामः । क्वासि प्रेयसि हा कुरङ्गनयने चन्द्रानने जानकि ?, Pra. vi. 1.

(3) माधवः । सोऽहस्य सुन्दरि शिरः कमलार्चनेन ।
त्वामेव लब्धुमभिरोद्धुमना भवानीं । कण्ठे हस्तेन प्रदर्शयन् ।
तमेनमधिषि करेण खड्गं ।
मल्लिका । ससम्भ्रमं । महाभाग्य मामा साहसमणु चिट्ठहि । इति हस्तं
गण्हि ।
माधवः । सस्मितं । आक्रन्दितेन तव भीरु निवारितोऽस्मि,
Mar. p. 178.

(4) क्रीडतस्तस्य वृत्तिः कथं जायते योऽपि भाविजगद्वेधसा तेजसः कल्पितः
प्रतिक्षणं दिव्यगीतक्षणो नृत्यलोलो गणेशैः स्वप्रणत्यक्षणः सिंहनादाकुले
गण्डशैलेऽम्बुजव्रातजाले बृहत्सालताले क्षणे फुल्लनानातमालालिकाले
क्षणं वृक्षमूले विलोलोमराले क्षणे स्वल्पपङ्के जले पङ्कजाढेऽक्षणं मातु-
रङ्के शुभे निष्कलङ्के ॥, Mat. 153. 577.

B. Arrangement of verses.

Arrange the following verses according to their feet.

(1) आ त्वेता नि षीदतेन्द्रमभि प्र गायत । सखायः स्तोमवाहसः ॥, *r*.I.5.1

(2) विषूच्येतु कृन्तती पिनाकमिव बिभ्रती ।

विष्वक्पुनर्भुवा मनोऽसमृद्धा अघायवः ॥, a. 1. 27. 2.

(3) प्रथममुनिकथितमवितथ-

मवलोक्य ग्रन्थविस्तरस्यार्थम् ।

नातिलघुविपुलरचना-

भिरुद्यतः स्पष्टमभिधातुम् ॥, V. m. 2.

(4) नित्योदकी नित्ययज्ञोपवीती

नित्यस्वाध्यायी पतितान्नवर्जी ।

ऋतौ गच्छन् विधिवच्च जुह्वन् ब्राह्मण-

श्च्यवते न ब्रह्मलोकात् ब्रह्मलोकादिति ॥, Vas. p. 472.

(5) बाष्पायमाणनयनविनिवेदितशोकभारः

चरणनिपतितेन भ्रमरकेण सप्रार्थनं किमपि निवार्यते । Mar. iv. 18½.

(6) स्वेदाम्भः कणभिन्नभीषणतरभ्रूभङ्गमेकं रुषा त्रासेना-

परमुत्प्लुतोत्प्लुतभृङ्गव्यालोलनेत्रोत्पलम् ।

उत्पश्यन्नहमग्रतो मुखमिदं देव्याः प्रियायास्तथा

भीतश्चोत्सुकमानसश्च महति क्षिप्तोऽस्म्यहं सङ्कटे ॥ Pri. iii. 16.

(7) जननि भुवने चङ्क्रमेऽहं कियन्तमनेहसं

पुरुषकरभ्रष्टैर्दुष्टैर्धनैरुदरम्भरिः ।

तरुणकिरणे तन्द्राम्मुञ्चे तरङ्गयलोचनै नमति मयि ते

किञ्चित् काञ्चीपुरी मणिदीपिके ॥, Stu. 28.

(8) अष्टौ व्याकरणानि षट् च भिषजां व्याचष्ट ताः संहिताः
षट् तर्कान् गणितानि पञ्च चतुरो वेदानधीते स्म यः !
रत्नानां त्रितयं द्वयञ्च बुबुधे मीमांसयोरन्तरं सद्ब्रह्मैक
मगाधबोधमहिमा सोऽस्याः कविर्भास्करः ॥, Li. 250.

(9) कामन्दकीमकरन्दौ । सहर्षं । हा धिक्कष्टमाश्चर्यमाश्चर्यं ।
किमयमसिपत्रचन्दनरसच्छटासारयोर्युगपदवपातः,
अनलस्फुलिङ्गकलितः किमयमनभ्रः सुधावर्षः ।
सञ्जीवनौषधिविषव्यतिकरमालोकतिमिरसम्भेदं,
अद्यविधिर्ग्लानिग्रहग्रधरमयूखसञ्ज्वलनमनुकुरुते ॥, Ma. x. 10—1.

C. Corrections of mistakes.

Apply the rules of prosody to point out mistakes in the following.

(1) इदं जम्बूकुञ्जस्खलितजलझात्कारलहरी
गभीरायाः सिन्धोर्मुदितस्य विहगध्वानिनितटे ।
क्रमोद्गाढानज्वरविधुरकर्णाटयुवती
कपोलापाण्डु द्राग्दलति रुचिरं कैतकदलम् ॥, Mar 9. 51.

(2) अङ्के करेण परिघट्टयः सलीलं
दुर्योधनस्य पुरतोऽपहृताम्बरा या ॥
दुःशासनस्य करकर्षणभिन्नमौलिः
सा द्रौपदी कथयत क्व पुनः प्रदेशे ॥, Ve. vi. 35.

(3) आभाति रत्नशतशोभितशातकुम्भ-
स्तम्भावसिक्तपृथुभूमौलिकदामरम्यं॥
अध्यासितं युवतिभिर्विजिताप्सरोभिः ।
प्रेक्षागृहं सुरविमानसमानमेतत् ॥, Pri. iii. 2.

(4) नादस्तावद्विकलकुररीकूजितस्निग्धतार-
श्चित्ताकर्षी परिचित इवश्रोत्रसंवादमेति ।
अन्तर्भिन्नं भ्रमति हृदयं विह्वलत्यङ्गमङ्गं,
देहस्तम्भः स्खलति च गतिः कः प्रकारः किमेतत् ॥,Ma. v. 20.

(5) परिभ्रमसि किं वृथा क्वचन चित्तं विश्राम्यतां
स्वयम्भवति यद्यथा भवति नान्यथा तत्तथा ।
अतीतमपि न स्मरन्नपि च भाव्यं सङ्कल्पयन्
त तर्कितगमागमाननुभवस्व भोगानिह ॥ Vai. 60.

(6) पौलस्त्यग्रावयन्त्रौघसङ्कटभुजामूलव्रणोन्मूलित-
द्वैराजग्राममरावीं विदधते वीराय तस्मै हरिः ।

नित्यालोकन कौतुकव्यसनिनीः शङ्के स्वयं हंसः
पिण्डीकृत्य दलच्छलेन कनकाम्भोजच्छलं दत्तवान् ॥, An. v. 32.

(7) राकाचन्द्रसमानकान्तिवदना नाकाधिराजस्तुता
मूकानामपि कुर्वती सुरधुनीनीकाशवाग्वैभवम् ।
काञ्चीनगरी विहाररसिकाशोकापहन्त्री सता-
मेका पुण्यपरम्परा पशुपतेराकारिणी राजते ॥ Stu. 12.

(8) भास्वद्वंशावतंसकीर्तिरमणीरङ्गप्रसङ्गस्फुरद्-
वादित्रप्रथमध्वनिर्विजयते वल्मीकजन्मा मुनिः ।
पीत्वा यद्वदनेन्दुमण्डलगलत्काव्यामृताब्धेः किम-
प्याकल्पं कविनूतनाम्बुदमयी कादम्बिनी वर्षति ॥ Pra. I. 9.

(9) चञ्चच्चञ्चुप्रहतच्युतपिशितलवग्राससंवृद्धगर्धै-
र्गृध्रैराबद्धपक्षस्थगितविधुतिभिर्बद्धसान्द्रान्धकारे ।
वक्त्रोद्वान्ताः पतन्त्यः शमितशिखिशिखाश्रेणयोऽस्मिन् शिवानाम्
अस्रस्रोतस्यजस्रस्रुतिबहलवसा वासविस्रे स्वनन्ति ॥ Na. iv. 66.

(10) दूरात् प्रोत्सार्यमाणप्रखरनिकरज्वालकीलाभिघात-
प्रभ्रश्यद्वाजिवर्गभ्रमणनियमनव्याकुलत्वप्रसूतः ।
लेढि प्रौढो हुताशः कृतलयसमयाशङ्कमाकाशवीथिं
गङ्गासूनुप्रमुक्तप्रथितहुतवहास्त्रानुभाव प्रसूतः ॥ Dha. 58.

(11) यस्योच्चण्डासिदण्डाहतिविदलितैर्वैरिवर्गैरलक्ष्य-
शिरस्कोद्भ्रान्तवीरप्रतिबलकलनाशून्यसंग्राममार्गे ।
जीवत्संस्कारशक्त्या भुवि चरति चिरात्त्यक्तबन्धं कबन्धे
दत्तो देवीभवद्भिः सह सुरकुसुमैरात्मनःसाधुवादः ॥ B. r. iii. 42.

D. Rules of Prosody.

Restore the correct text of the following rules.

(1) म्भौ गिति पङ्क्तिः ॥ C. m. 6.

(2) दीपकमाला म्भौ मता जगौ ॥ V. r. p. 64.

(3) प्रमुदितवदना भवेत् नौ रसाविति लक्षणात् ॥ Ki. c. 18.16.

(4) पञ्चमुनि म्भौ सात् सयुता ललना ॥ ११ ॥ V. r. p. 66.

(5) द्रुतपदं १४ भवति न भयाश्चेत् ॥ V. r. p. 67.

(6) न न त त गुरुभिश्चन्द्रिकाऽश्वर्त्तभिः ॥ C. m. p. 19.

(7) यस्मिन् सर्वे गा राजन्ते ब्रह्माद्यं तद्रूपं नाम ॥ V. r. p. 70.

(8) सूर्याश्वैर्मगणः सजौ स्तमयुतौ श्यादूर्ललितम् ॥ २१ ॥ V. r. p. 71.

(9) मो गौ नौ तौ गौ स्वरहयतुरगैः फुल्लदाम प्रसिद्धम् ॥ C. m. p. 32.

(10) अस्मिन्नेव तृतीयके यदा तजराः सुरः

प्रथमे च विरतिरार्षभं ३ ब्रुवन्ति ।

तच्छन्दविराट् ४ पुरःस्थितं त्रितयमपरमपि यदि पूर्वसमं स्यात् ॥ V.r.p.79